श्रीमद्भागवतपुराणः
The Bhāgavata Purāṇa:

Version .1

collated and edited
by
Jan Brzezinski

February 15, 2001

Contents

Part III

Canto Three

Chapter 1

0301001 श्री-शुक उवाच
03010011 एवम् एतत् पुरा पृष्टो मैत्रेयो भगवान् किल
03010012 क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्व-गृहम् ऋद्धिमत्
03010021 यद्वा अयं मन्त्र-कृद्वो भगवान् अखिलेश्वरः
03010022 पौरवेन्द्र-गृहं हित्वा प्रविवेशात्मसात् कृतम्
0301003 राजोवाच
03010031 कुत्र क्षत्तुर्भगवता मैत्रेयेणास सङ्गमः
03010032 कदा वा सह-संवाद एतद्वर्णय नः प्रभो
03010041 न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः
03010042 तस्मिन् वरीयसि प्रश्नः साधु-वादोपबृंहितः
0301005 सूत उवाच
03010051 स एवम् ऋषि-वर्योऽयं पृष्टो राज्ञा परीक्षिता
03010052 प्रत्याह तं सुबहु-वित् प्रीतात्मा श्रूयताम् इति
0301006 श्री-शुक उवाच
03010061 यदा तु राजा स्व-सुतान् असाधून् ।पुष्णन् न धर्मेण विनष्ट-दृष्टिः
03010062 भ्रातुर्यविष्ठस्य सुतान् विबन्धून् ।प्रवेश्य लाक्षा-भवने ददाह
03010071 यदा सभायां कुरु-देव-देव्याः ।केशाभिमर्शं सुत-कर्म गर्ह्यम्
03010072 न वारयाम् आस नृपः स्नुषायाः ।स्वास्रैर्हरन्त्याः कुच-कुङ्कुमानि
03010081 द्यूते त्वधर्मेण जितस्य साधोः ।सत्यावलम्बस्य वनं गतस्य
03010082 न याचतोऽदात् समयेन दायं ।तमो-जुषाणो यदजात-शत्रोः
03010091 यदा च पार्थ-प्रहितः सभायां ।जगद्-गुरुर्यानि जगाद कृष्णः
03010092 न तानि पुंसाम् अमृतायनानि ।राजोरु मेने क्षत-पुण्य-लेशः
03010101 यदोपहूतो भवनं प्रविष्टो ।मन्त्राय पृष्टः किल पूर्वजेन
03010102 अथाह तन् मन्त्र-दृशां वरीयान् ।यन् मन्त्रिणो वैदुरिकं वदन्ति
03010111 अजात-शत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः
03010112 सहानुजो यत्र वृकोदराहिः श्वसन् रुषा यत् त्वम् अलं बिभेषि
03010121 पार्थांस्तु देवो भगवान् मुकुन्दो ।गृहीतवान् सक्षिति-देव-देवः
03010122 आस्ते स्व-पुर्यां यदु-देव-देवो ।विनिर्जिताशेष-नृदेव-देवः

03010131 स एष दोषः पुरुष-द्विडास्ते ।गृहान् प्रविष्टो यम् अपत्य-मत्या
03010132 पुष्णासि कृष्णाद्विमुखो गत-श्रीस् ।त्यजाश्वशैवं कुल-कौशलाय
03010141 इत्यूचिवांस्तत्र सुयोधनेन ।प्रवृद्ध-कोप-स्फुरिताधरेण
03010142 असत्-कृतः सत्-स्पृहणीय-शीलः ।क्षत्ता सकर्णानुज-सौबलेन
03010151 क एनम् अत्रोपजुहाव जिह्मं ।दास्याः सुतं यद्-बलिनैव पुष्टः
03010152 तस्मिन् प्रतीपः परकृत्य आस्ते ।निर्वास्यताम् आशु पुराच् छ्वसानः
03010161 स्वयं धनुर्द्वारि निधाय मायां ।भ्रातुः पुरो मर्मसु ताडितोऽपि
03010162 स इत्थम् अत्युल्बण-कर्ण-बाणैर् ।गत-व्यथोऽयादुरु मानयानः
03010171 स निर्गतः कौरव-पुण्य-लब्धो ।गजाह्वयात् तीर्थ-पदः पदानि
03010172 अन्वाक्रमत् पुण्य-चिकीर्षयोर्व्याम् ।अधिष्ठितो यानि सहस्र-मूर्तिः
03010181 पुरेषु पुण्योपवनाद्रि-कुञ्जेष्व् ।अपङ्क-तोयेषु सरित्-सरःसु
03010182 अनन्त-लिङ्गैः समलङ्कृतेषु ।चचार तीर्थायतनेष्वनन्यः
03010191 गां पर्यटन् मेध्य-विविक्त-वृत्तिः ।सदाप्लुतोऽधः शयनोऽवधूतः
03010192 अलक्षितः स्वैरवधूत-वेषो ।व्रतानि चेरे हरि-तोषणानि
03010201 इत्थं व्रजन् भारतम् एव वर्षं ।कालेन यावद्गतवान् प्रभासम्
03010202 तावच् छशास क्षितिम् एक चक्राम् ।एकातपत्राम् अजितेन पार्थः
03010211 तत्राथ शुश्राव सुहृद्-विनष्टिं ।वनं यथा वेणुज-वह्नि-संश्रयम्
03010212 संस्पर्धया दग्धम् अथानुशोचन् ।सरस्वतीं प्रत्यग् इयाय तूष्णीम्
03010221 तस्यां त्रितस्योशनसो मनोश्च ।पृथोरथाग्नेरसितस्य वायोः
03010222 तीर्थं सुदासस्य गवां गुहस्य ।यच् छ्राद्धदेवस्य स आसिषेवे
03010231 अन्यानि चेह द्विज-देव-देवैः ।कृतानि नानायतनानि विष्णोः
03010232 प्रत्यङ्ग-मुख्याङ्कित-मन्दिराणि ।यद्-दर्शनात् कृष्णम् अनुस्मरन्ति
03010241 ततस्त्वतिव्रज्य सुराष्ट्रम् ऋद्धं ।सौवीर-मत्स्यान् कुरुजाङ्गलांश्च
03010242 कालेन तावद्यमुनाम् उपेत्य ।तत्रोद्धवं भागवतं ददर्श
03010251 स वासुदेवानुचरं प्रशान्तं ।बृहस्पतेः प्राक् तनयं प्रतीतम्
03010252 आलिङ्ग्य गाढं प्रणयेन भद्रं ।स्वानाम् अपृच्छद्भगवत्-प्रजानाम्
03010261 कच्चित् पुराणौ पुरुषौ स्वनाभ्य- ।पाद्मानुवृत्त्येह किलावतीर्णौ
03010262 आसात उर्व्याः कुशलं विधाय ।कृत-क्षणौ कुशलं शूर-गेहे
03010271 कच्चित् कुरूणां परमः सुहृन् नो ।भामः स आस्ते सुखम् अङ्ग शौरिः
03010272 यो वै स्वस्-णां पितृवद्ददाति ।वरान् वदान्यो वर-तर्पणेन
03010281 कच्चिद्वरूथाधिपतिर्यदूनां ।प्रद्युम्न आस्ते सुखम् अङ्ग वीरः
03010282 यं रुक्मिणी भगवतोऽभिलेभे ।आराध्य विप्रान् स्मरम् आदि-सर्गे
03010291 कच्चित् सुखं सात्वत-वृष्णि-भोज- ।दाशार्हकाणाम् अधिपः स आस्ते
03010292 यम् अभ्यषिञ्चच् छत-पत्र-नेत्रो ।नृपासनाशां परिहृत्य दूरात्
03010301 कच्चिद्धरेः सौम्य सुतः सदृक्ष ।आस्तेऽग्रणी रथिनां साधु साम्बः
03010302 असूत यं जाम्बवती व्रताढ्या ।देवं गुहं योऽम्बिकया धृतोऽग्रे
03010311 क्षेमं स कच्चिद्युयुधान आस्ते ।यः फाल्गुनाल् लब्ध-धनू-रहस्यः
03010312 लेभेऽञ्जसाधोक्षज-सेवयैव ।गतिं तदीयां यतिभिर्दुरापाम्
03010321 कच्चिद्बुधः स्वस्त्यनमीव आस्ते ।श्वफल्क-पुत्रो भगवत्-प्रपन्नः

03010322 यः कृष्ण-पादाङ्कित-मार्ग-पांसुष्व् ।अचेष्टत प्रेम-विभिन्न-धैर्यः
03010331 कच्चिच् छिवं देवक-भोज-पुत्र्या ।विष्णु-प्रजाया इव देव-मातुः
03010332 या वै स्व-गर्भेण दधार देवं ।त्रयी यथा यज्ञ-वितानम् अर्थम्
03010341 अपिस्विदास्ते भगवान् सुखं वो ।यः सात्वतां काम-दुघोऽनिरुद्धः
03010342 यम् आमनन्ति स्म हि शब्द-योनिं ।मनो-मयं सत्त्व-तुरीय-तत्त्वम्
03010351 अपिस्विदन्ये च निजात्म-दैवम् ।अनन्य-वृत्त्या समनुव्रता ये
03010352 हृदीक-सत्यात्मज-चारुदेष्ण- ।गदादयः स्वस्ति चरन्ति सौम्य
03010361 अपि स्व-दोर्भ्यां विजयाच्युताभ्यां ।धर्मेण धर्मः परिपाति सेतुम्
03010362 दुर्योधनोऽतप्यत यत्-सभायां ।साम्राज्य-लक्ष्म्या विजयानुवृत्त्या
03010371 किं वा कृताघेष्वघम् अत्यमर्षी ।भीमोऽहिवद्दीर्घतमं व्यमुञ्चत्
03010372 यस्याङ्घ्रि-पातं रण-भूर्न सेहे ।मार्गं गदायाश्चरतो विचित्रम्
03010381 कच्चिद्यशोधा रथ-यूथपानां ।गाण्डीव-धन्वोपरतारिरास्ते
03010382 अलक्षितो यच्-छर-कूट-गूढो ।माया-किरातो गिरिशस्तुतोष
03010391 यमावुतस्वित् तनयौ पृथायाः ।पार्थैर्वृतौ पक्ष्मभिरक्षिणीव
03010392 रेमात उद्दाय मृधे स्व-रिक्थं ।परात् सुपर्णाविव वज्रि-वक्त्रात्
03010401 अहो पृथापि ध्रियतेऽर्भकार्थे ।राजर्षि-वर्येण विनापि तेन
03010402 यस्त्वेक-वीरोऽधिरथो विजिग्ये ।धनुर्द्वितीयः ककुभश्चतस्रः
03010411 सौम्यानुशोचे तम् अधः-पतन्तं ।भ्रात्रे परेताय विदुद्रुहे यः
03010412 निर्यापितो येन सुहृत् स्व-पुर्या ।अहं स्व-पुत्रान् समनुव्रतेन
03010421 सोऽहं हरेर्मर्त्य-विडम्बनेन ।दृशो नृणां चालयतो विधातुः
03010422 नान्योपलक्ष्यः पदवीं प्रसादाच् ।चरामि पश्यन् गत-विस्मयोऽत्र
03010431 नूनं नृपाणां त्रि-मदोत्पथानां ।महीं मुहुश्चालयतां चमूभिः
03010432 वधात् प्रपन्नार्ति-जिहीर्षयेशो ।'प्युपैक्षताघं भगवान् कुरूणाम्
03010441 अजस्य जन्मोत्पथ-नाशनाय ।कर्माण्यकर्तुर्ग्रहणाय पुंसाम्
03010442 नन्वन्यथा कोऽर्हति देह-योगं ।परो गुणानाम् उत कर्म-तन्त्रम्
03010451 तस्य प्रपन्नाखिल-लोकपानाम् ।अवस्थितानाम् अनुशासने स्वे
03010452 अर्थाय जातस्य यदुष्वजस्य ।वार्तां सखे कीर्तय तीर्थ-कीर्तेः

Chapter 2

0302001 श्री-शुक उवाच
03020011 इति भागवतः पृष्टः क्षत्त्रा वार्तां प्रियाश्रयाम्
03020012 प्रतिवक्तुं न चोत्सेह औत्कण्ठ्यात् स्मारितेश्वरः
03020021 यः पञ्च-हायनो मात्रा प्रातर्-आशाय याचितः
03020022 तन् नैच्छद्रचयन् यस्य सपर्यां बाल-लीलया
03020031 स कथं सेवया तस्य कालेन जरसं गतः
03020032 पृष्टो वार्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन्
03020041 स मुहूर्तम् अभूत् तूष्णीं कृष्णाङ्घ्रि-सुधया भृशम्
03020042 तीव्रेण भक्ति-योगेन निमग्नः साधु निर्वृतः
03020051 पुलकोद्भिन्न-सर्वाङ्गो मुञ्चन् मीलद्-दृशा शुचः
03020052 पूर्णार्थो लक्षितस्तेन स्नेह-प्रसर-सम्प्लुतः
03020061 शनकैर्भगवल्-लोकान् नृलोकं पुनरागतः
03020062 विमृज्य नेत्रे विदुरं प्रीत्याहोद्धव उत्स्मयन्
0302007 उद्धव उवाच
03020071 कृष्ण-द्युमणि निम्लोचे गीर्णेष्वजगरेण ह
03020072 किं नु नः कुशलं ब्रूयां गत-श्रीषु गृहेष्वहम्
03020081 दुर्भगो बत लोकोऽयं यदवो नितराम् अपि
03020082 ये संवसन्तो न विदुर्हरिं मीना इवोडुपम्
03020091 इङ्गित-ज्ञाः पुरु-प्रौढा एकारामाश्च सात्वताः
03020092 सात्वताम् ऋषभं सर्वे भूतावासम् अमंसत
03020101 देवस्य मायया स्पृष्टा ये चान्यदसद्-आश्रिताः
03020102 भ्राम्यते धीर्न तद्-वाक्यैरात्मन्युप्तात्मनो हरौ
03020111 प्रदर्श्यातप्त-तपसाम् अवितृप्त-दृशां नृणाम्
03020112 आदायान्तरधाद्यस्तु स्व-बिम्बं लोक-लोचनम्
03020121 यन् मर्त्य-लीलौपयिकं स्व-योग- । माया-बलं दर्शयता गृहीतम्
03020122 विस्मापनं स्वस्य च सौभगर्द्धेः । परं पदं भूषण-भूषणाङ्गम्
03020131 यद्धर्म-सूनोर्बत राजसूये । निरीक्ष्य दृक्-स्वस्त्ययनं त्रि-लोकः
03020132 कार्त्स्न्येन चाद्येह गतं विधातुर् । अर्वाक्-सृतौ कौशलम् इत्यमन्यत

03020141 यस्यानुराग-प्लुत-हास-रास- ।लीलावलोक-प्रतिलब्ध-मानाः
03020142 व्रज-स्त्रियो दृग्भिरनुप्रवृत्त- ।धियोऽवतस्थुः किल कृत्य-शेषाः
03020151 स्व-शान्त-रूपेष्वितरैः स्व-रूपैर् ।अभ्यर्द्यमानेष्वनुकम्पितात्मा
03020152 परावरेशो महद्-अंश-युक्तो ।ह्यजोऽपि जातो भगवान् यथाग्निः
03020161 मां खेदयत्येतदजस्य जन्म- ।विडम्बनं यद्वसुदेव-गेहे
03020162 व्रजे च वासोऽरि-भयादिव स्वयं ।पुराद्व्यवात्सीद्यद्-अनन्त-वीर्यः
03020171 दुनोति चेतः स्मरतो ममैतद् ।यदाह पादावभिवन्द्य पित्रोः
03020172 ताताम्ब कंसादुरु-शङ्कितानां ।प्रसीदतं नोऽकृत-निष्कृतीनाम्
03020181 को वा अमुष्याङ्घ्रि-सरोज-रेणुं ।विस्मर्तुम् ईशीत पुमान् विजिघ्रन्
03020182 यो विस्फुरद्-भ्रू-विटपेन भूमेर् ।भारं कृतान्तेन तिरश्चकार
03020191 दृष्टा भवद्भिर्ननु राजसूये ।चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः
03020192 यां योगिनः संस्पृहयन्ति सम्यग् ।योगेन कस्तद्-विरहं सहेत
03020201 तथैव चान्ये नर-लोक-वीरा ।य आहवे कृष्ण-मुखारविन्दम्
03020202 नेत्रैः पिबन्तो नयनाभिरामं ।पार्थास्त्र-पूतः पदम् आपुरस्य
03020211 स्वयं त्वसाम्यातिशयस्त्र्यधीशः ।स्वाराज्य-लक्ष्म्य्-आप्त-समस्त-कामः
03020212 बलिं हरद्भिश्चिर-लोक-पालैः ।किरीट-कोट्य्-एडित-पाद-पीठः
03020221 तत् तस्य कैङ्कर्यम् अलं भृतान् नो ।विग्लापयत्यङ्ग यदुग्रसेनम्
03020222 तिष्ठन् निषण्णं परमेष्ठि-धिष्ण्ये ।न्यबोधयद्देव निधारयेति
03020231 अहो बकी यं स्तन-काल-कूटं ।जिघांसयापाययदप्यसाध्वी
03020232 लेभे गतिं धात्र्य्-उचितां ततोऽन्यं ।कं वा दयालुं शरणं व्रजेम
03020241 मन्येऽसुरान् भागवतांस्त्र्यधीशे ।संरम्भ-मार्गाभिनिविष्ट-चित्तान्
03020242 ये संयुगे ऽचक्षत तार्क्ष्य-पुत्रम् ।अंसे सुनाभायुधम् आपतन्तम्
03020251 वसुदेवस्य देवक्यां जातो भोजेन्द्र-बन्धने
03020252 चिकीर्षुर्भगवान् अस्याः शम् अजेनाभियाचितः
03020261 ततो नन्द-व्रजम् इतः पित्रा कंसाद्विबिभ्यता
03020262 एकादश समास्तत्र गूढार्चिः स-बलोऽवसत्
03020271 परीतो वत्सपैर्वत्सांश्चारयन् व्यहरद्विभुः
03020272 यमुनोपवने कूजद्- द्विज-सङ्कुलिताङ्घ्रिपे
03020281 कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम्
03020282 रुदन्न् इव हसन् मुग्ध- बाल-सिंहावलोकनः
03020291 स एव गो-धनं लक्ष्म्या निकेतं सित-गो-वृषम्
03020292 चारयन्न् अनुगान् गोपान् रणद्-वेणुररीरमत्
03020301 प्रयुक्तान् भोज-राजेन मायिनः काम-रूपिणः
03020302 लीलया व्यनुदत् तांस्तान् बालः क्रीडनकान् इव
03020311 विपन्नान् विष-पानेन निगृह्य भुजगाधिपम्
03020312 उत्थाप्यापाययद्गावस्तत् तोयं प्रकृति-स्थितम्
03020321 अयाजयद्गो-सवेन गोप-राजं द्विजोत्तमैः
03020322 वित्तस्य चोरु-भारस्य चिकीर्षन् सद्-व्ययं विभुः
03020331 वर्षतीन्द्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः

03020332 गोत्र-लीलातपत्रेण त्रातो भद्रानुगृह्णता
03020341 शरच्-छशि-करैर्मृष्टं मानयन् रजनी-मुखम्
03020342 गायन् कल-पदं रेमे स्त्रीणां मण्डल-मण्डनः

Chapter 3

0303001 उद्धव उवाच
03030011 ततः स आगत्य पुरं स्व-पित्रोश् ।चिकीर्षया शं बलदेव-संयुतः
03030012 निपात्य तुङ्गाद्रिपु-यूथ-नाथं ।हतं व्यकर्षद्व्यसुम् ओजसोर्व्याम्
03030021 सान्दीपनेः सकृत् प्रोक्तं ब्रह्माधीत्य स-विस्तरम्
03030022 तस्मै प्रादाद्वरं पुत्रं मृतं पञ्च-जनोदरात्
03030031 समाहुता भीष्मक-कन्यया ये ।श्रियः सवर्णेन बुभूषयैषाम्
03030032 गान्धर्व-वृत्त्या मिषतां स्व-भागं ।जह्रे पदं मूर्ध्नि दधत् सुपर्णः
03030041 ककुद्मिनोऽविद्ध-नसो दमित्वा ।स्वयंवरे नाग्नजितीम् उवाह
03030042 तद्-भग्नमानान् अपि गृध्यतो ज्ञा ’ ।जघ्नेऽक्षतः शस्त्र-भृतः स्व-शस्त्रैः
03030051 प्रियं प्रभुर्ग्राम्य इव प्रियाया ।विधित्सुरार्च्छद्द्युतरुं यद्-अर्थे
03030052 वज्र्याद्रवत् तं स-गणो रुषान्धः ।क्रीडा-मृगो नूनम् अयं वधूनाम्
03030061 सुतं मृधे खं वपुषा ग्रसन्तं ।दृष्ट्वा सुनाभोन्मथितं धरित्र्या
03030062 आमन्त्रितस्तत्-तनयाय शेषं ।दत्त्वा तद्-अन्तः-पुरम् आविवेश
03030071 तत्राहृतास्ता नर-देव-कन्याः ।कुजेन दृष्ट्वा हरिम् आर्त-बन्धुम्
03030072 उत्थाय सद्यो जगृहुः प्रहर्ष- ।व्रीडानुराग-प्रहितावलोकैः
03030081 आसां मुहूर्त एकस्मिन् नानागारेषु योषिताम्
03030082 स-विधं जगृहे पाणीन् अनुरूपः स्व-मायया
03030091 तास्वपत्यान्यजनयदात्म-तुल्यानि सर्वतः
03030092 एकैकस्यां दश दश प्रकृतेर्विबुभूषया
03030101 काल-मागध-शाल्वादीन् अनीकै रुन्धतः पुरम्
03030102 अजीघनत् स्वयं दिव्यं स्व-पुंसां तेज आदिशत्
03030111 शम्बरं द्विविदं बाणं मुरं बल्वलम् एव च
03030112 अन्यांश्च दन्तवक्रादीन् अवधीत् कांश्च घातयत्
03030121 अथ ते भ्रातृ-पुत्राणां पक्षयोः पतितान् नृपान्
03030122 चचाल भूः कुरुक्षेत्रं येषाम् आपततां बलैः
03030131 स कर्ण-दुःशासन-सौबलानां ।कुमन्त्र-पाकेन हत-श्रियायुषम्
03030132 सुयोधनं सानुचरं शयानं ।भग्नोरुम् ऊर्व्यां न ननन्द पश्यन्
03030141 कियान् भुवोऽयं क्षपितोरु-भारो ।यद्द्रोण-भीष्मार्जुन-भीम-मूलैः

03030142 अष्टादशाक्षौहिणिको मद्-अंशैर् ।आस्ते बलं दुर्विषहं यदूनाम्
03030151 मिथो यदैषां भविता विवादो ।मध्व्-आमदाताम्र-विलोचनानाम्
03030152 नैषां वधोपाय इयान् अतोऽन्यो ।मय्युद्यतेऽन्तर्दधते स्वयं स्म
03030161 एवं सञ्चिन्त्य भगवान् स्व-राज्ये स्थाप्य धर्मजम्
03030162 नन्दयाम् आस सुहृदः साधूनां वर्त्म दर्शयन्
03030171 उत्तरायां धृतः पूरोर्वंशः साध्व्-अभिमन्युना
03030172 स वै द्रौण्य्-अस्त्र-सम्प्लुष्टः पुनर्भगवता धृतः
03030181 अयाजयद्धर्म-सुतम् अश्वमेधैस्त्रिभिर्विभुः
03030182 सोऽपि क्ष्माम् अनुजैः रक्षन् रेमे कृष्णम् अनुव्रतः
03030191 भगवान् अपि विश्वात्मा लोक-वेद-पथानुगः
03030192 कामान् सिषेवे द्वार्वत्याम् असक्तः साङ्ख्यम् आस्थितः
03030201 स्निग्ध-स्मितावलोकेन वाचा पीयूष-कल्पया
03030202 चरित्रेणानवद्येन श्री-निकेतेन चात्मना
03030211 इमं लोकम् अमुं चैव रमयन् सुतरां यदून्
03030212 रेमे क्षणदया दत्त- क्षण-स्त्री-क्षण-सौहृदः
03030221 तस्यैवं रममाणस्य संवत्सर-गणान् बहून्
03030222 गृहमेधेषु योगेषु विरागः समजायत
03030231 दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान्
03030232 को विश्रम्भेत योगेन योगेश्वरम् अनुव्रतः
03030241 पुर्यां कदाचित् क्रीडद्भिर्यदु-भोज-कुमारकैः
03030242 कोपिता मुनयः शेपुर्भगवन्-मत-कोविदाः
03030251 ततः कतिपयैर्मासैर्वृष्णि-भोजान्धकादयः
03030252 ययुः प्रभासं संहृष्टा रथैर्देव-विमोहिताः
03030261 तत्र स्नात्वा पितॄन् देवान् ऋषींश्चैव तद्-अम्भसा
03030262 तर्पयित्वाथ विप्रेभ्यो गावो बहु-गुणा ददुः
03030271 हिरण्यं रजतं शय्यां वासांस्यजिन-कम्बलान्
03030272 यानं रथान् इभान् कन्या धरां वृत्ति-करीम् अपि
03030281 अन्नं चोरु-रसं तेभ्यो दत्त्वा भगवद्-अर्पणम्
03030282 गो-विप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः

Chapter 4

0304001 उद्धव उवाच
03040011 अथ ते तद्-अनुज्ञाता भुक्त्वा पीत्वा च वारुणीम्
03040012 तया विभ्रंशित-ज्ञाना दुरुक्तैर्मर्म पस्पृशुः
03040021 तेषां मैरेय-दोषेण विषमीकृत-चेतसाम्
03040022 निम्लोचति रवावासीद्वेणूनाम् इव मर्दनम्
03040031 भगवान् स्वात्म-मायाया गतिं ताम् अवलोक्य सः
03040031 सरस्वतीम् उपस्पृश्य वृक्ष-मूलम् उपाविशत्
03040041 अहं चोक्तो भगवता प्रपन्नार्ति-हरेण ह
03040042 बदरीं त्वं प्रयाहीति स्व-कुलं सञ्जिहीर्षुणा
03040051 तथापि तद्-अभिप्रेतं जानन्न् अहम् अरिन्दम
03040052 पृष्ठतोऽन्वगमं भर्तुः पाद-विश्लेषणाक्षमः
03040061 अद्राक्षम् एकम् आसीनं विचिन्वन् दयितं पतिम्
03040062 श्री-निकेतं सरस्वत्यां कृत-केतम् अकेतनम्
03040071 श्यामावदातं विरजं प्रशान्तारुण-लोचनम्
03040072 दोर्भिश्चतुर्भिर्विदितं पीत-कौशाम्बरेण च
03040081 वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रि-सरोरुहम्
03040082 अपाश्रितार्भकाश्वत्थम् अकृशं त्यक्त-पिप्पलम्
03040091 तस्मिन् महा-भागवतो द्वैपायन-सुहृत्-सखा
03040092 लोकान् अनुचरन् सिद्ध आससाद यदृच्छया
03040101 तस्यानुरक्तस्य मुनेर्मुकुन्दः ।प्रमोद-भावानत-कन्धरस्य
03040102 आशृण्वतो माम् अनुराग-हास- ।समीक्षया विश्रमयन्न् उवाच
0304011 श्री-भगवान् उवाच
03040111 वेदाहम् अन्तर्मनसीप्सितं ते ।ददामि यत् तद्दुरवापम् अन्यैः
03040112 सत्रे पुरा विश्व-सृजां वसूनां ।मत्-सिद्धि-कामेन वसो त्वयेष्टः
03040121 स एष साधो चरमो भवानाम् ।आसादितस्ते मद्-अनुग्रहो यत्
03040122 यन् मां नृलोकान् रह उत्सृजन्तं ।दिष्ट्या ददृश्वान् विशदानुवृत्त्या
03040131 पुरा मया प्रोक्तम् अजाय नाभ्ये ।पद्मे निषण्णाय ममादि-सर्गे
03040132 ज्ञानं परं मन्-महिमावभासं ।यत् सूरयो भागवतं वदन्ति

03040141 इत्यादृतोक्तः परमस्य पुंसः । प्रतिक्षणानुग्रह-भाजनोऽहम्
03040142 स्नेहोत्थ-रोमा स्खलिताक्षरस्तं । मुञ्चञ् छुचः प्राञ्जलिराबभाषे
03040151 को न्वीश ते पाद-सरोज-भाजां । सुदुर्लभोऽर्थेषु चतुर्ष्वपीह
03040152 तथापि नाहं प्रवृणोमि भूमन् । भवत्-पदाम्भोज-निषेवणोत्सुकः
03040161 कर्माण्यनीहस्य भवोऽभवस्य ते । दुर्गाश्रयोऽथारि-भयात् पलायनम्
03040162 कालात्मनो यत् प्रमदा-युताश्रमः । स्वात्मन्-रतेः खिद्यति धीर्विदाम् इह
03040171 मन्त्रेषु मां वा उपहूय यत् त्वम् । अकुण्ठिताखण्ड-सदात्म-बोधः
03040172 पृच्छेः प्रभो मुग्ध इवाप्रमत्तस् । तन् नो मनो मोहयतीव देव
03040181 ज्ञानं परं स्वात्म-रहः-प्रकाशं । प्रोवाच कस्मै भगवान् समग्रम्
03040182 अपि क्षमं नो ग्रहणाय भर्तर् । वदाञ्जसा यद्वृजिनं तरेम
03040191 इत्यावेदित-हार्दाय मह्यं स भगवान् परः
03040192 आदिदेशारविन्दाक्ष आत्मनः परमां स्थितिम्
03040201 स एवम् आराधित-पाद-तीर्थाद् । अधीत-तत्त्वात्म-विबोध-मार्गः
03040202 प्रणम्य पादौ परिवृत्य देवम् । इहागतोऽहं विरहातुरात्मा
03040211 सोऽहं तद्-दर्शनाह्लाद- वियोगार्ति-युतः प्रभो
03040212 गमिष्ये दयितं तस्य बदर्याश्रम-मण्डलम्
03040221 यत्र नारायणो देवो नरश्च भगवान् ऋषिः
03040222 मृदु तीव्रं तपो दीर्घं तेपाते लोक-भावनौ
0304023 श्री-शुक उवाच
03040231 इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधम्
03040232 ज्ञानेनाशमयत् क्षत्ता शोकम् उत्पतितं बुधः
03040241 स तं महा-भागवतं व्रजन्तं कौरवर्षभः
03040242 विश्रम्भादभ्यधत्तेदं मुख्यं कृष्ण-परिग्रहे
0304025 विदुर उवाच
03040251 ज्ञानं परं स्वात्म-रहः-प्रकाशं । यदाह योगेश्वर ईश्वरस्ते
03040252 वक्तुं भवान् नोऽर्हति यद्धि विष्णोर् । भृत्याः स्व-भृत्यार्थ-कृतश्चरन्ति
0304026 उद्धव उवाच
03040261 ननु ते तत्त्व-संराध्य ऋषिः कौषारवोऽन्तिके
03040262 साक्षाद्भगवतादिष्टो मर्त्य-लोकं जिहासता
0304027 श्री-शुक उवाच
03040271 इति सह विदुरेण विश्व-मूर्तेर् । गुण-कथया सुधया प्लावितोरुतापः
03040272 क्षणम् इव पुलिने यमस्वसुस्तां । समुषित औपगविर्निशां ततोऽगात्
0304028 राजोवाच
03040281 निधनम् उपगतेषु वृष्णि-भोजेष्व् । अधिरथ-यूथप-यूथपेषु मुख्यः
03040282 स तु कथम् अवशिष्ट उद्धवो यद् । धरिरपि तत्यज आकृतिं त्र्यधीशः
0304029 श्री-शुक उवाच
03040291 ब्रह्म-शापापदेशेन कालेनामोघ-वाञ्छितः
03040292 संहृत्य स्व-कुलं स्फीतं त्यक्ष्यन् देहम् अचिन्तयत्
03040301 अस्माल् लोकादुपरते मयि ज्ञानं मद्-आश्रयम्
03040302 अर्हत्युद्धव एवाद्धा सम्प्रत्यात्मवतां वरः

03040311 नोद्धवोऽण्वपि मन्-न्यूनो यद्गुणैर्नार्दितः प्रभुः
03040312 अतो मद्-वयुनं लोकं ग्राहयन्न् इह तिष्ठतु
03040321 एवं त्रि-लोक-गुरुणा सन्दिष्टः शब्द-योनिना
03040322 बदर्याश्रमम् आसाद्य हरिम् ईजे समाधिना
03040331 विदुरोऽप्युद्धवाच् छ्रुत्वा कृष्णस्य परमात्मनः
03040332 क्रीडयोपात्त-देहस्य कर्माणि श्लाघितानि च
03040341 देह-न्यासं च तस्यैवं धीराणां धैर्य-वर्धनम्
03040342 अन्येषां दुष्करतरं पशूनां विक्लवात्मनाम्
03040351 आत्मानं च कुरु-श्रेष्ठ कृष्णेन मनसेक्षितम्
03040352 ध्यायन् गते भागवते रुरोद प्रेम-विह्वलः
03040361 कालिन्द्याः कतिभिः सिद्ध अहोभिर्भरतर्षभ
03040362 प्रापद्यत स्वः-सरितं यत्र मित्रा-सुतो मुनिः

Chapter 5

0305001 श्री-शुक उवाच
03050011 द्वारि द्यु-नद्या ऋषभः कुरूणां ।मैत्रेयम् आसीनम् अगाध-बोधम्
03050012 क्षत्तोपसृत्याच्युत-भाव-सिद्धः ।पप्रच्छ सौशील्य-गुणाभितृप्तः
0305002 विदुर उवाच
03050021 सुखाय कर्माणि करोति लोको ।न तैः सुखं वान्यद्-उपारमं वा
03050022 विन्देत भूयस्तत एव दुःखं ।यदत्र युक्तं भगवान् वदेन् नः
03050031 जनस्य कृष्णाद्विमुखस्य दैवाद् ।अधर्म-शीलस्य सुदुःखितस्य
03050032 अनुग्रहायेह चरन्ति नूनं ।भूतानि भव्यानि जनार्दनस्य
03050041 तत् साधु-वर्यादिश वर्त्म शं नः ।संराधितो भगवान् येन पुंसाम्
03050042 हृदि स्थितो यच्छति भक्ति-पूते ।ज्ञानं स-तत्त्वाधिगमं पुराणम्
03050051 करोति कर्माणि कृतावतारो ।यान्यात्म-तन्त्रो भगवांस्त्र्यधीशः
03050052 यथा ससर्जाग्र इदं निरीहः ।संस्थाप्य वृत्तिं जगतो विधत्ते
03050061 यथा पुनः स्वे ख इदं निवेश्य ।शेते गुहायां स निवृत्त-वृत्तिः
03050062 योगेश्वराधीश्वर एक एतद् ।अनुप्रविष्टो बहुधा यथासीत्
03050071 क्रीडन् विधत्ते द्विज-गो-सुराणां ।क्षेमाय कर्माण्यवतार-भेदैः
03050072 मनो न तृप्यत्यपि शृण्वतां नः ।सुश्लोक-मौलेश्चरितामृतानि
03050081 यैस्तत्त्व-भेदैरधिलोक-नाथो ।लोकान् अलोकान् सह लोकपालान्
03050082 अचीक्लृपद्यत्र हि सर्व-सत्त्व- ।निकाय-भेदोऽधिकृतः प्रतीतः
03050091 येन प्रजानाम् उत आत्म-कर्म- ।रूपाभिधानां च भिदां व्यधत्त
03050092 नारायणो विश्वसृग् आत्म-योनिर् ।एतच् च नो वर्णय विप्र-वर्य
03050101 परावरेषां भगवन् व्रतानि ।श्रुतानि मे व्यास-मुखादभीक्ष्णम्
03050102 अतृप्नुम क्षुल्ल-सुखावहानां ।तेषाम् ऋते कृष्ण-कथामृतौघात्
03050111 कस्तृप्नुयात् तीर्थ-पदोऽभिधानात् ।सत्रेषु वः सूरिभिरीड्यमानात्
03050112 यः कर्ण-नाडीं पुरुषस्य यातो ।भव-प्रदां गेह-रतिं छिनत्ति
03050121 मुनिर्विवक्षुर्भगवद्-गुणानां ।सखापि ते भारतम् आह कृष्णः
03050122 यस्मिन् नृणां ग्राम्य-सुखानुवादैर् ।मतिर्गृहीता नु हरेः कथायाम्
03050131 सा श्रद्दधानस्य विवर्धमाना ।विरक्तिम् अन्यत्र करोति पुंसः
03050132 हरेः पदानुस्मृति-निर्वृतस्य ।समस्त-दुःखाप्ययम् आशु धत्ते

03050141 ता' छोच्य-शोच्यान् अविदोऽनुशोचे ।हरेः कथायां विमुखान् अघेन
03050142 क्षिणोति देवोऽनिमिषस्तु येषाम् ।आयुर्वृथा-वाद-गति-स्मृतीनाम्
03050151 तदस्य कौषारव शर्म-दातुर् ।हरेः कथाम् एव कथासु सारम्
03050152 उद्धृत्य पुष्पेभ्य इवार्त-बन्धो ।शिवाय नः कीर्तय तीर्थ-कीर्तेः
03050161 स विश्व-जन्म-स्थिति-संयमार्थे ।कृतावतारः प्रगृहीत-शक्तिः
03050162 चकार कर्माण्यतिपूरुषाणि ।यानीश्वरः कीर्तय तानि मह्यम्
0305017 श्री-शुक उवाच
03050171 स एवं भगवान् पृष्टः क्षत्त्रा कौषारवो मुनिः
03050172 पुंसां निःश्रेयसार्थेन तम् आह बहु-मानयन्
0305018 मैत्रेय उवाच
03050181 साधु पृष्टं त्वया साधो लोकान् साध्वनुगृह्णता
03050182 कीर्तिं वितन्वता लोके आत्मनोऽधोक्षजात्मनः
03050191 नैतच् चित्रं त्वयि क्षत्तर्बादरायण-वीर्यजे
03050192 गृहीतोऽनन्य-भावेन यत् त्वया हरिरीश्वरः
03050201 माण्डव्य-शापाद्भगवान् प्रजा-संयमनो यमः
03050202 भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवती-सुतात्
03050211 भवान् भगवतो नित्यं सम्मतः सानुगस्य ह
03050212 यस्य ज्ञानोपदेशाय मादिशद्भगवान् व्रजन्
03050221 अथ ते भगवल्-लीला योग-मायोरुबृंहिताः
03050222 विश्व-स्थित्य्-उद्भवान्तार्था वर्णयाम्यनुपूर्वशः
03050231 भगवान् एक आसेदम् अग्र आत्मात्मनां विभुः
03050232 आत्मेच्छानुगतावात्मा नाना-मत्य्-उपलक्षणः
03050241 स वा एष तदा द्रष्टा नापश्यद्दृश्यम् एकराट्
03050242 मेनेऽसन्तम् इवात्मानं सुप्त-शक्तिरसुप्त-दृक्
03050251 सा वा एतस्य संद्रष्टुः शक्तिः सद्-असद्-आत्मिका
03050252 माया नाम महा-भाग ययेदं निर्ममे विभुः
03050261 काल-वृत्त्या तु मायायां गुण-मय्याम् अधोक्षजः
03050262 पुरुषेणात्म-भूतेन वीर्यम् आधत्त वीर्यवान्
03050271 ततोऽभवन् महत्-तत्त्वम् अव्यक्तात् काल-चोदितात्
03050272 विज्ञानात्मात्म-देह-स्थं विश्वं व्यञ्जंस्तमो-नुदः
03050281 सोऽप्यंश-गुण-कालात्मा भगवद्-दृष्टि-गोचरः
03050282 आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया
03050291 महत्-तत्त्वाद्विकुर्वाणादहं-तत्त्वं व्यजायत
03050292 कार्य-कारण-कर्त्रात्मा भूतेन्द्रिय-मनो-मयः
03050301 वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा
03050302 अहं-तत्त्वाद्विकुर्वाणान् मनो वैकारिकादभूत्
03050303 वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः
03050311 तैजसानीन्द्रियाण्येव ज्ञान-कर्म-मयानि च
03050312 तामसो भूत-सूक्ष्मादिर्यतः खं लिङ्गम् आत्मनः
03050321 काल-मायांश-योगेन भगवद्-वीक्षितं नभः

03050322 नभसोऽनुसृतं स्पर्शं विकुर्वन् निर्ममेऽनिलम्
03050331 अनिलोऽपि विकुर्वाणो नभसोरु-बलान्वितः
03050332 ससर्ज रूप-तन्मात्रं ज्योतिर्लोकस्य लोचनम्
03050341 अनिलेनान्वितं ज्योतिर्विकुर्वत् परवीक्षितम्
03050342 आधत्ताम्भो रस-मयं काल-मायांश-योगतः
03050351 ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वद्ब्रह्म-वीक्षितम्
03050352 महीं गन्ध-गुणाम् आधात् काल-मायांश-योगतः
03050361 भूतानां नभ-आदीनां यद्यद्भव्यावरावरम्
03050362 तेषां परानुसंसर्गाद्यथा सङ्ख्यं गुणान् विदुः
03050371 एते देवाः कला विष्णोः काल-मायांश-लिङ्गिनः
03050372 नानात्वात् स्व-क्रियानीशाः प्रोचुः प्राञ्जलयो विभुम्
0305038 देवा ऊचुः
03050381 नमाम ते देव पदारविन्दं ।प्रपन्न-तापोपशमातपत्रम्
03050382 यन्-मूल-केता यतयोऽञ्जसोरु- ।संसार-दुःखं बहिरुत्क्षिपन्ति
03050391 धातर्यदस्मिन् भव ईश जीवास् ।ताप-त्रयेणाभिहता न शर्म
03050392 आत्मन् लभन्ते भगवंस्तवाङ्घ्रि- ।च्छायां स-विद्याम् अत आश्रयेम
03050401 मार्गन्ति यत् ते मुख-पद्म-नीडैश् ।छन्दः-सुपर्णैरृषयो विविक्ते
03050402 यस्याघ-मर्षोद-सरिद्-वरायाः ।पदं पदं तीर्थ-पदः प्रपन्नाः
03050411 यच् छ्रद्धया श्रुतवत्या च भक्त्या ।सम्मृज्यमाने हृदयेऽवधाय
03050412 ज्ञानेन वैराग्य-बलेन धीरा ।व्रजेम तत् तेऽङ्घ्रि-सरोज-पीठम्
03050421 विश्वस्य जन्म-स्थिति-संयमार्थे ।कृतावतारस्य पदाम्बुजं ते
03050422 व्रजेम सर्वे शरणं यदीश ।स्मृतं प्रयच्छत्यभयं स्व-पुंसाम्
03050431 यत् सानुबन्धेऽसति देह-गेहे ।ममाहम् इत्यूढ-दुराग्रहाणाम्
03050432 पुंसां सुदूरं वसतोऽपि पुर्यां ।भजेम तत् ते भगवन् पदाब्जम्
03050441 तान् वै ह्यसद्-वृत्तिभिरक्षिभिर्ये ।पराहृतान्तर्-मनसः परेश
03050442 अथो न पश्यन्त्युरुगाय नूनं ।ये ते पदन्यास-विलास-लक्ष्म्याः
03050451 पानेन ते देव कथा-सुधायाः ।प्रवृद्ध-भक्त्या विशदाशया ये
03050452 वैराग्य-सारं प्रतिलभ्य बोधं ।यथाञ्जसान्वीयुरकुण्ठ-धिष्ण्यम्
03050461 तथापरे चात्म-समाधि-योग- ।बलेन जित्वा प्रकृतिं बलिष्ठाम्
03050462 त्वाम् एव धीराः पुरुषं विशन्ति ।तेषां श्रमः स्यान् न तु सेवया ते
03050471 तत् ते वयं लोक-सिसृक्षयाद्य ।त्वयानुसृष्टास्त्रिभिरात्मभिः स्म
03050472 सर्वे वियुक्ताः स्व-विहार-तन्त्रं ।न शक्नुमस्तत् प्रतिहर्तवे ते
03050481 यावद्बलिं ते ऽज हराम काले ।यथा वयं चान्नम् अदाम यत्र
03050482 यथोभयेषां त इमे हि लोका ।बलिं हरन्तोऽन्नम् अदन्त्यनूहाः
03050491 त्वं नः सुराणाम् असि सान्वयानां ।कूट-स्थ आद्यः पुरुषः पुराणः
03050492 त्वं देव शक्त्यां गुण-कर्म-योनौ ।रेतस्त्वजायां कविम् आदधे ऽजः
03050501 ततो वयं मत्-प्रमुखा यद्-अर्थे ।बभूविमात्मन् करवाम किं ते
03050502 त्वं नः स्व-चक्षुः परिदेहि शक्त्या ।देव क्रियार्थे यद्-अनुग्रहाणाम्

Chapter 6

0306001 ऋषिरुवाच
03060011 इति तासां स्व-शक्तीनां सतीनाम् असमेत्य सः
03060012 प्रसुप्त-लोक-तन्त्राणां निशाम्य गतिम् ईश्वरः
03060021 काल-सञ्ज्ञां तदा देवीं बिभ्रच्-छक्तिम् उरुक्रमः
03060022 त्रयोविंशति तत्त्वानां गणं युगपदाविशत्
03060031 सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम्
03060032 भिन्नं संयोजयाम् आस सुप्तं कर्म प्रबोधयन्
03060041 प्रबुद्ध-कर्म दैवेन त्रयोविंशतिको गणः
03060042 प्रेरितो ऽजनयत् स्वाभिर्मात्राभिरधिपूरुषम्
03060051 परेण विशता स्वस्मिन् मात्रया विश्व-सृग्-गणः
03060052 चुक्षोभान्योन्यम् आसाद्य यस्मिन् लोकाश्चराचराः
03060061 हिरण्मयः स पुरुषः सहस्र-परिवत्सरान्
03060062 आण्ड-कोश उवासाप्सु सर्व-सत्त्वोपबृंहितः
03060071 स वै विश्व-सृजां गर्भो देव-कर्मात्म-शक्तिमान्
03060072 विबभाजात्मनात्मानम् एकधा दशधा त्रिधा
03060081 एष ह्यशेष-सत्त्वानाम् आत्मांशः परमात्मनः
03060082 आद्योऽवतारो यत्रासौ भूत-ग्रामो विभाव्यते
03060091 साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा
03060092 विराट् प्राणो दश-विध एकधा हृदयेन च
03060101 स्मरन् विश्व-सृजाम् ईशो विज्ञापितम् अधोक्षजः
03060102 विराजम् अतपत् स्वेन तेजसैषां विवृत्तये
03060111 अथ तस्याभितप्तस्य कतिधायतनानि ह
03060112 निरभिद्यन्त देवानां तानि मे गदतः शृणु
03060121 तस्याग्निरास्यं निर्भिन्नं लोक-पालोऽविशत् पदम्
03060122 वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते
03060131 निर्भिन्नं तालु वरुणो लोक-पालोऽविशद्धरेः
03060132 जिह्वयांशेन च रसं ययासौ प्रतिपद्यते
03060141 निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम्

03060142 घ्राणेनांशेन गन्धस्य प्रतिपत्तिर्यतो भवेत्
03060151 निर्भिन्ने अक्षिणी त्वष्टा लोक-पालोऽविशद्विभोः
03060152 चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत्
03060161 निर्भिन्नान्यस्य चर्माणि लोक-पालोऽनिलोऽविशत्
03060162 प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते
03060171 कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः
03060172 श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते
03060181 त्वचम् अस्य विनिर्भिन्नां विविशुर्धिष्ण्यम् ओषधीः
03060182 अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते
03060191 मेढ्रं तस्य विनिर्भिन्नं स्व-धिष्ण्यं क उपाविशत्
03060192 रेतसांशेन येनासावानन्दं प्रतिपद्यते
03060201 गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत्
03060202 पायुनांशेन येनासौ विसर्गं प्रतिपद्यते
03060211 हस्तावस्य विनिर्भिन्नाविन्द्रः स्वर्-पतिराविशत्
03060212 वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते
03060221 पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत्
03060222 गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते
03060231 बुद्धिं चास्य विनिर्भिन्नां वाग्-ईशो धिष्ण्यम् आविशत्
03060232 बोधेनांशेन बोद्धव्यम् प्रतिपत्तिर्यतो भवेत्
03060241 हृदयं चास्य निर्भिन्नं चन्द्रमा धिष्ण्यम् आविशत्
03060242 मनसांशेन येनासौ विक्रियां प्रतिपद्यते
03060251 आत्मानं चास्य निर्भिन्नम् अभिमानोऽविशत् पदम्
03060252 कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते
03060261 सत्त्वं चास्य विनिर्भिन्नं महान् धिष्ण्यम् उपाविशत्
03060262 चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते
03060271 शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत
03060272 गुणानां वृत्तयो येषु प्रतीयन्ते सुरादयः
03060281 आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे
03060282 धरां रजः-स्वभावेन पणयो ये च तान् अनु
03060291 तार्तीयेन स्वभावेन भगवन्-नाभिम् आश्रिताः
03060292 उभयोरन्तरं व्योम ये रुद्र-पार्षदां गणाः
03060301 मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह
03060302 यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद्ब्राह्मणो गुरुः
03060311 बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः
03060312 यो जातस्त्रायते वर्णान् पौरुषः कण्टक-क्षतात्
03060321 विशोऽवर्तन्त तस्योर्वोर्लोक-वृत्तिकरीर्विभोः
03060322 वैश्यस्तद्-उद्भवो वार्तां नृणां यः समवर्तयत्
03060331 पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्म-सिद्धये
03060332 तस्यां जातः पुरा शूद्रो यद्-वृत्त्या तुष्यते हरिः

03060341 एते वर्णाः स्व-धर्मेण यजन्ति स्व-गुरुं हरिम्
03060342 श्रद्धयात्म-विशुद्ध्य्-अर्थं यज्-जाताः सह वृत्तिभिः
03060351 एतत् क्षत्तर्भगवतो दैव-कर्मात्म-रूपिणः
03060352 कः श्रद्दध्यादुपाकर्तुं योगमाया-बलोदयम्
03060361 तथापि कीर्तयाम्यङ्ग यथा-मति यथा-श्रुतम्
03060362 कीर्तिं हरेः स्वां सत्-कर्तुं गिरम् अन्याभिधासतीम्
03060371 एकान्त-लाभं वचसो नु पुंसां ।सुश्लोक-मौलेर्गुण-वादम् आहुः
03060372 श्रुतेश्च विद्वद्भिरुपाकृतायां ।कथा-सुधायाम् उपसम्प्रयोगम्
03060381 आत्मनोऽवसितो वत्स महिमा कविनादिना
03060382 संवत्सर-सहस्रान्ते धिया योग-विपक्कया
03060391 अतो भगवतो माया मायिनाम् अपि मोहिनी
03060392 यत् स्वयं चात्म-वर्त्मात्मा न वेद किम् उतापरे
03060401 यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह
03060402 अहं चान्य इमे देवास्तस्मै भगवते नमः

Chapter 7

0307001 श्री-शुक उवाच
03070011 एवं ब्रुवाणं मैत्रेयं द्वैपायन-सुतो बुधः
03070012 प्रीणयन्न् इव भारत्या विदुरः प्रत्यभाषत
0307002 विदुर उवाच
03070021 ब्रह्मन् कथं भगवतश्चिन्-मात्रस्याविकारिणः
03070022 लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः
03070031 क्रीडायाम् उद्यमोऽर्भस्य कामश्चिक्रीडिषान्यतः
03070032 स्वतस्-तृप्तस्य च कथं निवृत्तस्य सदान्यतः
03070041 अस्राक्षीद्भगवान् विश्वं गुण-मय्यात्म-मायया
03070042 तया संस्थापयत्येतद्भूयः प्रत्यपिधास्यति
03070051 देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः
03070052 अविलुप्तावबोधात्मा स युज्येताजया कथम्
03070061 भगवान् एक एवैष सर्व-क्षेत्रेष्ववस्थितः
03070062 अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः
03070071 एतस्मिन् मे मनो विद्वन् खिद्यते ज्ञान-सङ्कटे
03070072 तन् नः पराणुद विभो कश्मलं मानसं महत्
0307008 श्री-शुक उवाच
03070081 स इत्थं चोदितः क्षत्त्रा तत्त्व-जिज्ञासुना मुनिः
03070082 प्रत्याह भगवच्-चित्तः स्मयन्न् इव गत-स्मयः
0307009 मैत्रेय उवाच
03070091 सेयं भगवतो माया यन् नयेन विरुध्यते
03070092 ईश्वरस्य विमुक्तस्य कार्पण्यम् उत बन्धनम्
03070101 यदर्थेन विनामुष्य पुंस आत्म-विपर्ययः
03070102 प्रतीयत उपद्रष्टुः स्व-शिरश्छेदनादिकः
03070111 यथा जले चन्द्रमसः कम्पादिस्तत्-कृतो गुणः
03070112 दृश्यतेऽसन्न् अपि द्रष्टुरात्मनोऽनात्मनो गुणः
03070121 स वै निवृत्ति-धर्मेण वासुदेवानुकम्पया
03070122 भगवद्-भक्ति-योगेन तिरोधत्ते शनैरिह

03070131 यदेन्द्रियोपरामोऽथ द्रष्ट्रात्मनि परे हरौ
03070132 विलीयन्ते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः
03070141 अशेष-सङ्क्लेश-शमं विधत्ते ।गुणानुवाद-श्रवणं मुरारेः
03070142 किं वा पुनस्तच्-चरणारविन्द- ।पराग-सेवा-रतिरात्म-लब्धा
0307015 विदुर उवाच
03070151 सञ्छिन्नः संशयो मह्यं तव सूक्तासिना विभो
03070152 उभयत्रापि भगवन् मनो मे सम्प्रधावति
03070161 साध्वेतद्व्याहृतं विद्वन् नात्म-मायायनं हरेः
03070162 आभात्यपार्थं निर्मूलं विश्व-मूलं न यद्बहिः
03070171 यश्च मूढतमो लोके यश्च बुद्धेः परं गतः
03070172 तावुभौ सुखम् एधेते क्लिश्यत्यन्तरितो जनः
03070181 अर्थाभावं विनिश्चित्य प्रतीतस्यापि नात्मनः
03070182 तां चापि युष्मच्-चरण- सेवयाहं पराणुदे
03070191 यत्-सेवया भगवतः कूट-स्थस्य मधु-द्विषः
03070192 रति-रासो भवेत् तीव्रः पादयोर्व्यसनार्दनः
03070201 दुरापा ह्यल्प-तपसः सेवा वैकुण्ठ-वर्त्मसु
03070202 यत्रोपगीयते नित्यं देव-देवो जनार्दनः
03070211 सृष्ट्वाग्रे महद्-आदीनि स-विकाराण्यनुक्रमात्
03070212 तेभ्यो विराजम् उद्धृत्य तम् अनु प्राविशद्विभुः
03070221 यम् आहुराद्यं पुरुषं सहस्राङ्घ्र्य्-ऊरु-बाहुकम्
03070222 यत्र विश्व इमे लोकाः स-विकाशं त आसते
03070231 यस्मिन् दश-विधः प्राणः सेन्द्रियार्थेन्द्रियस्त्रि-वृत्
03070232 त्वयेरितो यतो वर्णास्तद्-विभूतीर्वदस्व नः
03070241 यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः
03070242 प्रजा विचित्राकृतय आसन् याभिरिदं ततम्
03070251 प्रजापतीनां स पतिश्चक्लृपे कान् प्रजापतीन्
03070252 सर्गांश्चैवानुसर्गांश्च मनून् मन्वन्तराधिपान्
+03070261 एतेषाम् अपि वेदांश्च वंशानुचरितानि च ।
03070262 उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते
03070271 तेषां संस्थां प्रमाणं च भूर्-लोकस्य च वर्णय
03070272 तिर्यङ्-मानुष-देवानां सरीसृप-पतत्त्रिणाम्
03070273 वद नः सर्ग-संव्यूहं गार्भ-स्वेद-द्विजोद्भिदाम्
03070281 गुणावतारैर्विश्वस्य सर्ग-स्थित्य्-अप्ययाश्रयम्
03070282 सृजतः श्रीनिवासस्य व्याचक्ष्वोदार-विक्रमम्
03070291 वर्णाश्रम-विभागांश्च रूप-शील-स्वभावतः
03070292 ऋषीणां जन्म-कर्माणि वेदस्य च विकर्षणम्
03070301 यज्ञस्य च वितानानि योगस्य च पथः प्रभो
03070302 नैष्कर्म्यस्य च साङ्ख्यस्य तन्त्रं वा भगवत्-स्मृतम्
03070311 पाषण्ड-पथ-वैषम्यं प्रतिलोम-निवेशनम्

03070312 जीवस्य गतयो याश्च यावतीर्गुण-कर्मजाः
03070321 धर्मार्थ-काम-मोक्षाणां निमित्तान्यविरोधतः
03070322 वार्ताया दण्ड-नीतेश्च श्रुतस्य च विधिं पृथक्
03070331 श्राद्धस्य च विधिं ब्रह्मन् पित्-णां सर्गम् एव च
03070332 ग्रह-नक्षत्र-ताराणां कालावयव-संस्थितिम्
03070341 दानस्य तपसो वापि यच् चेष्टा-पूर्तयोः फलम्
03070342 प्रवास-स्थस्य यो धर्मो यश्च पुंस उतापदि
03070351 येन वा भगवांस्तुष्येद्धर्म-योनिर्जनार्दनः
03070352 सम्प्रसीदति वा येषाम् एतदाख्याहि मेऽनघ
03070361 अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम
03070362 अनापृष्टम् अपि ब्रूयुर्गुरवो दीन-वत्सलाः
03070371 तत्त्वानां भगवंस्तेषां कतिधा प्रतिसङ्क्रमः
03070372 तत्रेमं क उपासीरन् क उ स्विदनुशेरते
03070381 पुरुषस्य च संस्थानं स्वरूपं वा परस्य च
03070382 ज्ञानं च नैगमं यत् तद्गुरु-शिष्य-प्रयोजनम्
03070391 निमित्तानि च तस्येह प्रोक्तान्यनघ-सूरिभिः
03070392 स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यम् एव वा
03070401 एतान् मे पृच्छतः प्रश्नान् हरेः कर्म-विवित्सया
03070402 ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्ट-चक्षुषः
03070411 सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ
03070412 जीवाभय-प्रदानस्य न कुर्वीरन् कलाम् अपि
0307042 श्री-शुक उवाच
03070421 स इत्थम् आपृष्ट-पुराण-कल्पः ।कुरु-प्रधानेन मुनि-प्रधानः
03070422 प्रवृद्ध-हर्षो भगवत्-कथायां ।सञ्चोदितस्तं प्रहसन्न् इवाह

Chapter 8

0308001 मैत्रेय उवाच
03080011 सत्-सेवनीयो बत पूरु-वंशो । यल् लोक-पालो भगवत्-प्रधानः
03080012 बभूविथेहाजित-कीर्ति-मालां । पदे पदे नूतनयस्यभीक्ष्णम्
03080021 सोऽहं नृणां क्षुल्ल-सुखाय दुःखं । महद्गतानां विरमाय तस्य
03080022 प्रवर्तये भागवतं पुराणं । यदाह साक्षाद्भगवान् ऋषिभ्यः
03080031 आसीनम् उर्व्यां भगवन्तम् आद्यं । सङ्कर्षणं देवम् अकुण्ठ-सत्त्वम्
03080032 विवित्सवस्तत्त्वम् अतः परस्य । कुमार-मुख्या मुनयोऽन्वपृच्छन्
03080041 स्वम् एव धिष्ण्यं बहु मानयन्तं । यद्वासुदेवाभिधम् आमनन्ति
03080042 प्रत्यग्-धृताक्षाम्बुज-कोशम् ईषद् । उन्मीलयन्तं विबुधोदयाय
03080051 स्वर्धुन्य्-उदार्द्रैः स्व-जटा-कलापैर् । उपस्पृशन्तश्चरणोपधानम्
03080052 पद्मं यदर्चन्त्यहि-राज-कन्याः । स-प्रेम नाना-बलिभिर्वरार्थाः
03080061 मुहुर्गृणन्तो वचसानुराग- । स्खलत्-पदेनास्य कृतानि तज्-ज्ञाः
03080062 किरीट-साहस्र-मणि-प्रवेक- । प्रद्योतितोद्दाम-फणा-सहस्रम्
03080071 प्रोक्तं किलैतद्भगवत्तमेन । निवृत्ति-धर्माभिरताय तेन
03080072 सनत्-कुमाराय स चाह पृष्टः । साङ्ख्यायनायाङ्ग धृत-व्रताय
03080081 साङ्ख्यायनः पारमहंस्य-मुख्यो । विवक्षमाणो भगवद्-विभूतीः
03080082 जगाद सोऽस्मद्-गुरवेऽन्विताय । पराशरायाथ बृहस्पतेश्च
03080091 प्रोवाच मह्यं स दयालुरुक्तो । मुनिः पुलस्त्येन पुराणम् आद्यम्
03080092 सोऽहं तवैतत् कथयामि वत्स । श्रद्धालवे नित्यम् अनुव्रताय
03080101 उदाप्लुतं विश्वम् इदं तदासीद् । यन् निद्रयामीलित-दृङ् न्यमीलयत्
03080102 अहीन्द्र-तल्पेऽधिशयान एकः । कृत-क्षणः स्वात्म-रतौ निरीहः
03080111 सोऽन्तः शरीरेऽर्पित-भूत-सूक्ष्मः । कालात्मिकां शक्तिम् उदीरयाणः
03080112 उवास तस्मिन् सलिले पदे स्वे । यथानलो दारुणि रुद्ध-वीर्यः
03080121 चतुर्-युगानां च सहस्रम् अप्सु । स्वपन् स्वयोदीरितया स्व-शक्त्या
03080122 कालाख्ययासादित-कर्म-तन्त्रो । लोकान् अपीतान् ददृशे स्व-देहे
03080131 तस्यार्थ-सूक्ष्माभिनिविष्ट-दृष्टेर् । अन्तर्-गतोऽर्थो रजसा तनीयान्
03080132 गुणेन कालानुगतेन विद्धः । सूष्यंस्तदाभिद्यत नाभि-देशात्
03080141 स पद्म-कोशः सहसोदतिष्ठत् । कालेन कर्म-प्रतिबोधनेन

03080142 स्व-रोचिषा तत् सलिलं विशालं ।विद्योतयन्न् अर्क इवात्म-योनिः
03080151 तल् लोक-पद्मं स उ एव विष्णुः ।प्रावीविशत् सर्व-गुणावभासम्
03080152 तस्मिन् स्वयं वेदमयो विधाता ।स्वयम्भुवं यं स्म वदन्ति सोऽभूत्
03080161 तस्यां स चाम्भो-रुह-कर्णिकायाम् ।अवस्थितो लोकम् अपश्यमानः
03080162 परिक्रमन् व्योम्नि विवृत्त-नेत्रश् ।चत्वारि लेभेऽनुदिशं मुखानि
03080171 तस्माद्युगान्त-श्वसनावघूर्ण- ।जलोर्मि-चक्रात् सलिलाद्विरूढम्
03080172 उपाश्रितः कञ्जम् उ लोक-तत्त्वं ।नात्मानम् अद्धाविददादि-देवः
03080181 क एष योऽसावहम् अब्ज-पृष्ठ ।एतत् कुतो वाब्जम् अनन्यदप्सु
03080182 अस्ति ह्यधस्तादिह किञ्चनैतद् ।अधिष्ठितं यत्र सता नु भाव्यम्
03080191 स इत्थम् उद्वीक्ष्य तद्-अब्ज-नाल- ।नाडीभिरन्तर्-जलम् आविवेश
03080192 नार्वाग्-गतस्तत्-खर-नाल-नाल- ।नाभिं विचिन्वंस्तदविन्दताजः
03080201 तमस्यपारे विदुरात्म-सर्गं ।विचिन्वतोऽभूत् सुमहांस्त्रि-णेमिः
03080202 यो देह-भाजां भयम् ईरयाणः ।परिक्षिणोत्यायुरजस्य हेतिः
03080211 ततो निवृत्तोऽप्रतिलब्ध-कामः ।स्व-धिष्ण्यम् आसाद्य पुनः स देवः
03080212 शनैर्जित-श्वास-निवृत्त-चित्तो ।न्यषीददारूढ-समाधि-योगः
03080221 कालेन सो ज्ञः पुरुषायुषाभि- ।प्रवृत्त-योगेन विरूढ-बोधः
03080222 स्वयं तदन्तर्-हृदयेऽवभातम् ।अपश्यतापश्यत यन् न पूर्वम्
03080231 मृणाल-गौरायत-शेष-भोग- ।पर्यङ्क एकं पुरुषं शयानम्
03080232 फणातपत्रायुत-मूर्ध-रत्न- ।द्युभिर्हत-ध्वान्त-युगान्त-तोये
03080241 प्रेक्षां क्षिपन्तं हरितोपलाद्रेः ।सन्ध्याभ्र-नीवेरुरु-रुक्म-मूर्ध्नः
03080242 रत्नोदधारौषधि-सौमनस्य ।वन-स्रजो वेणु-भुजाङ्घ्रिपाङ्घ्रेः
03080251 आयामतो विस्तरतः स्व-मान- ।देहेन लोक-त्रय-सङ्ग्रहेण
03080252 विचित्र-दिव्याभरणांशुकानां ।कृत-श्रियापाश्रित-वेष-देहम्
03080261 पुंसां स्व-कामाय विविक्त-मार्गैर् ।अभ्यर्चतां काम-दुघाङ्घ्रि-पद्मम्
03080262 प्रदर्शयन्तं कृपया नखेन्दु- ।मयूख-भिन्नाङ्गुलि-चारु-पत्रम्
03080271 मुखेन लोकार्ति-हर-स्मितेन ।परिस्फुरत्-कुण्डल-मण्डितेन
03080272 शोणायितेनाधर-बिम्ब-भासा ।प्रत्यर्हयन्तं सुनसेन सुभ्र्वा
03080281 कदम्ब-किञ्जल्क-पिशङ्ग-वाससा ।स्वलङ्कृतं मेखलया नितम्बे
03080282 हारेण चानन्त-धनेन वत्स ।श्रीवत्स-वक्षः-स्थल-वल्लभेन
03080291 परार्ध्य-केयूर-मणि-प्रवेक- ।पर्यस्त-दोर्दण्ड-सहस्र-शाखम्
03080292 अव्यक्त-मूलं भुवनाङ्घ्रिपेन्द्रम् ।अहीन्द्र-भोगैरधिवीत-वल्शम्
03080301 चराचरौको भगवन्-महीध्रम् ।अहीन्द्र-बन्धुं सलिलोपगूढम्
03080302 किरीट-साहस्र-हिरण्य-शृङ्गम् ।आविर्भवत् कौस्तुभ-रत्न-गर्भम्
03080311 निवीतम् आम्नाय-मधु-व्रत-श्रिया ।स्व-कीर्ति-मय्या वन-मालया हरिम्
03080312 सूर्येन्दु-वाय्व्-अग्न्य्-अगमं त्रि-धामभिः ।परिक्रमत्-प्राधनिकैर्दुरासदम्
03080321 तर्ह्येव तन्-नाभि-सरः-सरोजम् ।आत्मानम् अम्भः श्वसनं वियच् च
03080322 ददर्श देवो जगतो विधाता ।नातः परं लोक-विसर्ग-दृष्टिः
03080331 स कर्म-बीजं रजसोपरक्तः ।प्रजाः सिसृक्षन्न् इयदेव दृष्ट्वा
03080332 अस्तौद्विसर्गाभिमुखस्तम् ईड्यम् ।अव्यक्त-वर्त्मन्यभिवेशितात्मा

Chapter 9

0309001 ब्रह्मोवाच
03090011 ज्ञातोऽसि मेऽद्य सुचिरान् ननु देह-भाजां
03090012 न ज्ञायते भगवतो गतिरित्यवद्यम्
03090013 नान्यत् त्वदस्ति भगवन्न् अपि तन् न शुद्धं
03090014 माया-गुण-व्यतिकराद्यदुरुर्विभासि
03090021 रूपं यदेतदवबोध-रसोदयेन
03090022 शश्वन्-निवृत्त-तमसः सद्-अनुग्रहाय
03090023 आदौ गृहीतम् अवतार-शतैक-बीजं
03090024 यन्-नाभि-पद्म-भवनादहम् आविरासम्
03090031 नातः परं परम यद्भवतः स्वरूपम्
03090032 आनन्द-मात्रम् अविकल्पम् अविद्ध-वर्चः
03090033 पश्यामि विश्व-सृजम् एकम् अविश्वम् आत्मन्
03090034 भूतेन्द्रियात्मक-मदस्त उपाश्रितोऽस्मि
03090041 तद्वा इदं भुवन-मङ्गल मङ्गलाय
03090042 ध्याने स्म नो दर्शितं त उपासकानाम्
03090043 तस्मै नमो भगवतेऽनुविधेम तुभ्यं
03090044 योऽनादृतो नरक-भाग्भिरसत्-प्रसङ्गैः
03090051 ये तु त्वदीय-चरणाम्बुज-कोश-गन्धं
03090052 जिघ्रन्ति कर्ण-विवरैः श्रुति-वात-नीतम्
03090053 भक्त्या गृहीत-चरणः परया च तेषां
03090054 नापैषि नाथ हृदयाम्बुरुहात् स्व-पुंसाम्
03090061 तावद्भयं द्रविण-देह-सुहृन्-निमित्तं
03090062 शोकः स्पृहा परिभवो विपुलश्च लोभः
03090063 तावन् ममेत्यसद्-अवग्रह आर्ति-मूलं
03090064 यावन् न तेऽङ्घ्रिम् अभयं प्रवृणीत लोकः
03090071 दैवेन ते हत-धियो भवतः प्रसङ्गात्
03090072 सर्वाशुभोपशमनाद्विमुखेन्द्रिया ये
03090073 कुर्वन्ति काम-सुख-लेश-लवाय दीना

03090074 लोभाभिभूत-मनसोऽकुशलानि शश्वत्
03090081 क्षुत्-तृट्-त्रिधातुभिरिमा मुहुरर्द्यमानाः
03090082 शीतोष्ण-वात-वरषैरितरेतराच् च
03090083 कामाग्निनाच्युत-रुषा च सुदुर्भरेण
03090084 सम्पश्यतो मन उरुक्रम सीदते मे
03090091 यावत् पृथक्त्वम् इदम् आत्मन इन्द्रियार्थ-
03090092 माया-बलं भगवतो जन ईश पश्येत्
03090093 तावन् न संसृतिरसौ प्रतिसङ्क्रमेत
03090094 व्यर्थापि दुःख-निवहं वहती क्रियार्था
03090101 अह्न्यापृतार्त-करणा निशि निःशयाना
03090102 नाना-मनोरथ-धिया क्षण-भग्न-निद्राः
03090103 दैवाहतार्थ-रचना ऋषयोऽपि देव
03090104 युष्मत्-प्रसङ्ग-विमुखा इह संसरन्ति
03090111 त्वं भक्ति-योग-परिभावित-हृत्-सरोज
03090112 आस्से श्रुतेक्षित-पथो ननु नाथ पुंसाम्
03090113 यद्-यद्-धिया त उरुगाय विभावयन्ति
03090114 तत्-तद्-वपुः प्रणयसे सद्-अनुग्रहाय
03090121 नातिप्रसीदति तथोपचितोपचारैर्
03090122 आराधितः सुर-गणैर्हृदि बद्ध-कामैः
03090123 यत् सर्व-भूत-दययासद्-अलभ्ययैको
03090124 नाना-जनेष्ववहितः सुहृदन्तर्-आत्मा
03090131 पुंसाम् अतो विविध-कर्मभिरध्वराद्यैर्
03090132 दानेन चोग्र-तपसा परिचर्यया च
03090133 आराधनं भगवतस्तव सत्-क्रियार्थो
03090134 धर्मोऽर्पितः कर्हिचिद्म्रियते न यत्र
03090141 शश्वत् स्वरूप-महसैव निपीत-भेद-
03090142 मोहाय बोध-धिषणाय नमः परस्मै
03090143 विश्वोद्भव-स्थिति-लयेषु निमित्त-लीला-
03090144 रासाय ते नम इदं चकृमेश्वराय
03090151 यस्यावतार-गुण-कर्म-विडम्बनानि
03090152 नामानि येऽसु-विगमे विवशा गृणन्ति
03090153 तेऽनैक-जन्म-शमलं सहसैव हित्वा
03090154 संयान्त्यपावृतामृतं तम् अजं प्रपद्ये
03090161 यो वा अहं च गिरिशश्च विभुः स्वयं च
03090162 स्थित्य्-उद्भव-प्रलय-हेतव आत्म-मूलम्
03090163 भित्त्वा त्रि-पाद्ववृध एक उरु-प्ररोहस्
03090164 तस्मै नमो भगवते भुवन-द्रुमाय
03090171 लोको विकर्म-निरतः कुशले प्रमत्तः
03090172 कर्मण्ययं त्वद्-उदिते भवद्-अर्चने स्वे

03090173 यस्तावदस्य बलवान् इह जीविताशां
03090174 सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै
03090181 यस्माद्बिभेम्यहम् अपि द्विपरार्ध-धिष्ण्यम्
03090182 अध्यासितः सकल-लोक-नमस्कृतं यत्
03090183 तेपे तपो बहु-सवोऽवरुरुत्समानस्
03090184 तस्मै नमो भगवतेऽधिमखाय तुभ्यम्
03090191 तिर्यङ्-मनुष्य-विबुधादिषु जीव-योनिष्व्
03090192 आत्मेच्छयात्म-कृत-सेतु-परीप्सया यः
03090193 रेमे निरस्त-विषयोऽप्यवरुद्ध-देहस्
03090194 तस्मै नमो भगवते पुरुषोत्तमाय
03090201 योऽविद्ययानुपहतोऽपि दशार्ध-वृत्त्या
03090202 निद्राम् उवाह जठरी-कृत-लोक-यात्रः
03090203 अन्तर्-जलेऽहि-कशिपु-स्पर्शानुकूलां
03090204 भीमोर्मि-मालिनि जनस्य सुखं विवृण्वन्
03090211 यन्-नाभि-पद्म-भवनादहम् आसम् ईड्य
03090212 लोक-त्रयोपकरणो यद्-अनुग्रहेण
03090213 तस्मै नमस्त उदर-स्थ-भवाय योग-
03090214 निद्रावसान-विकसन्-नलिनेक्षणाय
03090221 सोऽयं समस्त-जगतां सुहृदेक आत्मा
03090222 सत्त्वेन यन् मृडयते भगवान् भगेन
03090223 तेनैव मे दृशम् अनुस्पृशताद्यथाहं
03090224 स्रक्ष्यामि पूर्ववदिदं प्रणत-प्रियोऽसौ
03090231 एष प्रपन्न-वरदो रमयात्म-शक्त्या
03090232 यद्यत् करिष्यति गृहीत-गुणावतारः
03090233 तस्मिन् स्व-विक्रमम् इदं सृजतोऽपि चेतो
03090234 युञ्जीत कर्म-शमलं च यथा विजह्याम्
03090241 नाभि-ह्रदादिह सतोऽम्भसि यस्य पुंसो
03090242 विज्ञान-शक्तिरहम् आसम् अनन्त-शक्तेः
03090243 रूपं विचित्रम् इदम् अस्य विवृण्वतो मे
03090244 मा रीरिषीष्ट निगमस्य गिरां विसर्गः
03090251 सोऽसावदभ्र-करुणो भगवान् विवृद्ध-
03090252 प्रेम-स्मितेन नयनाम्बुरुहं विजृम्भन्
03090253 उत्थाय विश्व-विजयाय च नो विषादं
03090254 माध्व्या गिरापनयतात् पुरुषः पुराणः
0309026 मैत्रेय उवाच
03090261 स्व-सम्भवं निशाम्यैवं तपो-विद्या-समाधिभिः
03090262 यावन् मनो-वचः स्तुत्वा विरराम स खिन्नवत्
03090271 अथाभिप्रेतम् अन्वीक्ष्य ब्रह्मणो मधुसूदनः
03090272 विषण्ण-चेतसं तेन कल्प-व्यतिकराम्भसा
03090281 लोक-संस्थान-विज्ञान आत्मनः परिखिद्यतः

03090282 तम् आहागाधया वाचा कश्मलं शमयन्न् इव
0309029 श्री-भगवान् उवाच
03090291 मा वेद-गर्भ गास्तन्द्रीं सर्ग उद्यमम् आवह
03090292 तन् मयापादितं ह्यग्रे यन् मां प्रार्थयते भवान्
03090301 भूयस्त्वं तप आतिष्ठ विद्यां चैव मद्-आश्रयाम्
03090302 ताभ्याम् अन्तर्-हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान्
03090311 तत आत्मनि लोके च भक्ति-युक्तः समाहितः
03090312 द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वम् आत्मनः
03090321 यदा तु सर्व-भूतेषु दारुष्वग्निम् इव स्थितम्
03090322 प्रतिचक्षीत मां लोको जह्यात् तर्ह्येव कश्मलम्
03090331 यदा रहितम् आत्मानं भूतेन्द्रिय-गुणाशयैः
03090332 स्वरूपेण मयोपेतं पश्यन् स्वाराज्यम् ऋच्छति
03090341 नाना-कर्म-वितानेन प्रजा बह्वीः सिसृक्षतः
03090342 नात्मावसीदत्यस्मिंस्ते वर्षीयान् मद्-अनुग्रहः
03090351 ऋषिम् आद्यं न बध्नाति पापीयांस्त्वां रजो-गुणः
03090352 यन् मनो मयि निर्बद्धं प्रजाः संसृजतोऽपि ते
03090361 ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम्
03090362 यन् मां त्वं मन्यसेऽयुक्तं भूतेन्द्रिय-गुणात्मभिः
03090371 तुभ्यं मद्-विचिकित्सायाम् आत्मा मे दर्शितोऽबहिः
03090372 नालेन सलिले मूलं पुष्करस्य विचिन्वतः
03090381 यच् चकर्थाङ्ग मत्-स्तोत्रं मत्-कथाभ्युदयाङ्कितम्
03090382 यद्वा तपसि ते निष्ठा स एष मद्-अनुग्रहः
03090391 प्रीतोऽहम् अस्तु भद्रं ते लोकानां विजयेच्छया
03090392 यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन्
03090401 य एतेन पुमान् नित्यं स्तुत्वा स्तोत्रेण मां भजेत्
03090402 तस्याशु सम्प्रसीदेयं सर्व-काम-वरेश्वरः
03090411 पूर्तेन तपसा यज्ञैर्दानैर्योग-समाधिना
03090412 राद्धं निःश्रेयसं पुंसां मत्-प्रीतिस्तत्त्वविन्-मतम्
03090421 अहम् आत्मात्मनां धातः प्रेष्ठः सन् प्रेयसाम् अपि
03090422 अतो मयि रतिं कुर्याद्देहादिर्यत्-कृते प्रियः
03090431 सर्व-वेद-मयेनेदम् आत्मनात्मात्म-योनिना
03090432 प्रजाः सृज यथा-पूर्वं याश्च मय्यनुशेरते
0309044 मैत्रेय उवाच
03090441 तस्मा एवं जगत्-स्रष्ट्रे प्रधान-पुरुषेश्वरः
03090442 व्यज्येदं स्वेन रूपेण कञ्ज-नाभस्तिरोदधे

Chapter 10

0310001 विदुर उवाच
03100011 अन्तर्हिते भगवति ब्रह्मा लोक-पितामहः
03100012 प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः
03100021 ये च मे भगवन् पृष्टास्त्वय्यर्था बहुवित्तम
03100022 तान् वदस्वानुपूर्व्येण छिन्धि नः सर्व-संशयान्
0310003 सूत उवाच
03100031 एवं सञ्चोदितस्तेन क्षत्त्रा कौषारविर्मुनिः
03100032 प्रीतः प्रत्याह तान् प्रश्नान् हृदि-स्थान् अथ भार्गव
0310004 मैत्रेय उवाच
03100041 विरिञ्चोऽपि तथा चक्रे दिव्यं वर्ष-शतं तपः
03100042 आत्मन्यात्मानम् आवेश्य यथाह भगवान् अजः
03100051 तद्विलोक्याब्ज-सम्भूतो वायुना यद्-अधिष्ठितः
03100052 पद्मम् अम्भश्च तत्-काल- कृत-वीर्येण कम्पितम्
03100061 तपसा ह्येधमानेन विद्यया चात्म-संस्थया
03100062 विवृद्ध-विज्ञान-बलो न्यपाद्वायुं सहाम्भसा
03100071 तद्विलोक्य वियद्-व्यापि पुष्करं यद्-अधिष्ठितम्
03100072 अनेन लोकान् प्राग्-लीनान् कल्पितास्मीत्यचिन्तयत्
03100081 पद्म-कोशं तदाविश्य भगवत्-कर्म-चोदितः
03100082 एकं व्यभाङ्क्षीदुरुधा त्रिधा भाव्यं द्वि-सप्तधा
03100091 एतावा' जीव-लोकस्य संस्था-भेदः समाहृतः
03100092 धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ
0310010 विदुर उवाच
03100101 यथात्थ बहु-रूपस्य हरेरद्भुत-कर्मणः
03100102 कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो
0310011 मैत्रेय उवाच
03100111 गुण-व्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः
03100112 पुरुषस्तद्-उपादानम् आत्मानं लीलयासृजत्
03100121 विश्वं वै ब्रह्म-तन्-मात्रं संस्थितं विष्णु-मायया

03100122 ईश्वरेण परिच्छिन्नं कालेनाव्यक्त-मूर्तिना
03100131 यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम्
03100132 सर्गो नव-विधस्तस्य प्राकृतो वैकृतस्तु यः
03100141 काल-द्रव्य-गुणैरस्य त्रि-विधः प्रतिसङ्क्रमः
03100142 आद्यस्तु महतः सर्गो गुण-वैषम्यम् आत्मनः
03100151 द्वितीयस्त्वहमो यत्र द्रव्य-ज्ञान-क्रियोदयः
03100152 भूत-सर्गस्तृतीयस्तु तन्-मात्रो द्रव्य-शक्तिमान्
03100161 चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञान-क्रियात्मकः
03100162 वैकारिको देव-सर्गः पञ्चमो यन्-मयं मनः
03100171 षष्ठस्तु तमसः सर्गो यस्त्वबुद्धि-कृतः प्रभोः
03100172 षडिमे प्राकृताः सर्गा वैकृतान् अपि मे शृणु
03100181 रजो-भाजो भगवतो लीलेयं हरि-मेधसः
03100182 सप्तमो मुख्य-सर्गस्तु षड्-विधस्तस्थुषां च यः
03100191 वनस्पत्य्-ओषधि-लता- त्वक्सारा वीरुधो द्रुमाः
03100192 उत्स्रोतसस्तमः-प्राया अन्तः-स्पर्शा विशेषिणः
03100201 तिरश्चाम् अष्टमः सर्गः सोऽष्टाविंशद्-विधो मतः
03100202 अविदो भूरि-तमसो घ्राण-ज्ञा हृद्यवेदिनः
03100211 गौरजो महिषः कृष्णः सूकरो गवयो रुरुः
03100212 द्वि-शफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम
03100221 खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा
03100222 एते चैक-शफाः क्षत्तः शृणु पञ्च-नखान् पशून्
03100231 श्वा सृगालो वृको व्याघ्रो मार्जारः शश-शल्लकौ
03100232 सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः
03100241 कङ्क-गृध्र-बक-श्येन- भास-भल्लूक-बर्हिणः
03100242 हंस-सारस-चक्राह्व- काकोलूकादयः खगाः
03100251 अर्वाक्-स्रोतस्तु नवमः क्षत्तरेक-विधो नृणाम्
03100252 रजोऽधिकाः कर्म-परा दुःखे च सुख-मानिनः
03100261 वैकृतास्त्रय एवैते देव-सर्गश्च सत्तम
03100262 वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः
03100271 देव-सर्गश्चाष्ट-विधो विबुधाः पितरोऽसुराः
03100272 गन्धर्वाप्सरसः सिद्धा यक्ष-रक्षांसि चारणाः
03100281 भूत-प्रेत-पिशाचाश्च विद्याध्राः किन्नरादयः
03100282 दशैते विदुराख्याताः सर्गास्ते विश्व-सृक्-कृताः
03100291 अतः परं प्रवक्ष्यामि वंशान् मन्वन्तराणि च
03100292 एवं रजः-प्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः
03100293 सृजत्यमोघ-सङ्कल्प आत्मैवात्मानम् आत्मना

Chapter 11

0311001 मैत्रेय उवाच
03110011 चरमः सद्-विशेषाणाम् अनेकोऽसंयुतः सदा
03110012 परमाणुः स विज्ञेयो नृणाम् ऐक्य-भ्रमो यतः
03110021 सत एव पदार्थस्य स्वरूपावस्थितस्य यत्
03110022 कैवल्यं परम-महान् अविशेषो निरन्तरः
03110031 एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम
03110032 संस्थान-भुक्त्या भगवान् अव्यक्तो व्यक्त-भुग् विभुः
03110041 स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्
03110042 सतोऽविशेष-भुग् यस्तु स कालः परमो महान्
03110051 अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः
03110052 जालार्क-रश्म्य्-अवगतः खम् एवानुपतन्न् अगात्
03110061 त्रसरेणु-त्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः
03110062 शत-भागस्तु वेधः स्यात् तैस्त्रिभिस्तु लवः स्मृतः
03110071 निमेषस्त्रि-लवो ज्ञेय आम्नातस्ते त्रयः क्षणः
03110072 क्षणान् पञ्च विदुः काष्ठां लघु ता दश पञ्च च
03110081 लघूनि वै समाम्नाता दश पञ्च च नाडिका
03110082 ते द्वे मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम्
03110091 द्वादशार्ध-पलोन्मानं चतुर्भिश्चतुर्-अङ्गुलैः
03110092 स्वर्ण-माषैः कृत-च्छिद्रं यावत् प्रस्थ-जल-प्लुतम्
03110101 यामाश्चत्वारश्चत्वारो मर्त्यानाम् अहनी उभे
03110102 पक्षः पञ्च-दशाहानि शुक्लः कृष्णश्च मानद
03110111 तयोः समुच्चयो मासः पितॄणां तदहर्-निशम्
03110112 द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि
03110121 अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः
03110122 संवत्सर-शतं न्-णां परमायुर्निरूपितम्
03110131 ग्रहर्क्ष-तारा-चक्र-स्थः परमाण्व्-आदिना जगत्
03110132 संवत्सरावसानेन पर्येत्यनिमिषो विभुः
03110141 संवत्सरः परिवत्सर इडा-वत्सर एव च

03110142 अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते
03110151 यः सृज्य-शक्तिम् उरुधोच्छ्वसयन् स्व-शक्त्या
03110152 पुंसोऽभ्रमाय दिवि धावति भूत-भेदः
03110153 कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्
03110154 तस्मै बलिं हरत वत्सर-पञ्चकाय
0311016 विदुर उवाच
03110161 पितृ-देव-मनुष्याणाम् आयुः परम् इदं स्मृतम्
03110162 परेषां गतिम् आचक्ष्व ये स्युः कल्पाद्बहिर्विदः
03110171 भगवान् वेद कालस्य गतिं भगवतो ननु
03110172 विश्वं विचक्षते धीरा योग-राद्धेन चक्षुषा
0311018 मैत्रेय उवाच
03110181 कृतं त्रेता द्वापरं च कलिश्चेति चतुर्-युगम्
03110182 दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम्
03110191 चत्वारि त्रीणि द्वे चैकं कृतादिषु यथा-क्रमम्
03110192 सङ्ख्यातानि सहस्राणि द्वि-गुणानि शतानि च
03110201 सन्ध्या-सन्ध्यांशयोरन्तर्यः कालः शत-सङ्ख्ययोः
03110202 तम् एवाहुर्युगं तज्-ज्ञा यत्र धर्मो विधीयते
03110211 धर्मश्चतुष्-पान् मनुजान् कृते समनुवर्तते
03110212 स एवान्येष्वधर्मेण व्येति पादेन वर्धता
03110221 त्रि-लोक्या युग-साहस्रं बहिराब्रह्मणो दिनम्
03110222 तावत्येव निशा तात यन् निमीलति विश्व-सृक्
03110231 निशावसान आरब्धो लोक-कल्पोऽनुवर्तते
03110232 यावद्दिनं भगवतो मनून् भुञ्जंश्चतुर्-दश
03110241 स्वं स्वं कालं मनुर्भुङ्क्ते साधिकां ह्येक-सप्ततिम्
03110242 मन्वन्तरेषु मनवस्तद्-वंश्या ऋषयः सुराः
03110243 भवन्ति चैव युगपत् सुरेशाश्चानु ये च तान्
03110251 एष दैनन्-दिनः सर्गो ब्राह्मस्त्रैलोक्य-वर्तनः
03110252 तिर्यङ्-नृ-पितृ-देवानां सम्भवो यत्र कर्मभिः
03110261 मन्वन्तरेषु भगवान् बिभ्रत् सत्त्वं स्व-मूर्तिभिः
03110262 मन्व्-आदिभिरिदं विश्वम् अवत्युदित-पौरुषः
03110271 तमो-मात्राम् उपादाय प्रतिसंरुद्ध-विक्रमः
03110272 कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये
03110281 तम् एवान्वपि धीयन्ते लोका भूर्-आदयस्त्रयः
03110282 निशायाम् अनुवृत्तायां निर्मुक्त-शशि-भास्करम्
03110291 त्रि-लोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना
03110292 यान्त्यूष्मणा महर्लोकाज् जनं भृग्व्-आदयोऽर्दिताः
03110301 तावत् त्रि-भुवनं सद्यः कल्पान्तैधित-सिन्धवः
03110302 प्लावयन्त्युत्कटाटोप- चण्ड-वातेरितोर्मयः
03110311 अन्तः स तस्मिन् सलिल आस्तेऽनन्तासनो हरिः
03110312 योग-निद्रा-निमीलाक्षः स्तूयमानो जनालयैः

03110321 एवं-विधैरहो-रात्रैः काल-गत्योपलक्षितैः
03110322 अपक्षितम् इवास्यापि परमायुर्वयः-शतम्
03110331 यदर्धम् आयुषस्तस्य परार्धम् अभिधीयते
03110332 पूर्वः परार्धोऽपक्रान्तो ह्यपरोऽद्य प्रवर्तते
03110341 पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महान् अभूत्
03110342 कल्पो यत्राभवद्ब्रह्मा शब्द-ब्रह्मेति यं विदुः
03110351 तस्यैव चान्ते कल्पोऽभूद्यं पाद्मम् अभिचक्षते
03110352 यद्धरेर्नाभि-सरस आसील् लोक-सरोरुहम्
03110361 अयं तु कथितः कल्पो द्वितीयस्यापि भारत
03110362 वाराह इति विख्यातो यत्रासीच् छूकरो हरिः
03110371 कालोऽयं द्वि-परार्धाख्यो निमेष उपचर्यते
03110372 अव्याकृतस्यानन्तस्य ह्यनादेर्जगद्-आत्मनः
03110381 कालोऽयं परमाण्व्-आदिर्द्वि-परार्धान्त ईश्वरः
03110382 नैवेशितुं प्रभुर्भूम्न ईश्वरो धाम-मानिनाम्
03110391 विकारैः सहितो युक्तैर्विशेषादिभिरावृतः
03110392 आण्डकोशो बहिरयं पञ्चाशत्-कोटि-विस्तृतः
03110401 दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत्
03110402 लक्ष्यतेऽन्तर्-गताश्चान्ये कोटिशो ह्यण्ड-राशयः
03110411 तदाहुरक्षरं ब्रह्म सर्व-कारण-कारणम्
03110412 विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः

Chapter 12

0312001 मैत्रेय उवाच
03120011 इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः
03120012 महिमा वेद-गर्भोऽथ यथास्राक्षीन् निबोध मे
03120021 ससर्जाग्रेऽन्ध-तामिस्रम् अथ तामिस्रम् आदि-कृत्
03120022 महामोहं च मोहं च तमश्चाज्ञान-वृत्तयः
03120031 दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत
03120032 भगवद्-ध्यान-पूतेन मनसान्यां ततोऽसृजत्
03120041 सनकं च सनन्दं च सनातनम् अथात्मभूः
03120042 सनत्-कुमारं च मुनीन् निष्क्रियान् ऊर्ध्व-रेतसः
03120051 तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः
03120052 तन् नैच्छन् मोक्ष-धर्माणो वासुदेव-परायणाः
03120061 सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः
03120062 क्रोधं दुर्विषहं जातं नियन्तुम् उपचक्रमे
03120071 धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात् प्रजापतेः
03120072 सद्यो ऽजायत तन्-मन्युः कुमारो नील-लोहितः
03120081 स वै रुरोद देवानां पूर्वजो भगवान् भवः
03120082 नामानि कुरु मे धातः स्थानानि च जगद्-गुरो
03120091 इति तस्य वचः पाद्मो भगवान् परिपालयन्
03120092 अभ्यधाद्भद्रया वाचा मा रोदीस्तत् करोमि ते
03120101 यदरोदीः सुर-श्रेष्ठ सोद्वेग इव बालकः
03120102 ततस्त्वाम् अभिधास्यन्ति नाम्ना रुद्र इति प्रजाः
03120111 हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही
03120112 सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रे कृतानि ते
03120121 मन्युर्मनुर्महिनसो महा' छिव ऋतध्वजः
03120122 उग्ररेता भवः कालो वामदेवो धृतव्रतः
03120131 धीर्धृति-रसलोमा च नियुत् सर्पिरिलाम्बिका
03120132 इरावती स्वधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः
03120141 गृहाणैतानि नामानि स्थानानि च स-योषणः

03120142 एभिः सृज प्रजा बह्वीः प्रजानाम् असि यत् पतिः
03120151 इत्यादिष्टः स्व-गुरुणा भगवान् नील-लोहितः
03120152 सत्त्वाकृति-स्वभावेन ससर्जात्म-समाः प्रजाः
03120161 रुद्राणां रुद्र-सृष्टानां समन्ताद्ग्रसतां जगत्
03120162 निशाम्यासङ्ख्यशो यूथान् प्रजापतिरशङ्कत
03120171 अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम
03120172 मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः
03120181 तप आतिष्ठ भद्रं ते सर्व-भूत-सुखावहम्
03120182 तपसैव यथा पूर्वं स्रष्टा विश्वम् इदं भवान्
03120191 तपसैव परं ज्योतिर्भगवन्तम् अधोक्षजम्
03120192 सर्व-भूत-गुहावासम् अञ्जसा विन्दते पुमान्
0312020 मैत्रेय उवाच
03120201 एवम् आत्मभुवादिष्टः परिक्रम्य गिरां पतिम्
03120202 बाढम् इत्यमुम् आमन्त्र्य विवेश तपसे वनम्
03120211 अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे
03120212 भगवच्-छक्ति-युक्तस्य लोक-सन्तान-हेतवः
03120221 मरीचिरत्र्य्-अङ्गिरसौ पुलस्त्यः पुलहः क्रतुः
03120222 भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः
03120231 उत्सङ्गान् नारदो जज्ञे दक्षोऽङ्गुष्ठात् स्वयम्भुवः
03120232 प्राणाद्वसिष्ठः सञ्जातो भृगुस्त्वचि करात् क्रतुः
03120241 पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः
03120242 अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत्
03120251 धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयम्
03120252 अधर्मः पृष्ठतो यस्मान् मृत्युर्लोक-भयङ्करः
03120261 हृदि कामो भ्रुवः क्रोधो लोभश्चाधर-दच्छदात्
03120262 आस्याद्वाक् सिन्धवो मेढ्रान् निरृतिः पायोरघाश्रयः
03120271 छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः
03120272 मनसो देहतश्चेदं जज्ञे विश्व-कृतो जगत्
03120281 वाचं दुहितरं तन्वीं स्वयम्भूर्हरतीं मनः
03120282 अकामां चकमे क्षत्तः स-काम इति नः श्रुतम्
03120291 तम् अधर्मे कृत-मतिं विलोक्य पितरं सुताः
03120292 मरीचि-मुख्या मुनयो विश्रम्भात् प्रत्यबोधयन्
03120301 नैतत् पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे
03120302 यस्त्वं दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः
03120311 तेजीयसाम् अपि ह्येतन् न सुश्लोक्यं जगद्-गुरो
03120312 यद्-वृत्तम् अनुतिष्ठन् वै लोकः क्षेमाय कल्पते
03120321 तस्मै नमो भगवते य इदं स्वेन रोचिषा
03120322 आत्म-स्थं व्यञ्जयाम् आस स धर्मं पातुम् अर्हति
03120331 स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन्

03120332 प्रजापति-पतिस्तन्वं तत्याज व्रीडितस्तदा
03120333 तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः
03120341 कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्-मुखात्
03120342 कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा
03120351 चातुर्-होत्रं कर्म-तन्त्रम् उपवेद-नयैः सह
03120352 धर्मस्य पादाश्चत्वारस्तथैवाश्रम-वृत्तयः
0312036 विदुर उवाच
03120361 स वै विश्व-सृजाम् ईशो वेदादीन् मुखतोऽसृजत्
03120362 यद्यद्येनासृजद्देवस्तन् मे ब्रूहि तपो-धन
0312037 मैत्रेय उवाच
03120371 ऋग्-यजुः-सामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः
03120372 शास्त्रम् इज्यां स्तुति-स्तोमं प्रायश्चित्तं व्यधात् क्रमात्
03120381 आयुर्-वेदं धनुर्-वेदं गान्धर्वं वेदम् आत्मनः
03120382 स्थापत्यं चासृजद्वेदं क्रमात् पूर्वादिभिर्मुखैः
03120391 इतिहास-पुराणानि पञ्चमं वेदम् ईश्वरः
03120392 सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्व-दर्शनः
03120401 षोडश्य्-उक्थौ पूर्व-वक्त्रात् पुरीष्य्-अग्निष्टुतावथ
03120402 आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम्
03120411 विद्या दानं तपः सत्यं धर्मस्येति पदानि च
03120412 आश्रमांश्च यथा-सङ्ख्यम् असृजत् सह वृत्तिभिः
03120421 सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत् तथा
03120422 वार्ता सञ्चय-शालीन- शिलोञ्छ इति वै गृहे
03120431 वैखानसा वालखिल्यौ- दुम्बराः फेनपा वने
03120432 न्यासे कुटीचकः पूर्वं बह्वोदो हंस-निष्क्रियौ
03120441 आन्वीक्षिकी त्रयी वार्ता दण्ड-नीतिस्तथैव च
03120442 एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः
03120451 तस्योष्णिग् आसील् लोमभ्यो गायत्री च त्वचो विभोः
03120452 त्रिष्टुम् मांसात् स्नुतोऽनुष्टुब् जगत्यस्थ्नः प्रजापतेः
03120461 मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्
03120462 स्पर्शस्तस्याभवज् जीवः स्वरो देह उदाहृत
03120471 ऊष्माणम् इन्द्रियाण्याहुरन्तः-स्था बलम् आत्मनः
03120472 स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः
03120481 शब्द-ब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः
03120482 ब्रह्मावभाति विततो नाना-शक्त्य्-उपबृंहितः
03120491 ततोऽपराम् उपादाय स सर्गाय मनो दधे
03120492 ऋषीणां भूरि-वीर्याणाम् अपि सर्गम् अविस्तृतम्
03120501 ज्ञात्वा तद्धृदये भूयश्चिन्तयाम् आस कौरव
03120502 अहो अद्भुतम् एतन् मे व्यापृतस्यापि नित्यदा
03120511 न ह्येधन्ते प्रजा नूनं दैवम् अत्र विघातकम्
03120512 एवं युक्त-कृतस्तस्य दैवं चावेक्षतस्तदा

03120521 कस्य रूपम् अभूद्द्वेधा यत् कायम् अभिचक्षते
03120522 ताभ्यां रूप-विभागाभ्यां मिथुनं समपद्यत
03120531 यस्तु तत्र पुमान् सोऽभून् मनुः स्वायम्भुवः स्वराट्
03120532 स्त्री यासीच् छतरूपाख्या महिष्यस्य महात्मनः
03120541 तदा मिथुन-धर्मेण प्रजा ह्येधाम् बभूविरे
03120542 स चापि शतरूपायां पञ्चापत्यान्यजीजनत्
03120551 प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत
03120552 आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम
03120561 आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमाम्
03120562 दक्षायादात् प्रसूतिं च यत आपूरितं जगत्

Chapter 13

0313001 श्री-शुक उवाच
03130011 निशम्य वाचं वदतो मुनेः पुण्यतमां नृप
03130012 भूयः पप्रच्छ कौरव्यो वासुदेव-कथादृतः
0313002 विदुर उवाच
03130021 स वै स्वायम्भुवः सम्राट् प्रियः पुत्रः स्वयम्भुवः
03130022 प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने
03130031 चरितं तस्य राजर्षेरादि-राजस्य सत्तम
03130032 ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ
03130041 श्रुतस्य पुंसां सुचिर-श्रमस्य ।नन्वञ्जसा सूरिभिरीडितोऽर्थः
03130042 तत्-तद्-गुणानुश्रवणं मुकुन्द- ।पादारविन्दं हृदयेषु येषाम्
0313005 श्री-शुक उवाच
03130051 इति ब्रुवाणं विदुरं विनीतं ।सहस्र-शीर्ष्णश्चरणोपधानम्
03130052 प्रहृष्ट-रोमा भगवत्-कथायां ।प्रणीयमानो मुनिरभ्यचष्ट
0313006 मैत्रेय उवाच
03130061 यदा स्व-भार्यया साधं जातः स्वायम्भुवो मनुः
03130062 प्राञ्जलिः प्रणतश्चेदं वेद-गर्भम् अभाषत
03130071 त्वम् एकः सर्व-भूतानां जन्म-कृद्वृत्तिदः पिता
03130072 तथापि नः प्रजानां ते शुश्रूषा केन वा भवेत्
03130081 तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्म-शक्तिषु
03130082 यत् कृत्वेह यशो विष्वग् अमुत्र च भवेद्गतिः
0313009 ब्रह्मोवाच
03130091 प्रीतस्तुभ्यम् अहं तात स्वस्ति स्ताद्वां क्षितीश्वर
03130092 यन् निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितम्
03130101 एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ
03130102 शक्त्याप्रमत्तैर्गृह्येत सादरं गत-मत्सरैः
03130111 स त्वम् अस्याम् अपत्यानि सदृशान्यात्मनो गुणैः
03130112 उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज
03130121 परं शुश्रूषणं मह्यं स्यात् प्रजा-रक्षया नृप

03130122 भगवांस्ते प्रजा-भर्तुर्हृषीकेशोऽनुतुष्यति
03130131 येषां न तुष्टो भगवान् यज्ञ-लिङ्गो जनार्दनः
03130132 तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयम्
0313014 मनुरुवाच
03130141 आदेशेऽहं भगवतो वर्तेयामीव-सूदन
03130142 स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो
03130151 यदोकः सर्व-भूतानां मही मग्ना महाम्भसि
03130152 अस्या उद्धरणे यत्नो देव देव्या विधीयताम्
0313016 मैत्रेय उवाच
03130161 परमेष्ठी त्वपां मध्ये तथा सन्नाम् अवेक्ष्य गाम्
03130162 कथम् एनां समुन्नेष्य इति दध्यौ धिया चिरम्
03130171 सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता
03130172 अथात्र किम् अनुष्ठेयम् अस्माभिः सर्ग-योजितैः
03130173 यस्याहं हृदयादासं स ईशो विदधातु मे
03130181 इत्यभिध्यायतो नासा- विवरात् सहसानघ
03130182 वराह-तोको निरगादङ्गुष्ठ-परिमाणकः
03130191 तस्याभिपश्यतः ख-स्थः क्षणेन किल भारत
03130192 गज-मात्रः प्रववृधे तदद्भुतम् अभून् महत्
03130201 मरीचि-प्रमुखैर्विप्रैः कुमारैर्मनुना सह
03130202 दृष्ट्वा तत् सौकरं रूपं तर्कयाम् आस चित्रधा
03130211 किम् एतत् सूकर-व्याजं सत्त्वं दिव्यम् अवस्थितम्
03130212 अहो बताश्चर्यम् इदं नासाया मे विनिःसृतम्
03130221 दृष्टोऽङ्गुष्ठ-शिरो-मात्रः क्षणाद्गण्ड-शिला-समः
03130222 अपि स्विद्भगवान् एष यज्ञो मे खेदयन् मनः
03130231 इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः
03130232 भगवान् यज्ञ-पुरुषो जगर्जागेन्द्र-सन्निभः
03130241 ब्रह्माणं हर्षयाम् आस हरिस्तांश्च द्विजोत्तमान्
03130242 स्व-गर्जितेन ककुभः प्रतिस्वनयता विभुः
03130251 निशम्य ते घर्घरितं स्व-खेद- ।क्षयिष्णु मायामय-सूकरस्य
03130252 जनस्-तपः-सत्य-निवासिनस्ते ।त्रिभिः पवित्रैर्मुनयोऽगृणन् स्म
03130261 तेषां सतां वेद-वितान-मूर्तिर् ।ब्रह्मावधार्यात्म-गुणानुवादम्
03130262 विनद्य भूयो विबुधोदयाय ।गजेन्द्र-लीलो जलम् आविवेश
03130271 उत्क्षिप्त-वालः ख-चरः कठोरः ।सटा विधुन्वन् खर-रोमश-त्वक्
03130272 खुराहताभ्रः सित-दंष्ट्र ईक्षा- ।ज्योतिर्बभासे भगवान् महीध्रः
03130281 घ्राणेन पृथ्व्याः पदवीं विजिघ्रन् ।क्रोडापदेशः स्वयम् अध्वराङ्गः
03130282 कराल-दंष्ट्रोऽप्यकराल-दृग्भ्याम् ।उद्वीक्ष्य विप्रान् गृणतोऽविशत् कम्
03130291 स वज्र-कूटाङ्ग-निपात-वेग- ।विशीर्ण-कुक्षिः स्तनयन्न् उदन्वान्
03130292 उत्सृष्ट-दीर्घोर्मि-भुजैरिवार्तश् ।चुक्रोश यज्ञेश्वर पाहि मेति
03130301 खुरैः क्षुरप्रैर्दरयंस्तदाप ।उत्पार-पारं त्रि-परू रसायाम्

03130302 ददर्श गां तत्र सुषुप्सुरग्रे ।यां जीव-धानीं स्वयम् अभ्यधत्त
03130311 पाताल-मूलेश्वर-भोग-संहतौ ।विन्यस्य पादौ पृथिवीं च बिभ्रतः
03130312 यस्योपमानो न बभूव सो ञ्च्युतो ।ममास्तु माङ्गल्य-विवृद्धये हरिः
03130321 स्व-दंष्ट्रयोद्धृत्य महीं निमग्नां ।स उत्थितः संरुरुचे रसायाः
03130322 तत्रापि दैत्यं गदयापतन्तं ।सुनाभ-सन्दीपित-तीव्र-मन्युः
03130331 जघान रुन्धानम् असह्य-विक्रमं ।स लीलयेभं मृगराडिवाम्भसि
03130332 तद्-रक्त-पङ्काङ्कित-गण्ड-तुण्डो ।यथा गजेन्द्रो जगतीं विभिन्दन्
03130341 तमाल-नीलं सित-दन्त-कोट्या ।क्ष्माम् उत्क्षिपन्तं गज-लीलयाङ्ग
03130342 प्रज्ञाय बद्धाञ्जलयोऽनुवाकैर् ।विरिञ्चि-मुख्या उपतस्थुरीशम्
0313035 ऋषय ऊचुः
03130351 जितं जितं ते ञ्जित यज्ञ-भावन ।त्रयीं तनुं स्वां परिधुन्वते नमः
03130352 यद्-रोम-गर्तेषु निलिल्युरद्धयस् ।तस्मै नमः कारण-सूकराय ते
03130361 रूपं तवैतन् ननु दुष्कृतात्मनां ।दुर्दर्शनं देव यदध्वरात्मकम्
03130362 छन्दांसि यस्य त्वचि बर्हि-रोमस्व् ।आज्यं दृशि त्वङ्घ्रिषु चातुर्-होत्रम्
03130371 स्रक् तुण्ड आसीत् स्रुव ईश नासयोर् ।इडोदरे चमसाः कर्ण-रन्ध्रे
03130372 प्राशित्रम् आस्ये ग्रसने ग्रहास्तु ते ।यच् चर्वणं ते भगवन्न् अग्नि-होत्रम्
03130381 दीक्षानुजन्मोपसदः शिरोधरं ।त्वं प्रायणीयोदयनीय-दंष्ट्रः
03130382 जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः ।सत्यावसथ्यं चितयोऽसवो हि ते
03130391 सोमस्तु रेतः सवनान्यवस्थितिः ।संस्था-विभेदास्तव देव धातवः
03130392 सत्राणि सर्वाणि शरीर-सन्धिस् ।त्वं सर्व-यज्ञ-क्रतुरिष्टि-बन्धनः
03130401 नमो नमस्तेऽखिल-मन्त्र-देवता- ।द्रव्याय सर्व-क्रतवे क्रियात्मने
03130402 वैराग्य-भक्त्यात्मजयानुभावित- ।ज्ञानाय विद्या-गुरवे नमो नमः
03130411 दंष्ट्राग्र-कोट्या भगवंस्त्वया धृता ।विराजते भूधर भूः स-भूधरा
03130412 यथा वनान् निःसरतो दता धृता ।मतङ्-गजेन्द्रस्य स-पत्र-पद्मिनी
03130421 त्रयीमयं रूपम् इदं च सौकरं ।भू-मण्डलेनाथ दता धृतेन ते
03130422 चकास्ति शृङ्गोढ-घनेन भूयसा ।कुलाचलेन्द्रस्य यथैव विभ्रमः
03130431 संस्थापयैनां जगतां स-तस्थुषां ।लोकाय पत्नीम् असि मातरं पिता
03130432 विधेम चास्यै नमसा सह त्वया ।यस्यां स्व-तेजोऽग्निम् इवारणावधाः
03130441 कः श्रद्दधीतान्यतमस्तव प्रभो ।रसां गताया भुव उद्विबर्हणम्
03130442 न विस्मयोऽसौ त्वयि विश्व-विस्मये ।यो माययेदं ससृजेऽतिविस्मयम्
03130451 विधुन्वता वेदमयं निजं वपुर् ।जनस्-तपः-सत्य-निवासिनो वयम्
03130452 सटा-शिखोद्धूत-शिवाम्बु-बिन्दुभिर् ।विमृज्यमाना भृशम् ईश पाविताः
03130461 स वै बत भ्रष्ट-मतिस्तवैषते ।यः कर्मणां पारम् अपार-कर्मणः
03130462 यद्-योगमाया-गुण-योग-मोहितं ।विश्वं समस्तं भगवन् विधेहि शम्
0313047 मैत्रेय उवाच
03130471 इत्युपस्थीयमानोऽसौ मुनिभिर्ब्रह्म-वादिभिः
03130472 सलिले स्व-खुराक्रान्त उपाधत्तावितावनिम्
03130481 स इत्थं भगवान् उर्वीं विष्वक्सेनः प्रजापतिः
03130482 रसाया लीलयोन्नीताम् अप्सु न्यस्य ययौ हरिः
03130491 य एवम् एतां हरि-मेधसो हरेः ।कथां सुभद्रां कथनीय-मायिनः

03130492 शृण्वीत भक्त्या श्रवयेत वोशतीं ।जनार्दनोऽस्याशु हृदि प्रसीदति
03130501 तस्मिन् प्रसन्ने सकलाशिषां प्रभौ ।किं दुर्लभं ताभिरलं लवात्मभिः
03130502 अनन्य-दृष्ट्या भजतां गुहाशयः ।स्वयं विधत्ते स्व-गतिं परः पराम्
03130511 को नाम लोके पुरुषार्थ-सारवित् ।पुरा-कथानां भगवत्-कथा-सुधाम्
03130512 आपीय कर्णाञ्जलिभिर्भवापहाम् ।अहो विरज्येत विना नरेतरम्

Chapter 14

0314001 श्री-शुक उवाच
03140011 निशम्य कौषारविणोपवर्णितां ।हरेः कथां कारण-सूकरात्मनः
03140012 पुनः स पप्रच्छ तम् उद्यताञ्जलिर् ।न चातितृप्तो विदुरो धृत-व्रतः
0314002 विदुर उवाच
03140021 तेनैव तु मुनि-श्रेष्ठ हरिणा यज्ञ-मूर्तिना
03140022 आदि-दैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम
03140031 तस्य चोद्धरतः क्षौणीं स्व-दंष्ट्राग्रेण लीलया
03140032 दैत्य-राजस्य च ब्रह्मन् कस्माद्धेतोरभून् मृधः
03140041 श्रद्दधानाय भक्ताय ब्रूहि तज्-जन्म-विस्तरम्
03140042 ऋषे न तृप्यति मनः परं कौतूहलं हि मे
0314005 मैत्रेय उवाच
03140051 साधु वीर त्वया पृष्टम् अवतार-कथां हरेः
03140052 यत् त्वं पृच्छसि मर्त्यानां मृत्यु-पाश-विशातनीम्
03140061 ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः
03140062 मृत्योः कृत्वैव मूर्ध्न्यङ्घ्रिम् आरुरोह हरेः पदम्
03140071 अथात्रापीतिहासोऽयं श्रुतो मे वर्णितः पुरा
03140072 ब्रह्मणा देव-देवेन देवानाम् अनुपृच्छताम्
03140081 दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिम्
03140082 अपत्य-कामा चकमे सन्ध्यायां हृच्-छयार्दिता
03140091 इष्ट्वाग्नि-जिह्वं पयसा पुरुषं यजुषां पतिम्
03140092 निम्लोचत्यर्क आसीनम् अग्न्य्-अगारे समाहितम्
0314010 दितिरुवाच
03140101 एष मां त्वत्-कृते विद्वन् काम आत्त-शरासनः
03140102 दुनोति दीनां विक्रम्य रम्भाम् इव मतङ्गजः
03140111 तद्भवान् दह्यमानायां स-पत्नीनां समृद्धिभिः
03140112 प्रजावतीनां भद्रं ते मय्यायुङ्क्ताम् अनुग्रहम्
03140121 भर्तर्याप्तोरुमानानां लोकान् आविशते यशः
03140122 पतिर्भवद्-विधो यासां प्रजया ननु जायते

03140131 पुरा पिता नो भगवान् दक्षो दुहितृ-वत्सलः
03140132 कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक्
03140141 स विदित्वात्मजानां नो भावं सन्तान-भावनः
03140142 त्रयोदशाददात् तासां यास्ते शीलम् अनुव्रताः
03140151 अथ मे कुरु कल्याणं कामं कमल-लोचन
03140152 आर्तोपसर्पणं भूमन्न् अमोघं हि महीयसि
03140161 इति तां वीर मारीचः कृपणां बहु-भाषिणीम्
03140162 प्रत्याहानुनयन् वाचा प्रवृद्धानङ्ग-कश्मलाम्
03140171 एष तेऽहं विधास्यामि प्रियं भीरु यदिच्छसि
03140172 तस्याः कामं न कः कुर्यात् सिद्धिस्त्रैवर्गिकी यतः
03140181 सर्वाश्रमान् उपादाय स्वाश्रमेण कलत्रवान्
03140182 व्यसनार्णवम् अत्येति जल-यानैर्यथार्णवम्
03140191 याम् आहुरात्मनो ह्यर्धं श्रेयस्-कामस्य मानिनि
03140192 यस्यां स्व-धुरम् अध्यस्य पुमांश्चरति विज्वरः
03140201 याम् आश्रित्येन्द्रियारातीन् दुर्जयान् इतराश्रमैः
03140202 वयं जयेम हेलाभिर्दस्यून् दुर्ग-पतिर्यथा
03140211 न वयं प्रभवस्तां त्वाम् अनुकर्तुं गृहेश्वरि
03140212 अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुण-गृध्नवः
03140221 अथापि कामम् एतं ते प्रजात्यै करवाण्यलम्
03140222 यथा मां नातिरोचन्ति मुहूर्तं प्रतिपालय
03140231 एषा घोरतमा वेला घोराणां घोर-दर्शना
03140232 चरन्ति यस्यां भूतानि भूतेशानुचराणि ह
03140241 एतस्यां साध्वि सन्ध्यायां भगवान् भूत-भावनः
03140242 परीतो भूत-पर्षद्भिर्वृषेणाटति भूतराट्
03140251 श्मशान-चक्रानिल-धूलि-धूम्र- । विकीर्ण-विद्योत-जटा-कलापः
03140252 भस्मावगुण्ठामल-रुक्म-देहो । देवस्त्रिभिः पश्यति देवरस्ते
03140261 न यस्य लोके स्व-जनः परो वा । नात्यादृतो नोत कश्चिद्विगर्ह्यः
03140262 वयं व्रतैर्यच्-चरणापविद्धाम् । आशास्महे ऽजां बत भुक्त-भोगाम्
03140271 यस्यानवद्याचरितं मनीषिणो । गृणन्त्यविद्या-पटलं बिभित्सवः
03140272 निरस्त-साम्यातिशयोऽपि यत् स्वयं । पिशाच-चर्याम् अचरद्गतिः सताम्
03140281 हसन्ति यस्याचरितं हि दुर्भगाः । स्वात्मन्-रतस्याविदुषः समीहितम्
03140282 यैर्वस्त्र-माल्याभरणानुलेपनैः । श्व-भोजनं स्वात्मतयोपलालितम्
03140291 ब्रह्मादयो यत्-कृत-सेतु-पाला । यत्-कारणं विश्वम् इदं च माया
03140292 आज्ञा-करी यस्य पिशाच-चर्या । अहो विभूम्नश्चरितं विडम्बनम्
0314030 मैत्रेय उवाच
03140301 सैवं संविदिते भर्त्रा मन्मथोन्मथितेन्द्रिया
03140302 जग्राह वासो ब्रह्मर्षेर्वृषलीव गत-त्रपा
03140311 स विदित्वाथ भार्यायास्तं निर्बन्धं विकर्मणि
03140312 नत्वा दिष्टाय रहसि तयाथोपविवेश हि
03140321 अथोपस्पृश्य सलिलं प्राणान् आयम्य वाग्-यतः

03140322 ध्याय' जजाप विरजं ब्रह्म ज्योतिः सनातनम्
03140331 दितिस्तु व्रीडिता तेन कर्मावद्येन भारत
03140332 उपसङ्गम्य विप्रर्षिम् अधो-मुख्यभ्यभाषत
0314034 दितिरुवाच
03140341 न मे गर्भम् इमं ब्रह्मन् भूतानाम् ऋषभोऽवधीत्
03140342 रुद्रः पतिर्हि भूतानां यस्याकरवम् अंहसम्
03140351 नमो रुद्राय महते देवायोग्राय मीढुषे
03140352 शिवाय न्यस्त-दण्डाय धृत-दण्डाय मन्यवे
03140361 स नः प्रसीदतां भामो भगवान् उर्व्-अनुग्रहः
03140362 व्याधस्याप्यनुकम्प्यानां स्त्रीणां देवः सती-पतिः
0314037 मैत्रेय उवाच
03140371 स्व-सर्गस्याशिषं लोक्याम् आशासानां प्रवेपतीम्
03140372 निवृत्त-सन्ध्या-नियमो भार्याम् आह प्रजापतिः
0314038 कश्यप उवाच
03140381 अप्रायत्यादात्मनस्ते दोषान् मौहूर्तिकादुत
03140382 मन्-निदेशातिचारेण देवानां चातिहेलनात्
03140391 भविष्यतस्तवाभद्रावभद्रे जाठराधमौ
03140392 लोकान् स-पालांस्त्रींश्चण्डि मुहुराक्रन्दयिष्यतः
03140401 प्राणिनां हन्यमानानां दीनानाम् अकृतागसाम्
03140402 स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु
03140411 तदा विश्वेश्वरः क्रुद्धो भगवाल् लोक-भावनः
03140412 हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्व-धृक्
0314042 दितिरुवाच
03140421 वधं भगवता साक्षात् सुनाभोदार-बाहुना
03140422 आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणाद्प्रभो
03140431 न ब्रह्म-दण्ड-दग्धस्य न भूत-भयदस्य च
03140432 नारकाश्चानुगृह्णन्ति यां यां योनिम् असौ गतः
0314044 कश्यप उवाच
03140441 कृत-शोकानुतापेन सद्यः प्रत्यवमर्शनात्
03140442 भगवत्युरु-मानाच् च भवे मय्यपि चादरात्
03140451 पुत्रस्यैव च पुत्राणां भवितैकः सतां मतः
03140452 गास्यन्ति यद्-यशः शुद्धं भगवद्-यशसा समम्
03140461 योगैर्हेमेव दुर्वर्णं भावयिष्यन्ति साधवः
03140462 निर्वैरादिभिरात्मानं यच्-छीलम् अनुवर्तितुम्
03140471 यत्-प्रसादादिदं विश्वं प्रसीदति यद्-आत्मकम्
03140472 स स्व-दृग् भगवान् यस्य तोष्यतेऽनन्यया दृशा
03140481 स वै महा-भागवतो महात्मा ।महानुभावो महतां महिष्ठः
03140482 प्रवृद्ध-भक्त्या ह्यनुभाविताशये ।निवेश्य वैकुण्ठम् इमं विहास्यति
03140491 अलम्पटः शील-धरो गुणाकरो ।हृष्टः परर्द्ध्या व्यथितो दुःखितेषु
03140491 अभूत-शत्रुर्जगतः शोक-हर्ता ।नैदाघिकं तापम् इवोडुराजः

03140501 अन्तर्बहिश्चामलम् अब्ज-नेत्रं । स्व-पूरुषेच्छानुगृहीत-रूपम्
03140502 पौत्रस्तव श्री-ललना-ललामं । दृष्टा स्फुरत्-कुण्डल-मण्डिताननम्
0314051 मैत्रेय उवाच
03140511 श्रुत्वा भागवतं पौत्रम् अमोदत दितिर्भृशम्
03140512 पुत्रयोश्च वधं कृष्णाद्विदित्वासीन् महा-मनाः

Chapter 15

0315001 मैत्रेय उवाच
03150011 प्राजापत्यं तु तत् तेजः पर-तेजो-हनं दितिः
03150012 दधार वर्षाणि शतं शङ्कमाना सुरार्दनात्
03150021 लोके तेनाहतालोके लोक-पाला हतौजसः
03150022 न्यवेदयन् विश्व-सृजे ध्वान्त-व्यतिकरं दिशाम्
0315003 देवा ऊचुः
03150031 तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशम्
03150032 न ह्यव्यक्तं भगवतः कालेनास्पृष्ट-वर्त्मनः
03150041 देव-देव जगद्-धातर्लोकनाथ-शिखामणे
03150042 परेषाम् अपरेषां त्वं भूतानाम् असि भाव-वित्
03150051 नमो विज्ञान-वीर्याय माययेदम् उपेयुषे
03150052 गृहीत-गुण-भेदाय नमस्तेऽव्यक्त-योनये
03150061 ये त्वानन्येन भावेन भावयन्त्यात्म-भावनम्
03150062 आत्मनि प्रोत-भुवनं परं सद्-असद्-आत्मकम्
03150071 तेषां सुपक्व-योगानां जित-श्वासेन्द्रियात्मनाम्
03150072 लब्ध-युष्मत्-प्रसादानां न कुतश्चित् पराभवः
03150081 यस्य वाचा प्रजाः सर्वा गावस्तन्त्येव यन्त्रिताः
03150082 हरन्ति बलिम् आयत्तास्तस्मै मुख्याय ते नमः
03150091 स त्वं विधत्स्व शं भूमंस्तमसा लुप्त-कर्मणाम्
03150092 अदभ्र-दयया दृष्ट्या आपन्नान् अर्हसीक्षितुम्
03150101 एष देव दितेर्गर्भ ओजः काश्यपम् अर्पितम्
03150102 दिशस्तिमिरयन् सर्वा वर्धतेऽग्निरिवैधसि
0315011 मैत्रेय उवाच
03150111 स प्रहस्य महा-बाहो भगवान् शब्द-गोचरः
03150112 प्रत्याचष्टात्म-भूर्देवान् प्रीणन् रुचिरया गिरा
0315012 ब्रह्मोवाच
03150121 मानसा मे सुता युष्मत्- पूर्वजाः सनकादयः
03150122 चेरुर्विहायसा लोकाल् लोकेषु विगत-स्पृहाः

03150131 त एकदा भगवतो वैकुण्ठस्यामलात्मनः
03150132 ययुर्वैकुण्ठ-निलयं सर्व-लोक-नमस्कृतम्
03150141 वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठ-मूर्तयः
03150142 येऽनिमित्त-निमित्तेन धर्मेणाराधयन् हरिम्
03150151 यत्र चाद्यः पुमान् आस्ते भगवान् शब्द-गोचरः
03150152 सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन् वृषः
03150161 यत्र नैःश्रेयसं नाम वनं काम-दुघैर्द्रुमैः
03150162 सर्वर्तु-श्रीभिर्विभ्राजत् कैवल्यम् इव मूर्तिमत्
03150171 वैमानिकाः स-ललनाश्चरितानि शश्वद्
03150172 गायन्ति यत्र शमल-क्षपणानि भर्तुः
03150173 अन्तर्-जलेऽनुविकसन्-मधु-माधवीनां
03150174 गन्धेन खण्डित-धियोऽप्यनिलं क्षिपन्तः
03150181 पारावतान्यभृत-सारस-चक्रवाक-
03150182 दात्यूह-हंस-शुक-तित्तिरि-बर्हिणां यः
03150183 कोलाहलो विरमते ऽचिर-मात्रम् उच्चैर्
03150184 भृङ्गाधिपे हरि-कथाम् इव गायमाने
03150191 मन्दार-कुन्द-कुरबोत्पल-चम्पकार्ण-
03150192 पुन्नाग-नाग-बकुलाम्बुज-पारिजाताः
03150193 गन्धेऽर्चिते तुलसिकाभरणेन तस्या
03150194 यस्मिंस्तपः सुमनसो बहु मानयन्ति
03150201 यत् सङ्कुलं हरि-पदानति-मात्र-दृष्टैर्
03150202 वैदूर्य-मारकत-हेम-मयैर्विमानैः
03150203 येषां बृहत्-कटि-तटाः स्मित-शोभि-मुख्यः
03150204 कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः
03150211 श्री रूपिणी क्वणयती चरणारविन्दं
03150212 लीलाम्बुजेन हरि-सद्मनि मुक्त-दोषा
03150213 संलक्ष्यते स्फटिक-कुड्य उपेत-हेम्नि
03150214 सम्मार्जतीव यद्-अनुग्रहणेऽन्य-यत्नः
03150221 वापीषु विद्रुम-तटास्वमलामृताप्सु
03150222 प्रेष्यान्विता निज-वने तुलसीभिरीशम्
03150223 अभ्यर्चती स्वलकम् उन्नसम् ईक्ष्य वक्त्रम्
03150224 उच्छेषितं भगवतेत्यमताङ्ग यच्-छ्रीः
03150231 यन् न व्रजन्त्यघ-भिदो रचनानुवादाच्
03150232 छृण्वन्ति येऽन्य-विषयाः कुकथा मति-घ्नीः
03150233 यास्तु श्रुता हत-भगैर्नृभिरात्त-सारास्
03150234 तांस्तान् क्षिपन्त्यशरणेषु तमःसु हन्त
03150241 येऽभ्यर्थिताम् अपि च नो नृ-गतिं प्रपन्ना
03150242 ज्ञानं च तत्त्व-विषयं सह-धर्म यत्र
03150243 नाराधनं भगवतो वितरन्त्यमुष्य

03150244 सम्मोहिता विततया बत मायया ते
03150251 यच् च व्रजन्त्यनिमिषाम् ऋषभानुवृत्त्या
03150252 दूरे यमा ह्युपरि नः स्पृहणीय-शीलाः
03150253 भर्तुर्मिथः सुयशसः कथनानुराग-
03150254 वैक्लव्य-बाष्प-कलया पुलकी-कृताङ्गाः
03150261 तद्विश्व-गुर्व्-अधिकृतं भुवनैक-वन्द्यं
03150262 दिव्यं विचित्र-विबुधाग्र्य-विमान-शोचिः
03150263 आपुः परां मुदम् अपूर्वम् उपेत्य योग-
03150264 माया-बलेन मुनयस्तदथो विकुण्ठम्
03150271 तस्मिन्न् अतीत्य मुनयः षडसज्जमानाः
03150272 कक्षाः समान-वयसावथ सप्तमायाम्
03150273 देवावचक्षत गृहीत-गदौ परार्ध्य-
03150274 केयूर-कुण्डल-किरीट-विटङ्क-वेषौ
03150281 मत्त-द्विरेफ-वनमालिकया निवीतौ
03150282 विन्यस्तयासित-चतुष्टय-बाहु-मध्ये
03150283 वक्त्रं भ्रुवा कुटिलया स्फुट-निर्गमाभ्यां
03150284 रक्तेक्षणेन च मनाग् रभसं दधानौ
03150291 द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा
03150292 पूर्वा यथा पुरट-वज्र-कपाटिका याः
03150293 सर्वत्र तेऽविषमया मुनयः स्व-दृष्ट्या
03150294 ये सञ्चरन्त्यविहता विगताभिशङ्काः
03150301 तान् वीक्ष्य वात-रशनांश्चतुरः कुमारान्
03150302 वृद्धान् दशार्ध-वयसो विदितात्म-तत्त्वान्
03150303 वेत्रेण चास्खलयताम् अतद्-अर्हणांस्तौ
03150304 तेजो विहस्य भगवत्-प्रतिकूल-शीलौ
03150311 ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः
03150312 स्वर्हत्तमा ह्यपि हरेः प्रतिहार-पाभ्याम्
03150313 ऊचुः सुहृत्तम-दिदृक्षित-भङ्ग ईषत्
03150314 कामानुजेन सहसा त उपप्लुताक्षाः
0315032 मुनय ऊचुः
03150321 को वाम् इहैत्य भगवत्-परिचर्ययोच्चैस्
03150322 तद्-धर्मिणां निवसतां विषमः स्वभावः
03150323 तस्मिन् प्रशान्त-पुरुषे गत-विग्रहे वां
03150324 को वात्मवत् कुहकयोः परिशङ्कनीयः
03150331 न ह्यन्तरं भगवतीह समस्त-कुक्षाव्
03150332 आत्मानम् आत्मनि नभो नभसीव धीराः
03150333 पश्यन्ति यत्र युवयोः सुर-लिङ्गिनोः किं
03150334 व्युत्पादितं ह्युदर-भेदि भयं यतोऽस्य
03150341 तद्वाम् अमुष्य परमस्य विकुण्ठ-भर्तुः
03150342 कर्तुं प्रकृष्टम् इह धीमहि मन्द-धीभ्याम्

03150343 लोकान् इतो व्रजतम् अन्तर-भाव-दृष्ट्या
03150344 पापीयसस्त्रय इमे रिपवोऽस्य यत्र
03150351 तेषाम् इतीरितम् उभाववधार्य घोरं
03150352 तं ब्रह्म-दण्डम् अनिवारणम् अस्त्र-पूगैः
03150353 सद्यो हरेरनुचरावुरु बिभ्यतस्तत्-
03150354 पाद-ग्रहावपतताम् अतिकातरेण
03150361 भूयादघोनि भगवद्भिरकारि दण्डो
03150362 यो नौ हरेत सुर-हेलनम् अप्यशेषम्
03150363 मा वोऽनुताप-कलया भगवत्-स्मृति-घ्नो
03150364 मोहो भवेदिह तु नौ व्रजतोरधोऽधः
03150371 एवं तदैव भगवान् अरविन्द-नाभः
03150372 स्वानां विबुध्य सद्-अतिक्रमम् आर्य-हृद्यः
03150373 तस्मिन् ययौ परमहंस-महा-मुनीनाम्
03150374 अन्वेषणीय-चरणौ चलयन् सह-श्रीः
03150381 तं त्वागतं प्रतिहृतौपयिकं स्व-पुम्भिस्
03150382 ते ऽचक्षताक्ष-विषयं स्व-समाधि-भाग्यम्
03150383 हंस-श्रियोर्व्यजनयोः शिव-वायु-लोलच्-
03150384 छुभ्रातपत्र-शशि-केसर-शीकराम्बुम्
03150391 कृत्स्न-प्रसाद-सुमुखं स्पृहणीय-धाम
03150392 स्नेहावलोक-कलया हृदि संस्पृशन्तम्
03150393 श्यामे पृथावुरसि शोभितया श्रिया स्वश्-
03150394 चूडामणिं सुभगयन्तम् इवात्म-धिष्ण्यम्
03150401 पीतांशुके पृथु-नितम्बिनि विस्फुरन्त्या
03150402 काञ्च्यालिभिर्विरुतया वन-मालया च
03150403 वल्गु-प्रकोष्ठ-वलयं विनता-सुतांसे
03150404 विन्यस्त-हस्तम् इतरेण धुनानम् अब्जम्
03150411 विद्युत्-क्षिपन्-मकर-कुण्डल-मण्डनार्ह-
03150412 गण्ड-स्थलोन्नस-मुखं मणिमत्-किरीटम्
03150413 दोर्-दण्ड-षण्ड-विवरे हरता परार्ध्य-
03150414 हारेण कन्धर-गतेन च कौस्तुभेन
03150421 अत्रोपसृष्टम् इति चोत्स्मितम् इन्दिरायाः
03150422 स्वानां धिया विरचितं बहु-सौष्ठवाढ्यम्
03150423 मह्यं भवस्य भवतां च भजन्तम् अङ्गं
03150424 नेमुर्निरीक्ष्य न वितृप्त-दृशो मुदा कैः
03150431 तस्यारविन्द-नयनस्य पदारविन्द-
03150432 किञ्जल्क-मिश्र-तुलसी-मकरन्द-वायुः
03150433 अन्तर्-गतः स्व-विवरेण चकार तेषां
03150434 सङ्क्षोभम् अक्षर-जुषाम् अपि चित्त-तन्वोः
03150441 ते वा अमुष्य वदनासित-पद्म-कोशम्
03150442 उद्वीक्ष्य सुन्दरतराधर-कुन्द-हासम्

03150443 लब्धाशिषः पुनरवेक्ष्य तदीयम् अङ्घ्रि-
03150444 द्वन्द्वं नखारुण-मणि-श्रयणं निदध्युः
03150451 पुंसां गतिं मृगयताम् इह योग-मार्गैर्
03150452 ध्यानास्पदं बहु-मतं नयनाभिरामम्
03150453 पौंस्नं वपुर्दर्शयानम् अनन्य-सिद्धैर्
03150454 औत्पत्तिकैः समगृणन् युतम् अष्ट-भोगैः
0315046 कुमारा ऊचुः
03150461 योऽन्तर्हितो हृदि गतोऽपि दुरात्मनां त्वं
03150462 सोऽद्यैव नो नयन-मूलम् अनन्त राद्धः
03150463 यर्ह्येव कर्ण-विवरेण गुहां गतो नः
03150464 पित्रानुवर्णित-रहा भवद्-उद्भवेन
03150471 तं त्वां विदाम भगवन् परम् आत्म-तत्त्वं
03150472 सत्त्वेन सम्प्रति रतिं रचयन्तम् एषाम्
03150473 यत् तेऽनुताप-विदितैर्दृढ-भक्ति-योगैर्
03150474 उद्ग्रन्थयो हृदि विदुर्मुनयो विरागाः
03150481 नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
03150482 किम्वन्यदर्पित-भयं भ्रुव उन्नयैस्ते
03150483 येऽङ्ग त्वद्-अङ्घ्रि-शरणा भवतः कथायाः
03150484 कीर्तन्य-तीर्थ-यशसः कुशला रस-ज्ञाः
03150491 कामं भवः स्व-वृजिनैर्निरयेषु नः स्ताच्
03150492 चेतोऽलिवद्यदि नु ते पदयो रमेत
03150493 वाचश्च नस्तुलसिवद्यदि तेऽङ्घ्रि-शोभाः
03150494 पूर्येत ते गुण-गणैर्यदि कर्ण-रन्ध्रः
03150501 प्रादुश्चकर्थ यदिदं पुरुहूत रूपं
03150502 तेनेश निर्वृतिम् अवापुरलं दृशो नः
03150503 तस्मा इदं भगवते नम इद्विधेम
03150504 योऽनात्मनां दुरुदयो भगवान् प्रतीतः

Chapter 16

0316001 ब्रह्मोवाच
03160011 इति तद्गृणतां तेषां मुनीनां योग-धर्मिणाम्
03160012 प्रतिनन्द्य जगादेदं विकुण्ठ-निलयो विभुः
0316002 श्री-भगवान् उवाच
03160021 एतौ तौ पार्षदौ मह्यं जयो विजय एव च
03160022 कदर्थी-कृत्य मां यद्वो बह्वक्राताम् अतिक्रमम्
03160031 यस्त्वेतयोर्धृतो दण्डो भवद्भिर्माम् अनुव्रतैः
03160032 स एवानुमतोऽस्माभिर्मुनयो देव-हेलनात्
03160041 तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे
03160042 तद्धीत्यात्म-कृतं मन्ये यत् स्व-पुम्भिरसत्-कृताः
03160051 यन्-नामानि च गृह्णाति लोको भृत्ये कृतागसि
03160052 सोऽसाधु-वादस्तत्-कीर्तिं हन्ति त्वचम् इवामयः
03160061 यस्यामृतामल-यशः-श्रवणावगाहः
03160062 सद्यः पुनाति जगदाश्वपचाद्विकुण्ठः
03160063 सोऽहं भवद्भ्य उपलब्ध-सुतीर्थ-कीर्तिश्
03160064 छिन्द्यां स्व-बाहुम् अपि वः प्रतिकूल-वृत्तिम्
03160071 यत्-सेवया चरण-पद्म-पवित्र-रेणुं
03160072 सद्यः क्षताखिल-मलं प्रतिलब्ध-शीलम्
03160073 न श्रीर्विरक्तम् अपि मां विजहाति यस्याः
03160074 प्रेक्षा-लवार्थ इतरे नियमान् वहन्ति
03160081 नाहं तथाद्मि यजमान-हविर्विताने
03160082 श्च्योतद्-घृत-प्लुतम् अदन् हुत-भुङ्-मुखेन
03160083 यद्ब्राह्मणस्य मुखतश्चरतोऽनुघासं
03160084 तुष्टस्य मय्यवहितैर्निज-कर्म-पाकैः
03160091 येषां बिभर्म्यहम् अखण्ड-विकुण्ठ-योग-
03160092 माया-विभूतिरमलाङ्घ्रि-रजः किरीटैः
03160093 विप्रांस्तु को न विषहेत यद्-अर्हणाम्भः
03160094 सद्यः पुनाति सह-चन्द्र-ललाम-लोकान्

03160101 ये मे तनूर्द्विज-वरान् दुहतीर्मदीया
03160102 भूतान्यलब्ध-शरणानि च भेद-बुद्ध्या
03160103 द्रक्ष्यन्त्यघ-क्षत-दृशो ह्यहि-मन्यवस्तान्
03160104 गृध्रा रुषा मम कुषन्त्यधिदण्ड-नेतुः
03160111 ये ब्राह्मणान् मयि धिया क्षिपतोऽर्चयन्तस्
03160112 तुष्यद्-धृदः स्मित-सुधोक्षित-पद्म-वक्त्राः
03160113 वाण्यानुराग-कलयात्मजवद्गृणन्तः
03160114 सम्बोधयन्त्यहम् इवाहम् उपाहृतस्तैः
03160121 तन् मे स्व-भर्तुरवसायम् अलक्षमाणौ
03160122 युष्मद्-व्यतिक्रम-गतिं प्रतिपद्य सद्यः
03160123 भूयो ममान्तिकम् इतां तदनुग्रहो मे
03160124 यत् कल्पताम् अचिरतो भृतयोर्विवासः
0316013 ब्रह्मोवाच
03160131 अथ तस्योशतीं देवीम् ऋषि-कुल्यां सरस्वतीम्
03160132 नास्वाद्य मन्यु-दष्टानां तेषाम् आत्माप्यतृप्यत
03160141 सतीं व्यादाय शृण्वन्तो लघ्वीं गुर्व्-अर्थ-गह्वराम्
03160142 विगाह्यागाध-गम्भीरां न विदुस्तच्-चिकीर्षितम्
03160151 ते योग-माययारब्ध- पारमेष्ठ्य-महोदयम्
03160152 प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः क्षुभित-त्वचः
0316016 ऋषय ऊचुः
03160161 न वयं भगवन् विद्मस्तव देव चिकीर्षितम्
03160162 कृतो मेऽनुग्रहश्चेति यदध्यक्षः प्रभाषसे
03160171 ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो
03160172 विप्राणां देव-देवानां भगवान् आत्म-दैवतम्
03160181 त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव
03160182 धर्मस्य परमो गुह्यो निर्विकारो भवान् मतः
03160191 तरन्ति ह्यञ्जसा मृत्युं निवृत्ता यद्-अनुग्रहात्
03160192 योगिनः स भवान् किं स्विदनुगृह्येत यत् परैः
03160201 यं वै विभूतिरुपयात्यनुवेलम् अन्यैर्
03160202 अर्थार्थिभिः स्व-शिरसा धृत-पाद-रेणुः
03160203 धन्यार्पिताङ्घ्रि-तुलसी-नव-दाम-धाम्नो
03160204 लोकं मधुव्रत-पतेरिव काम-याना
03160211 यस्तां विविक्त-चरितैरनुवर्तमानां
03160212 नात्याद्रियत् परम-भागवत-प्रसङ्गः
03160213 स त्वं द्विजानुपथ-पुण्य-रजः-पुनीतः
03160214 श्रीवत्स-लक्ष्म किम् अगा भग-भाजनस्त्वम्
03160221 धर्मस्य ते भगवतस्त्रि-युग त्रिभिः स्वैः
03160222 पद्भिश्चराचरम् इदं द्विज-देवतार्थम्
03160223 नूनं भृतं तद्-अभिघाति रजस्तमश्च

03160224 सत्त्वेन नो वरदया तनुवा निरस्य
03160231 न त्वं द्विजोत्तम-कुलं यदि हात्म-गोपं
03160232 गोप्ता वृषः स्वर्हणेन स-सूनृतेन
03160233 तर्ह्येव नङ्क्ष्यति शिवस्तव देव पन्था
03160234 लोकोऽग्रहीष्यदृषभस्य हि तत् प्रमाणम्
03160241 तत् तेऽनभीष्टम् इव सत्त्व-निधेर्विधित्सोः
03160242 क्षेमं जनाय निज-शक्तिभिरुद्धृतारेः
03160243 नैतावता त्र्य्-अधिपतेर्बत विश्व-भर्तुस्
03160244 तेजः क्षतं त्ववनतस्य स ते विनोदः
03160251 यं वानयोर्दमम् अधीश भवान् विधत्ते
03160252 वृत्तिं नु वा तदनुमन्महि निर्व्यलीकम्
03160253 अस्मासु वा य उचितो ध्रियतां स दण्डो
03160254 येऽनागसौ वयम् अयुङ्क्ष्महि किल्बिषेण
0316026 श्री-भगवान् उवाच
03160261 एतौ सुरेतर-गतिं प्रतिपद्य सद्यः
03160262 संरम्भ-सम्भृत-समाध्य्-अनुबद्ध-योगौ
03160263 भूयः सकाशम् उपयास्यत आशु यो वः
03160264 शापो मयैव निमितस्तदवेत विप्राः
0316027 ब्रह्मोवाच
03160271 अथ ते मुनयो दृष्ट्वा नयनानन्द-भाजनम्
03160272 वैकुण्ठं तद्-अधिष्ठानं विकुण्ठं च स्वयं-प्रभम्
03160281 भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च
03160282 प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम्
03160291 भगवान् अनुगावाह यातं मा भैष्टम् अस्तु शम्
03160292 ब्रह्म-तेजः समर्थोऽपि हन्तुं नेच्छे मतं तु मे
03160301 एतत् पुरैव निर्दिष्टं रमया क्रुद्धया यदा
03160302 पुरापवारिता द्वारि विशन्ती मय्युपारते
03160311 मयि संरम्भ-योगेन निस्तीर्य ब्रह्म-हेलनम्
03160312 प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः
03160321 द्वाःस्थावादिश्य भगवान् विमान-श्रेणि-भूषणम्
03160322 सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यम् आविशत्
03160331 तौ तु गीर्वाण-ऋषभौ दुस्तराद्धरि-लोकतः
03160332 हत-श्रियौ ब्रह्म-शापादभूतां विगत-स्मयौ
03160341 तदा विकुण्ठ-धिषणात् तयोर्निपतमानयोः
03160342 हाहा-कारो महान् आसीद्विमानाग्र्येषु पुत्रकाः
03160351 तावेव ह्यधुना प्राप्तौ पार्षद-प्रवरौ हरेः
03160352 दितेर्जठर-निर्विष्टं काश्यपं तेज उल्बणम्
03160361 तयोरसुरयोरद्य तेजसा यमयोर्हि वः
03160362 आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति

03160371 विश्वस्य यः स्थिति-लयोद्भव-हेतुराद्यो
03160372 योगेश्वरैरपि दुरत्यय-योगमायः
03160373 क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्
03160374 तत्रास्मदीय-विमृशेन कियान् इहार्थः

Chapter 17

0317001 मैत्रेय उवाच
03170011 निशम्यात्म-भुवा गीतं कारणं शङ्कयोज्झिताः
03170012 ततः सर्वे न्यवर्तन्त त्रिदिवाय दिवौकसः
03170021 दितिस्तु भर्तुरादेशादपत्य-परिशङ्किनी
03170022 पूर्णे वर्ष-शते साध्वी पुत्रौ प्रसुषुवे यमौ
03170031 उत्पाता बहवस्तत्र निपेतुर्जायमानयोः
03170032 दिवि भुव्यन्तरिक्षे च लोकस्योरु-भयावहाः
03170041 सहाचला भुवश्चेलुर्दिशः सर्वाः प्रजज्वलुः
03170042 सोल्काश्चाशनयः पेतुः केतवश्चार्ति-हेतवः
03170051 ववौ वायुः सुदुःस्पर्शः फूत्-कारान् ईरयन् मुहुः
03170052 उन्मूलयन् नग-पतीन् वात्यानीको रजो-ध्वजः
03170061 उद्धसत्-तडिद्-अम्भोद- घटया नष्ट-भागणे
03170062 व्योम्नि प्रविष्ट-तमसा न स्म व्यादृश्यते पदम्
03170071 चुक्रोश विमना वार्धिरुदूर्मिः क्षुभितोदरः
03170072 सोदपानाश्च सरितश्चुक्षुभुः शुष्क-पङ्कजाः
03170081 मुहुः परिधयोऽभूवन् सराह्वोः शशि-सूर्ययोः
03170082 निर्घाता रथ-निर्ह्रादा विवरेभ्यः प्रजज्ञिरे
03170091 अन्तर्-ग्रामेषु मुखतो वमन्त्यो वह्निम् उल्बणम्
03170092 सृगालोलूक-टङ्कारैः प्रणेदुरशिवं शिवाः
03170101 सङ्गीतवद्रोदनवदुन्नमय्य शिरोधराम्
03170102 व्यमुञ्चन् विविधा वाचो ग्राम-सिंहास्ततस्ततः
03170111 खराश्च कर्कशैः क्षत्तः खुरैर्घ्नन्तो धरा-तलम्
03170112 खार्कार-रभसा मत्ताः पर्यधावन् वरूथशः
03170121 रुदन्तो रासभ-त्रस्ता नीडादुदपतन् खगाः
03170122 घोषेऽरण्ये च पशवः शकृन्-मूत्रम् अकुर्वत
03170131 गावोऽत्रसन्न् असृग्-दोहास्तोयदाः पूय-वर्षिणः
03170132 व्यरुदन् देव-लिङ्गानि द्रुमाः पेतुर्विनानिलम्
03170141 ग्रहान् पुण्यतमान् अन्ये भगणांश्चापि दीपिताः

03170142 अतिचेरुर्वक्र-गत्या युयुधुश्च परस्परम्
03170151 दृष्ट्वान्यांश्च महोत्पातान् अतत्-तत्त्व-विदः प्रजाः
03170152 ब्रह्म-पुत्रान् ऋते भीता मेनिरे विश्व-सम्प्लवम्
03170161 तावादि-दैत्यौ सहसा व्यज्यमानात्म-पौरुषौ
03170162 ववृधातेऽश्म-सारेण कायेनाद्रि-पती इव
03170171 दिवि-स्पृशौ हेम-किरीट-कोटिभिर् । निरुद्ध-काष्ठौ स्फुरद्-अङ्गदा-भुजौ
03170172 गां कम्पयन्तौ चरणैः पदे पदे । कट्या सुकाञ्च्यार्कम् अतीत्य तस्थतुः
03170181 प्रजापतिर्नाम तयोरकार्षीद् । यः प्राक् स्व-देहाद्यमयोरजायत
03170182 तं वै हिरण्यकशिपुं विदुः प्रजा । यं तं हिरण्याक्षम् असूत साग्रतः
03170191 चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्म-वरेण च
03170192 वशे स-पालान् लोकांस्त्रीन् अकुतो-मृत्युरुद्धतः
03170201 हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीति-कृदन्वहम्
03170202 गदा-पाणिर्दिवं यातो युयुत्सुर्मृगयन् रणम्
03170211 तं वीक्ष्य दुःसह-जवं रणत्-काञ्चन-नूपुरम्
03170212 वैजयन्त्या स्रजा जुष्टम् अंस-न्यस्त-महा-गदम्
03170221 मनो-वीर्य-वरोत्सिक्तम् असृण्यम् अकुतो-भयम्
03170222 भीता निलिल्यिरे देवास्तार्क्ष्य-त्रस्ता इवाहयः
03170231 स वै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्य-राट्
03170232 सेन्द्रान् देव-गणान् क्षीबान् अपश्यन् व्यनदद्भृशम्
03170241 ततो निवृत्तः क्रीडिष्यन् गम्भीरं भीम-निस्वनम्
03170242 विजगाहे महा-सत्त्वो वार्धिं मत्त इव द्विपः
03170251 तस्मिन् प्रविष्टे वरुणस्य सैनिका । यादो-गणाः सन्न-धियः ससाध्वसाः
03170252 अहन्यमाना अपि तस्य वर्चसा । प्रधर्षिता दूरतरं प्रदुद्रुवुः
03170261 स वर्ष-पूगान् उदधौ महा-बलश् । चरन् महोर्मीं' छ्वसनेरितान् मुहुः
03170262 मौर्व्याभिजघ्ने गदया विभावरीम् । आसेदिवांस्तात पुरीं प्रचेतसः
03170271 तत्रोपलभ्यासुर-लोक-पालकं । यादो-गणानाम् ऋषभं प्रचेतसम्
03170272 स्मयन् प्रलब्धुं प्रणिपत्य नीचवज् । जगाद मे देह्यधिराज संयुगम्
03170281 त्वं लोक-पालोऽधिपतिर्बृहच्-छ्रवा । वीर्यापहो दुर्मद-वीर-मानिनाम्
03170282 विजित्य लोकेऽखिल-दैत्य-दानवान् । यद्राजसूयेन पुरायजत् प्रभो
03170291 स एवम् उत्सिक्त-मदेन विद्विषा । दृढं प्रलब्धो भगवान् अपां पतिः
03170292 रोषं समुत्थं शमयन् स्वया धिया । व्यवोचदङ्गोपशमं गता वयम्
03170301 पश्यामि नान्यं पुरुषात् पुरातनाद् । यः संयुगे त्वां रण-मार्ग-कोविदम्
03170302 आराधयिष्यत्यसुरर्षभेहि तं । मनस्विनो यं गृणते भवादृशाः
03170311 तं वीरम् आरादभिपद्य विस्मयः । शयिष्यसे वीर-शये श्वभिर्वृतः
03170312 यस्त्वद्-विधानाम् असतां प्रशान्तये । रूपाणि धत्ते सद्-अनुग्रहेच्छया

Chapter 18

0318001 मैत्रेय उवाच
03180011 तदेवम् आकर्ण्य जलेश-भाषितं । महा-मनास्तद्विगणय्य दुर्मदः
03180012 हरेर्विदित्वा गतिम् अङ्ग नारदाद् । रसातलं निर्विविशे त्वरान्वितः
03180021 ददर्श तत्राभिजितं धरा-धरं । प्रोन्नीयमानावनिम् अग्र-दंष्ट्रया
03180022 मुष्णन्तम् अक्ष्णा स्व-रुचोऽरुण-श्रिया । जहास चाहो वन-गोचरो मृगः
03180031 आहैनम् एह्यज्ञ महीं विमुञ्च नो । रसौकसां विश्व-सृजेयम् अर्पिता
03180032 न स्वस्ति यास्यस्यनया ममेक्षतः । सुराधमासादित-सूकराकृते
03180041 त्वं नः सपत्नैरभवाय किं भृतो । यो मायया हन्त्यसुरान् परोक्ष-जित्
03180042 त्वां योगमाया-बलम् अल्प-पौरुषं । संस्थाप्य मूढ प्रमृजे सुहृच्-छुचः
03180051 त्वयि संस्थिते गदया शीर्ण-शीर्षण्य् । अस्मद्-भुज-च्युतया ये च तुभ्यम्
03180052 बलिं हरन्त्यृषयो ये च देवाः । स्वयं सर्वे न भविष्यन्त्यमूलाः
03180061 स तुद्यमानोऽरि-दुरुक्त-तोमरैर् । दंष्ट्राग्र-गां गाम् उपलक्ष्य भीताम्
03180062 तोदं मृषन् निरगादम्बु-मध्याद् । ग्राहाहतः स-करेणुर्यथेभः
03180071 तं निःसरन्तं सलिलादनुद्रुतो । हिरण्य-केशो द्विरदं यथा झषः
03180072 कराल-दंष्ट्रोऽशनि-निस्वनोऽब्रवीद् । गत-ह्रियां किं त्वसतां विगर्हितम्
03180081 स गाम् उदस्तात् सलिलस्य गोचरे । विन्यस्य तस्याम् अदधात् स्व-सत्त्वम्
03180082 अभिष्टुतो विश्व-सृजा प्रसूनैर् । आपूर्यमाणो विबुधैः पश्यतोऽरेः
03180091 परानुषक्तं तपनीयोपकल्पं । महा-गदं काञ्चन-चित्र-दंशम्
03180092 मर्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः । प्रचण्ड-मन्युः प्रहसंस्तं बभाषे
0318010 श्री-भगवान् उवाच
03180101 सत्यं वयं भो वन-गोचरा मृगा । युष्मद्-विधान् मृगये ग्राम-सिंहान्
03180102 न मृत्यु-पाशैः प्रतिमुक्तस्य वीरा । विकत्थनं तव गृह्णन्त्यभद्र
03180111 एते वयं न्यास-हरा रसौकसां । गत-ह्रियो गदया द्रावितास्ते
03180112 तिष्ठामहेऽथापि कथञ्चिदाजौ । स्थेयं क्व यामो बलिनोत्पाद्य वैरम्
03180121 त्वं पद्-रथानां किल यूथपाधिपो । घटस्व नोऽस्वस्तय आश्वनूहः
03180122 संस्थाप्य चास्मान् प्रमृजाश्रु स्वकानां । यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः
0318013 मैत्रेय उवाच

03180131 सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशम्
03180132 आजहारोल्बणं क्रोधं क्रीड्यमानोऽहि-राडिव
03180141 सृजन्न् अमर्षितः श्वासान् मन्यु-प्रचलितेन्द्रियः
03180142 आसाद्य तरसा दैत्यो गदया न्यहनद्धरिम्
03180151 भगवांस्तु गदा-वेगं विसृष्टं रिपुणोरसि
03180152 अवञ्चयत् तिरश्चीनो योगारूढ इवान्तकम्
03180161 पुनर्गदां स्वाम् आदाय भ्रामयन्तम् अभीक्ष्णशः
03180162 अभ्यधावद्धरिः क्रुद्धः संरम्भाद्दष्ट-दच्छदम्
03180171 ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः
03180172 आजघ्ने स तु तां सौम्य गदया कोविदोऽहनत्
03180181 एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च
03180182 जिगीषया सुसंरब्धावन्योन्यम् अभिजघ्नतुः
03180191 तयोः स्पृधोस्तिग्म-गदाहताङ्गयोः ।क्षतास्रव-घ्राण-विवृद्ध-मन्य्वोः
03180192 विचित्र-मार्गांश्चरतोर्जिगीषया ।व्यभादिलायाम् इव शुष्मिणोर्मृधः
03180201 दैत्यस्य यज्ञावयवस्य माया- ।गृहीत-वाराह-तनोर्महात्मनः
03180202 कौरव्य मह्यां द्विषतोर्विमर्दनं ।दिदृक्षुरागादृषिभिर्वृतः स्वराट्
03180211 आसन्न-शौण्डीरम् अपेत-साध्वसं ।कृत-प्रतीकारम् अहार्य-विक्रमम्
03180212 विलक्ष्य दैत्यं भगवान् सहस्र-णीर् ।जगाद नारायणम् आदि-सूकरम्
0318022 ब्रह्मोवाच
03180221 एष ते देव देवानाम् अङ्घ्रि-मूलम् उपेयुषाम्
03180222 विप्राणां सौरभेयीणां भूतानाम् अप्यनागसाम्
03180231 आगस्-कृद्भय-कृद्दुष्कृदस्मद्-राद्ध-वरोऽसुरः
03180232 अन्वेषन्न् अप्रतिरथो लोकान् अटति कण्टकः
03180241 मैनं मायाविनं दृप्तं निरङ्कुशम् असत्तमम्
03180242 आक्रीड बालवद्देव यथाशीविषम् उत्थितम्
03180251 न यावदेष वर्धेत स्वां वेलां प्राप्य दारुणः
03180252 स्वां देव मायाम् आस्थाय तावज् जह्यघम् अच्युत
03180261 एषा घोरतमा सन्ध्या लोक-च्छम्बट्-करी प्रभो
03180262 उपसर्पति सर्वात्मन् सुराणां जयम् आवह
03180271 अधुनैषोऽभिजिन् नाम योगो मौहूर्तिको ह्यगात्
03180272 शिवाय नस्त्वं सुहृदाम् आशु निस्तर दुस्तरम्
03180281 दिष्ट्या त्वां विहितं मृत्युम् अयम् आसादितः स्वयम्
03180282 विक्रम्यैनं मृधे हत्वा लोकान् आधेहि शर्मणि

Chapter 19

0319001 मैत्रेय उवाच
03190011 अवधार्य विरिञ्चस्य निर्व्यलीकामृतं वचः
03190012 प्रहस्य प्रेम-गर्भेण तदपाङ्गेन सोऽग्रहीत्
03190021 ततः सपत्नं मुखतश्चरन्तम् अकुतो-भयम्
03190022 जघानोत्पत्य गदया हनावसुरम् अक्षजः
03190031 सा हता तेन गदया विहता भगवत्-करात्
03190032 विघूर्णितापतद्रेजे तदद्भुतम् इवाभवत्
03190041 स तदा लब्ध-तीर्थोऽपि न बबाधे निरायुधम्
03190042 मानयन् स मृधे धर्मं विष्वक्सेनं प्रकोपयन्
03190051 गदायाम् अपविद्धायां हाहा-कारे विनिर्गते
03190052 मानयाम् आस तद्-धर्मं सुनाभं चास्मरद्विभुः
03190061 तं व्यग्र-चक्रं दिति-पुत्राधमेन ।स्व-पार्षद-मुख्येन विषज्जमानम्
03190062 चित्रा वाचोऽतद्-विदां खे-चराणां ।तत्र स्मासन् स्वस्ति तेऽमुं जहीति
03190071 स तं निशाम्यात्त-रथाङ्गम् अग्रतो ।व्यवस्थितं पद्म-पलाश-लोचनम्
03190072 विलोक्य चामर्ष-परिप्लुतेन्द्रियो ।रुषा स्व-दन्त-च्छदम् आदशच् छ्वसन्
03190081 कराल-दंष्ट्रश्चक्षुर्भ्यां सञ्चक्षाणो दहन्न् इव
03190082 अभिप्लुत्य स्व-गदया हतोऽसीत्याहनद्धरिम्
03190091 पदा सव्येन तां साधो भगवान् यज्ञ-सूकरः
03190092 लीलया मिषतः शत्रोः प्राहरद्वात-रंहसम्
03190101 आह चायुधम् आधत्स्व घटस्व त्वं जिगीषसि
03190102 इत्युक्तः स तदा भूयस्ताडयन् व्यनदद्भृशम्
03190111 तां स आपततीं वीक्ष्य भगवान् समवस्थितः
03190112 जग्राह लीलया प्राप्तां गरुत्मान् इव पन्नगीम्
03190121 स्व-पौरुषे प्रतिहते हत-मानो महासुरः
03190122 नैच्छद्गदां दीयमानां हरिणा विगत-प्रभः
03190131 जग्राह त्रि-शिखं शूलं ज्वलज्-ज्वलन-लोलुपम्
03190132 यज्ञाय धृत-रूपाय विप्रायाभिचरन् यथा
03190141 तदोजसा दैत्य-महा-भटार्पितं ।चकासदन्तः-ख उदीर्ण-दीधिति

03190142 चक्रेण चिच्छेद निशात-नेमिना ।हरिर्यथा तार्क्ष्य-पतत्रम् उज्झितम्
03190151 वृक्णे स्व-शूले बहुधारिणा हरेः ।प्रत्येत्य विस्तीर्णम् उरो विभूतिमत्
03190152 प्रवृद्ध-रोषः स कठोर-मुष्टिना ।नदन् प्रहृत्यान्तरधीयतासुरः
03190161 तेनेत्थम् आहतः क्षत्तर्भगवान् आदि-सूकरः
03190162 नाकम्पत मनाक् क्वापि स्रजा हत इव द्विपः
03190171 अथोरुधासृजन् मायां योग-मायेश्वरे हरौ
03190172 यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमम्
03190181 प्रववुर्वायवश्चण्डास्तमः पांसवम् ऐरयन्
03190182 दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव
03190191 द्यौर्नष्ट-भगणाभ्रौघैः स-विद्युत्-स्तनयित्नुभिः
03190192 वर्षद्भिः पूय-केशासृग्- विण्-मूत्रास्थीनि चासकृत्
03190201 गिरयः प्रत्यदृश्यन्त नानायुध-मुचोऽनघ
03190202 दिग्-वाससो यातुधान्यः शूलिन्यो मुक्त-मूर्धजाः
03190211 बहुभिर्यक्ष-रक्षोभिः पत्त्य्-अश्व-रथ-कुञ्जरैः
03190212 आततायिभिरुत्सृष्टा हिंस्रा वाचोऽतिवैशसाः
03190221 प्रादुष्कृतानां मायानाम् आसुरीणां विनाशयत्
03190222 सुदर्शनास्त्रं भगवान् प्रायुङ्क्त दयितं त्रि-पात्
03190231 तदा दितेः समभवत् सहसा हृदि वेपथुः
03190232 स्मरन्त्या भर्तुरादेशं स्तनाच् चासृक् प्रसुस्रुवे
03190241 विनष्टासु स्व-मायासु भूयश्चाव्रज्य केशवम्
03190242 रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः
03190251 तं मुष्टिभिर्विनिघ्नन्तं वज्र-सारैरधोक्षजः
03190252 करेण कर्ण-मूलेऽहन् यथा त्वाष्ट्रं मरुत्-पतिः
03190261 स आहतो विश्व-जिता ह्यवज्ञया ।परिभ्रमद्-गात्र उदस्त-लोचनः
03190262 विशीर्ण-बाह्व्-अङ्घ्रि-शिरोरुहोऽपतद् ।यथा नगेन्द्रो लुलितो नभस्वता
03190271 क्षितौ शयानं तम् अकुण्ठ-वर्चसं ।कराल-दंष्ट्रं परिदष्ट-दच्छदम्
03190272 अजादयो वीक्ष्य शशंसुरागता ।अहो इमं को नु लभेत संस्थितिम्
03190281 यं योगिनो योग-समाधिना रहो ।ध्यायन्ति लिङ्गादसतो मुमुक्षया
03190282 तस्यैष दैत्य-ऋषभः पदाहतो ।मुखं प्रपश्यंस्तनुम् उत्ससर्ज ह
03190291 एतौ तौ पार्षदावस्य शापाद्यातावसद्-गतिम्
03190292 पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः
0319030 देवा ऊचुः
03190301 नमो नमस्तेऽखिल-यज्ञ-तन्तवे ।स्थितौ गृहीतामल-सत्त्व-मूर्तये
03190302 दिष्ट्या हतोऽयं जगताम् अरुन्तुदस् ।त्वत्-पाद-भक्त्या वयम् ईश निर्वृताः
0319031 मैत्रेय उवाच
03190311 एवं हिरण्याक्षम् असह्य-विक्रमं ।स सादयित्वा हरिरादि-सूकरः
03190312 जगाम लोकं स्वम् अखण्डितोत्सवं ।समीडितः पुष्कर-विष्टरादिभिः
03190321 मया यथानूक्तम् अवादि ते हरेः ।कृतावतारस्य सुमित्र चेष्टितम्
03190322 यथा हिरण्याक्ष उदार-विक्रमो ।महा-मृधे क्रीडनवन् निराकृतः

0319033 सूत उवाच
03190331 इति कौषारवाख्याताम् आश्रुत्य भगवत्-कथाम्
03190332 क्षत्तानन्दं परं लेभे महा-भागवतो द्विज
03190341 अन्येषां पुण्य-श्लोकानाम् उद्दाम-यशसां सताम्
03190342 उपश्रुत्य भवेन् मोदः श्रीवत्साङ्कस्य किं पुनः
03190351 यो गजेन्द्रं झष-ग्रस्तं ध्यायन्तं चरणाम्बुजम्
03190352 क्रोशन्तीनां करेणूनां कृच्छ्रतोऽमोचयद्द्रुतम्
03190361 तं सुखाराध्यम् ऋजुभिरनन्य-शरणैर्नृभिः
03190362 कृतज्ञः को न सेवेत दुराराध्यम् असाधुभिः
03190371 यो वै हिरण्याक्ष-वधं महाद्भुतं । विक्रीडितं कारण-सूकरात्मनः
03190372 शृणोति गायत्यनुमोदतेऽञ्जसा । विमुच्यते ब्रह्म-वधादपि द्विजाः
03190381 एतन् महा-पुण्यम् अलं पवित्रं । धन्यं यशस्यं पदम् आयुर्-आशिषाम्
03190382 प्राणेन्द्रियाणां युधि शौर्य-वर्धनं । नारायणोऽन्ते गतिरङ्ग शृण्वताम्

Chapter 20

0320001 शौनक उवाच
03200011 महीं प्रतिष्ठाम् अध्यस्य सौते स्वायम्भुवो मनुः
03200012 कान्यन्वतिष्ठद्द्वाराणि मार्गायावर-जन्मनाम्
03200021 क्षत्ता महा-भागवतः कृष्णस्यैकान्तिकः सुहृत्
03200022 यस्तत्याजाग्रजं कृष्णे सापत्यम् अघवान् इति
03200031 द्वैपायनादनवरो महित्वे तस्य देहजः
03200032 सर्वात्मना श्रितः कृष्णं तत्-परांश्चाप्यनुव्रतः
03200041 किम् अन्वपृच्छन् मैत्रेयं विरजास्तीर्थ-सेवया
03200042 उपगम्य कुशावर्त आसीनं तत्त्व-वित्तमम्
03200051 तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः
03200052 आपो गाङ्गा इवाघ-घ्नीर्हरेः पादाम्बुजाश्रयाः
03200061 ता नः कीर्तय भद्रं ते कीर्तन्योदार-कर्मणः
03200062 रसज्ञः को नु तृप्येत हरि-लीलामृतं पिबन्
03200071 एवम् उग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः
03200072 भगवत्यर्पिताध्यात्मस्तान् आह श्रूयताम् इति
0320008 सूत उवाच
03200081 हरेर्धृत-क्रोड-तनोः स्व-मायया । निशम्य गोरुद्धरणं रसातलात्
03200082 लीलां हिरण्याक्षम् अवज्ञया हतं । सञ्जात-हर्षो मुनिम् आह भारतः
0320009 विदुर उवाच
03200091 प्रजापति-पतिः सृष्ट्वा प्रजा-सर्गे प्रजापतीन्
03200092 किम् आरभत मे ब्रह्मन् प्रब्रूह्यव्यक्त-मार्ग-वित्
03200101 ये मरीच्य्-आदयो विप्रा यस्तु स्वायम्भुवो मनुः
03200102 ते वै ब्रह्मण आदेशात् कथम् एतदभावयन्
03200111 स-द्वितीयाः किम् असृजन् स्वतन्त्रा उत कर्मसु
03200112 आहो स्वित् संहताः सर्व इदं स्म समकल्पयन्
0320012 मैत्रेय उवाच
03200121 दैवेन दुर्वितर्क्येण परेणानिमिषेण च
03200122 जात-क्षोभाद्भगवतो महान् आसीद्गुण-त्रयात्

03200131 रजः-प्रधानान् महतस्त्रि-लिङ्गो दैव-चोदितात्
03200132 जातः ससर्ज भूतादिर्वियद्-आदीनि पञ्चशः
03200141 तानि चैकैकशः स्रष्टुम् असमर्थानि भौतिकम्
03200142 संहत्य दैव-योगेन हैमम् अण्डम् अवासृजन्
03200151 सोऽशयिष्टाब्धि-सलिले आण्डकोशो निरात्मकः
03200152 साग्रं वै वर्ष-साहस्रम् अन्ववात्सीत् तम् ईश्वरः
03200161 तस्य नाभेरभूत् पद्मं सहस्रार्कोरु-दीधिति
03200162 सर्व-जीवनिकायौको यत्र स्वयम् अभूत् स्वराट्
03200171 सोऽनुविष्टो भगवता यः शेते सलिलाशये
03200172 लोक-संस्थां यथा पूर्वं निर्ममे संस्थया स्वया
03200181 ससर्ज च्छाययाविद्यां पञ्च-पर्वाणम् अग्रतः
03200182 तामिस्रम् अन्ध-तामिस्रं तमो मोहो महा-तमः
03200191 विससर्जात्मनः कायं नाभिनन्दंस्तमोमयम्
03200192 जगृहुर्यक्ष-रक्षांसि रात्रिं क्षुत्-तृट्-समुद्भवाम्
03200201 क्षुत्-तृड्भ्याम् उपसृष्टास्ते तं जग्धुम् अभिदुद्रुवुः
03200202 मा रक्षतैनं जक्षध्वम् इत्यूचुः क्षुत्-तृड्-अर्दिताः
03200211 देवस्तान् आह संविग्नो मा मां जक्षत रक्षत
03200212 अहो मे यक्ष-रक्षांसि प्रजा यूयं बभूविथ
03200221 देवताः प्रभया या या दीव्यन् प्रमुखतोऽसृजत्
03200222 ते अहार्षुर्देवयन्तो विसृष्टां तां प्रभाम् अहः
03200231 देवोऽदेवा' जघनतः सृजति स्मातिलोलुपान्
03200232 त एनं लोलुपतया मैथुनायाभिपेदिरे
03200241 ततो हसन् स भगवान् असुरैर्निरपत्रपैः
03200242 अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत्
03200251 स उपव्रज्य वरदं प्रपन्नार्ति-हरं हरिम्
03200252 अनुग्रहाय भक्तानाम् अनुरूपात्म-दर्शनम्
03200261 पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः
03200262 ता इमा यभितुं पापा उपाक्रामन्ति मां प्रभो
03200271 त्वम् एकः किल लोकानां क्लिष्टानां क्लेश-नाशनः
03200272 त्वम् एकः क्लेशदस्तेषाम् अनासन्न-पदां तव
03200281 सोऽवधार्यास्य कार्पण्यं विविक्providingाध्यात्म-दर्शनः
03200282 विमुञ्चात्म-तनुं घोराम् इत्युक्तो विमुमोच ह
03200291 तां क्वणच्-चरणाम्भोजां मद-विह्वल-लोचनाम्
03200292 काञ्ची-कलाप-विलसद्- दुकूल-च्छन्न-रोधसम्
03200301 अन्योन्य-श्लेषयोत्तुङ्ग- निरन्तर-पयोधराम्
03200302 सुनासां सुद्विजां स्निग्ध- हास-लीलावलोकनाम्
03200311 गूहन्तीं व्रीडयात्मानं नीलालक-वरूथिनीम्
03200312 उपलभ्यासुरा धर्म सर्वे सम्मुमुहुः स्त्रियम्
03200321 अहो रूपम् अहो धैर्यम् अहो अस्या नवं वयः
03200322 मध्ये कामयमानानाम् अकामेव विसर्पति

03200331 वितर्कयन्तो बहुधा तां सन्ध्यां प्रमदाकृतिम्
03200332 अभिसम्भाव्य विश्रम्भात् पर्यपृच्छन् कुमेधसः
03200341 कासि कस्यासि रम्भोरु को वार्थस्तेऽत्र भामिनि
03200342 रूप-द्रविण-पण्येन दुर्भगान् नो विबाधसे
03200351 या वा काचित् त्वम् अबले दिष्ट्या सन्दर्शनं तव
03200352 उत्सुनोषीक्षमाणानां कन्दुक-क्रीडया मनः
03200361 नैकत्र ते जयति शालिनि पाद-पद्मं
03200362 घ्नन्त्या मुहुः कर-तलेन पतत्-पतङ्गम्
03200363 मध्यं विषीदति बृहत्-स्तन-भार-भीतं
03200364 शान्तेव दृष्टिरमला सुशिखा-समूहः
03200371 इति सायन्तनीं सन्ध्याम् असुराः प्रमदायतीम्
03200372 प्रलोभयन्तीं जगृहुर्मत्वा मूढ-धियः स्त्रियम्
03200381 प्रहस्य भाव-गम्भीरं जिघ्रन्त्यात्मानम् आत्मना
03200382 कान्त्या ससर्ज भगवान् गन्धर्वाप्सरसां गणान्
03200391 विससर्ज तनुं तां वै ज्योत्स्नां कान्तिमतीं प्रियाम्
03200392 त एव चाददुः प्रीत्या विश्वावसु-पुरोगमाः
03200401 सृष्ट्वा भूत-पिशाचांश्च भगवान् आत्म-तन्द्रिणा
03200402 दिग्-वाससो मुक्त-केशान् वीक्ष्य चामीलयद्दृशौ
03200411 जगृहुस्तद्-विसृष्टां तां जृम्भणाख्यां तनुं प्रभोः
03200412 निद्राम् इन्द्रिय-विक्लेदो यया भूतेषु दृश्यते
03200413 येनोच्छिष्टान् धर्षयन्ति तम् उन्मादं प्रचक्षते
03200421 ऊर्जस्वन्तं मन्यमान आत्मानं भगवान् अजः
03200422 साध्यान् गणान् पितृ-गणान् परोक्षेणासृजत् प्रभुः
03200431 त आत्म-सर्गं तं कायं पितरः प्रतिपेदिरे
03200432 साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते
03200441 सिद्धान् विद्याधरांश्चैव तिरोधानेन सोऽसृजत्
03200442 तेभ्योऽददात् तम् आत्मानम् अन्तर्धानाख्यम् अद्भुतम्
03200451 स किन्नरान् किम्पुरुषान् प्रत्यात्म्येनासृजत् प्रभुः
03200452 मानयन्न् आत्मनात्मानम् आत्माभासं विलोकयन्
03200461 ते तु तज् जगृहू रूपं त्यक्तं यत् परमेष्ठिना
03200462 मिथुनी-भूय गायन्तस्तम् एवोषसि कर्मभिः
03200471 देहेन वै भोगवता शयानो बहु-चिन्तया
03200472 सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः
03200481 येऽहीयन्तामुतः केशा अहयस्तेऽङ्ग जज्ञिरे
03200482 सर्पाः प्रसर्पतः क्रूरा नागा भोगोरु-कन्धराः
03200491 स आत्मानं मन्यमानः कृत-कृत्यम् इवात्मभूः
03200492 तदा मनून् ससर्जान्ते मनसा लोक-भावनान्
03200501 तेभ्यः सोऽसृजत् स्वीयं पुरं पुरुषम् आत्मवान्
03200502 तान् दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम्
03200511 अहो एतज् जगत्-स्रष्टः सुकृतं बत ते कृतम्

03200512 प्रतिष्ठिताः क्रिया यस्मिन् साकम् अन्नम् अदाम हे
03200521 तपसा विद्यया युक्तो योगेन सुसमाधिना
03200522 ऋषीन् ऋषिर्हृषीकेशः ससर्जाभिमताः प्रजाः
03200531 तेभ्यश्चैकैकशः स्वस्य देहस्यांशम् अदादजः
03200532 यत् तत् समाधि-योगर्द्धि- तपो-विद्या-विरक्तिमत्

Chapter 21

0321001 विदुर उवाच
03210011 स्वायम्भुवस्य च मनोरंशः परम-सम्मतः
03210012 कथ्यतां भगवन् यत्र मैथुनेनैधिरे प्रजाः
03210021 प्रियव्रतोत्तानपादौ सुतौ स्वायम्भुवस्य वै
03210022 यथा-धर्मं जुगुपतुः सप्त-द्वीपवतीं महीम्
03210031 तस्य वै दुहिता ब्रह्मन् देवहूतीति विश्रुता
03210032 पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ
03210041 तस्यां स वै महा-योगी युक्तायां योग-लक्षणैः
03210042 ससर्ज कतिधा वीर्यं तन् मे शुश्रूषवे वद
03210051 रुचिर्यो भगवान् ब्रह्मन् दक्षो वा ब्रह्मणः सुतः
03210052 यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीम्
0321006 मैत्रेय उवाच
03210061 प्रजाः सृजेति भगवान् कर्दमो ब्रह्मणोदितः
03210062 सरस्वत्यां तपस्तेपे सहस्राणां समा दश
03210071 ततः समाधि-युक्तेन क्रिया-योगेन कर्दमः
03210072 सम्प्रपेदे हरिं भक्त्या प्रपन्न-वरदाशुषम्
03210081 तावत् प्रसन्नो भगवान् पुष्कराक्षः कृते युगे
03210082 दर्शयाम् आस तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः
03210091 स तं विरजम् अर्काभं सित-पद्मोत्पल-स्रजम्
03210092 स्निग्ध-नीलालक-व्रात- वक्त्राब्जं विरजोऽम्बरम्
03210101 किरीटिनं कुण्डलिनं शङ्ख-चक्र-गदा-धरम्
03210102 श्वेतोत्पल-क्रीडनकं मनः-स्पर्श-स्मितेक्षणम्
03210111 विन्यस्त-चरणाम्भोजम् अंस-देशे गरुत्मतः
03210112 दृष्ट्वा खेऽवस्थितं वक्षः- श्रियं कौस्तुभ-कन्धरम्
03210121 जात-हर्षोऽपतन् मूर्ध्ना क्षितौ लब्ध-मनोरथः
03210122 गीर्भिस्त्वभ्यगृणात् प्रीति- स्वभावात्मा कृताञ्जलिः
0321013 ऋषिरुवाच
03210131 जुष्टं बताद्याखिल-सत्त्व-राशेः ।सांसिद्ध्यम् अक्ष्णोस्तव दर्शनान् नः

03210132 यद्-दर्शनं जन्मभिरीड्य सद्भिर् ।आशासते योगिनो रूढ-योगाः
03210141 ये मायया ते हत-मेधसस्त्वत्- ।पादारविन्दं भव-सिन्धु-पोतम्
03210142 उपासते काम-लवाय तेषां ।रासीश कामान् निरयेऽपि ये स्युः
03210151 तथा स चाहं परिवोढु-कामः ।समान-शीलां गृहमेध-धेनुम्
03210152 उपेयिवान् मूलम् अशेष-मूलं ।दुराशयः काम-दुघाङ्घ्रिपस्य
03210161 प्रजापतेस्ते वचसाधीश तन्त्या ।लोकः किलायं काम-हतोऽनुबद्धः
03210162 अहं च लोकानुगतो वहामि ।बलिं च शुक्लानिमिषाय तुभ्यम्
03210171 लोकांश्च लोकानुगतान् पशूंश्च ।हित्वा श्रितास्ते चरणातपत्रम्
03210172 परस्परं त्वद्-गुण-वाद-सीधु- ।पीयूष-निर्यापित-देह-धर्माः
03210181 न ते ऽजराक्ष-भ्रमिरायुरेषां ।त्रयोदशारं त्रि-शतं षष्टि-पर्व
03210182 षण्-नेम्यनन्त-च्छदि यत् त्रि-णाभि ।कराल-स्रोतो जगदाच्छिद्य धावत्
03210191 एकः स्वयं सन् जगतः सिसृक्षया- ।द्वितीययात्मन्न् अधि-योगमायया
03210192 सृजस्यदः पासि पुनर्ग्रसिष्यसे ।यथोर्ण-नाभिर्भगवन् स्व-शक्तिभिः
03210201 नैतद्बताधीश पदं तवेप्सितं ।यन् मायया नस्तनुषे भूत-सूक्ष्मम्
03210202 अनुग्रहायास्त्वपि यर्हि मायया ।लसत्-तुलस्या भगवान् विलक्षितः
03210211 तं त्वानुभूत्योपरत-क्रियार्थं ।स्व-मायया वर्तित-लोक-तन्त्रम्
03210212 नमाम्यभीक्ष्णं नमनीय-पाद- ।सरोजम् अल्पीयसि काम-वर्षम्
0321022 ऋषिरुवाच
03210221 इत्यव्यलीकं प्रणुतोऽब्ज-नाभस् ।तम् आबभाषे वचसामृतेन
03210222 सुपर्ण-पक्षोपरि रोचमानः ।प्रेम-स्मितोद्वीक्षण-विभ्रमद्-भ्रूः
0321023 श्री-भगवान् उवाच
03210231 विदित्वा तव चैत्यं मे पुरैव समयोजि तत्
03210232 यद्-अर्थम् आत्म-नियमैस्त्वयैवाहं समर्चितः
03210241 न वै जातु मृषैव स्यात् प्रजाध्यक्ष मद्-अर्हणम्
03210242 भवद्-विधेष्वतितरां मयि सङ्गृभितात्मनाम्
03210251 प्रजापति-सुतः सम्राण् मनुर्विख्यात-मङ्गलः
03210252 ब्रह्मावर्तं योऽधिवसन् शास्ति सप्तार्णवां महीम्
03210261 स चेह विप्र राजर्षिर्महिष्या शतरूपया
03210262 आयास्यति दिदृक्षुस्त्वां परश्वो धर्म-कोविदः
03210271 आत्मजाम् असितापाङ्गीं वयः-शील-गुणान्विताम्
03210272 मृगयन्तीं पतिं दास्यत्यनुरूपाय ते प्रभो
03210281 समाहितं ते हृदयं यत्रेमान् परिवत्सरान्
03210282 सा त्वां ब्रह्मन् नृप-वधूः कामम् आशु भजिष्यति
03210291 या त आत्म-भृतं वीर्यं नवधा प्रसविष्यति
03210292 वीर्ये त्वदीये ऋषय आधास्यन्त्यञ्जसात्मनः
03210301 त्वं च सम्यग् अनुष्ठाय निदेशं म उशत्तमः
03210302 मयि तीर्थी-कृताशेष- क्रियार्थो मां प्रपत्स्यसे
03210311 कृत्वा दयां च जीवेषु दत्त्वा चाभयम् आत्मवान्
03210312 मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि माम्

03210321 सहाहं स्वांश-कलया त्वद्-वीर्येण महा-मुने
03210322 तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्व-संहिताम्
0321033 मैत्रेय उवाच
03210331 एवं तम् अनुभाष्याथ भगवान् प्रत्यग्-अक्षजः
03210332 जगाम बिन्दुसरसः सरस्वत्या परिश्रितात्
03210341 निरीक्षतस्तस्य ययावशेष- ।सिद्धेश्वराभिष्टुत-सिद्ध-मार्गः
03210342 आकर्णयन् पत्र-रथेन्द्र-पक्षैर् ।उच्चारितं स्तोमम् उदीर्ण-साम
03210351 अथ सम्प्रस्थिते शुक्ले कर्दमो भगवान् ऋषिः
03210352 आस्ते स्म बिन्दुसरसि तं कालं प्रतिपालयन्
03210361 मनुः स्यन्दनम् आस्थाय शातकौम्भ-परिच्छदम्
03210362 आरोप्य स्वां दुहितरं स-भार्यः पर्यटन् महीम्
03210371 तस्मिन् सुधन्वन्न् अहनि भगवान् यत् समादिशत्
03210372 उपायादाश्रम-पदं मुनेः शान्त-व्रतस्य तत्
03210381 यस्मिन् भगवतो नेत्रान् न्यपतन्न् अश्रु-बिन्दवः
03210382 कृपया सम्परीतस्य प्रपन्नेऽर्पितया भृशम्
03210391 तद्वै बिन्दुसरो नाम सरस्वत्या परिप्लुतम्
03210392 पुण्यं शिवामृत-जलं महर्षि-गण-सेवितम्
03210401 पुण्य-द्रुम-लता-जालैः कूजत्-पुण्य-मृग-द्विजैः
03210402 सर्वर्तु-फल-पुष्पाढ्यं वन-राजि-श्रियान्वितम्
03210411 मत्त-द्विज-गणैर्घुष्टं मत्त-भ्रमर-विभ्रमम्
03210412 मत्त-बर्हि-नटाटोपम् आह्वयन्-मत्त-कोकिलम्
03210421 कदम्ब-चम्पकाशोक- करञ्ज-बकुलासनैः
03210422 कुन्द-मन्दार-कुटजैश्चूत-पोतैरलङ्कृतम्
03210431 कारण्डवैः प्लवैर्हंसैः कुररैर्जल-कुक्कुटैः
03210432 सारसैश्चक्रवाकैश्च चकोरैर्वल्गु कूजितम्
03210441 तथैव हरिणैः क्रोडैः श्वाविद्-गवय-कुञ्जरैः
03210442 गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम्
03210451 प्रविश्य तत् तीर्थ-वरम् आदि-राजः सहात्मजः
03210452 ददर्श मुनिम् आसीनं तस्मिन् हुत-हुताशनम्
03210461 विद्योतमानं वपुषा तपस्युग्र-युजा चिरम्
03210462 नातिक्षामं भगवतः स्निग्धापाङ्गावलोकनात्
03210463 तद्-व्याहृतामृत-कला- पीयूष-श्रवणेन च
03210471 प्रांशुं पद्म-पलाशाक्षं जटिलं चीर-वाससम्
03210472 उपसंश्रित्य मलिनं यथार्हणम् असंस्कृतम्
03210481 अथोटजम् उपायातं नृदेवं प्रणतं पुरः
03210482 सपर्यया पर्यगृह्णात् प्रतिनन्द्यानुरूपया
03210491 गृहीतार्हणम् आसीनं संयतं प्रीणयन् मुनिः
03210492 स्मरन् भगवद्-आदेशम् इत्याह श्लक्ष्णया गिरा
03210501 नूनं चङ्क्रमणं देव सतां संरक्षणाय ते

03210502 वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी
03210511 योऽर्केन्दु-अग्नीन्द्र-वायूनां यम-धर्म-प्रचेतसाम्
03210512 रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः
03210521 न यदा रथम् आस्थाय जैत्रं मणि-गणार्पितम्
03210522 विस्फूर्जच्-चण्ड-कोदण्डो रथेन त्रासयन्न् अघान्
03210531 स्व-सैन्य-चरण-क्षुण्णं वेपयन् मण्डलं भुवः
03210532 विकर्षन् बृहतीं सेनां पर्यटस्यंशुमान् इव
03210541 तदैव सेतवः सर्वे वर्णाश्रम-निबन्धनाः
03210542 भगवद्-रचिता राजन् भिद्येरन् बत दस्युभिः
03210551 अधर्मश्च समेधेत लोलुपैर्व्यङ्कुशैर्नृभिः
03210552 शयाने त्वयि लोकोऽयं दस्यु-ग्रस्तो विनङ्क्ष्यति
03210561 अथापि पृच्छे त्वां वीर यद्-अर्थं त्वम् इहागतः
03210562 तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा

Chapter 22

0322001 मैत्रेय उवाच
03220011 एवम् आविष्कृताशेष- गुण-कर्मोदयो मुनिम्
03220012 सव्रीड इव तं सम्राडुपारतम् उवाच ह
0322002 मनुरुवाच
03220021 ब्रह्मासृजत् स्व-मुखतो युष्मान् आत्म-परीप्सया
03220022 छन्दोमयस्तपो-विद्या- योग-युक्तान् अलम्पटान्
03220031 तत्-त्राणायासृजच् चास्मान् दोः-सहस्रात् सहस्र-पात्
03220032 हृदयं तस्य हि ब्रह्म क्षत्रम् अङ्गं प्रचक्षते
03220041 अतो ह्यन्योन्यम् आत्मानं ब्रह्म क्षत्रं च रक्षतः
03220042 रक्षति स्माव्ययो देवः स यः सद्-असद्-आत्मकः
03220051 तव सन्दर्शनादेव च्छिन्ना मे सर्व-संशयाः
03220052 यत् स्वयं भगवान् प्रीत्या धर्मम् आह रिरक्षिषोः
03220061 दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो योऽकृतात्मनाम्
03220062 दिष्ट्या पाद-रजः स्पृष्टं शीर्ष्णा मे भवतः शिवम्
03220071 दिष्ट्या त्वयानुशिष्टोऽहं कृतश्चानुग्रहो महान्
03220072 अपावृतैः कर्ण-रन्ध्रैर्जुष्टा दिष्ट्योशतीर्गिरः
03220081 स भवान् दुहितृ-स्नेह- परिक्लिष्टात्मनो मम
03220082 श्रोतुम् अर्हसि दीनस्य श्रावितं कृपया मुने
03220091 प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम
03220092 अन्विच्छति पतिं युक्तं वयः-शील-गुणादिभिः
03220101 यदा तु भवतः शील- श्रुत-रूप-वयो-गुणान्
03220102 अशृणोन् नारदादेषा त्वय्यासीत् कृत-निश्चया
03220111 तत् प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपहृतां मया
03220112 सर्वात्मनानुरूपां ते गृहमेधिषु कर्मसु
03220121 उद्यतस्य हि कामस्य प्रतिवादो न शस्यते
03220122 अपि निर्मुक्त-सङ्गस्य काम-रक्तस्य किं पुनः
03220131 य उद्यतम् अनादृत्य कीनाशम् अभियाचते
03220132 क्षीयते तद्-यशः स्फीतं मानश्चावज्ञया हतः

03220141 अहं त्वाशृणवं विद्वन् विवाहार्थं समुद्यतम्
03220142 अतस्त्वम् उपकुर्वाणः प्रत्तां प्रतिगृहाण मे
0322015 ऋषिरुवाच
03220151 बाढम् उद्वोढु-कामोऽहम् अप्रत्ता च तवात्मजा
03220152 आवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः
03220161 कामः स भूयान् नरदेव तेऽस्याः ।पुत्र्याः समाम्नाय-विधौ प्रतीतः
03220162 क एव ते तनयां नाद्रियेत ।स्वयैव कान्त्या क्षिपतीम् इव श्रियम्
03220171 यां हर्म्य-पृष्ठे क्वणद्-अङ्घ्रि-शोभां ।विक्रीडतीं कन्दुक-विह्वलाक्षीम्
03220172 विश्वावसुर्न्यपतत् स्वाद्विमानाद् ।विलोक्य सम्मोह-विमूढ-चेताः
03220181 तां प्रार्थयन्तीं ललना-ललामम् ।असेवित-श्री-चरणैरदृष्टाम्
03220182 वत्सां मनोरुच्चपदः स्वसारं ।को नानुमन्येत बुधोऽभियाताम्
03220191 अतो भजिष्ये समयेन साध्वीं ।यावत् तेजो बिभृयादात्मनो मे
03220192 अतो धर्मान् पारमहंस्य-मुख्यान् ।शुक्ल-प्रोक्तान् बहु मन्येऽविहिंस्रान्
03220201 यतोऽभवद्विश्वम् इदं विचित्रं ।संस्थास्यते यत्र च वावतिष्ठते
03220202 प्रजापतीनां पतिरेष मह्यं ।परं प्रमाणं भगवान् अनन्तः
0322021 मैत्रेय उवाच
03220211 स उग्र-धन्वन्न् इयदेवाबभाषे ।आसीच् च तूष्णीम् अरविन्द-नाभम्
03220212 धियोपगृह्णन् स्मित-शोभितेन ।मुखेन चेतो लुलुभे देवहूत्याः
03220221 सोऽनु ज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटम्
03220222 तस्मै गुण-गणाढ्याय ददौ तुल्यां प्रहर्षितः
03220231 शतरूपा महा-राज्ञी पारिबर्हान् महा-धनान्
03220232 दम्पत्योः पर्यदात् प्रीत्या भूषा-वासः परिच्छदान्
03220241 प्रत्तां दुहितरं सम्राट् सदृक्षाय गत-व्यथः
03220242 उपगुह्य च बाहुभ्याम् औत्कण्ठ्योन्मथिताशयः
03220251 अशक्नुवंस्तद्-विरहं मुञ्चन् बाष्प-कलां मुहुः
03220252 आसिञ्चदम्ब वत्सेति नेत्रोदैर्दुहितुः शिखाः
03220261 आमन्त्र्य तं मुनि-वरम् अनुज्ञातः सहानुगः
03220262 प्रतस्थे रथम् आरुह्य सभार्यः स्व-पुरं नृपः
03220271 उभयोर्ऋषि-कुल्यायाः सरस्वत्याः सुरोधसोः
03220272 ऋषीणाम् उपशान्तानां पश्यन्न् आश्रम-सम्पदः
03220281 तम् आयान्तम् अभिप्रेत्य ब्रह्मावर्तात् प्रजाः पतिम्
03220282 गीत-संस्तुति-वादित्रैः प्रत्युदीयुः प्रहर्षिताः
03220291 बर्हिष्मती नाम पुरी सर्व-सम्पत्-समन्विता
03220292 न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः
03220301 कुशाः काशास्त एवासन् शश्वद्-धरित-वर्चसः
03220302 ऋषयो यैः पराभाव्य यज्ञ-घ्नान् यज्ञम् ईजिरे
03220311 कुश-काशमयं बर्हिरास्तीर्य भगवान् मनुः
03220312 अयजद्यज्ञ-पुरुषं लब्धा स्थानं यतो भुवम्
03220321 बर्हिष्मतीं नाम विभुर्यां निर्विश्य समावसत्
03220322 तस्यां प्रविष्टो भवनं ताप-त्रय-विनाशनम्

03220331 सभार्यः सप्रजः कामान् बुभुजेऽन्याविरोधतः
03220332 सङ्गीयमान-सत्-कीर्तिः सस्त्रीभिः सुर-गायकैः
03220333 प्रत्य्-ऊषेष्वनुबद्धेन हृदा शृण्वन् हरेः कथाः
03220341 निष्णातं योगमायासु मुनिं स्वायम्भुवं मनुम्
03220342 यदाभ्रंशयितुं भोगा न शेकुर्भगवत्-परम्
03220351 अयात-यामास्तस्यासन् यामाः स्वान्तर-यापनाः
03220352 शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः
03220361 स एवं स्वान्तरं निन्ये युगानाम् एक-सप्ततिम्
03220362 वासुदेव-प्रसङ्गेन परिभूत-गति-त्रयः
03220371 शारीरा मानसा दिव्या वैयासे ये च मानुषाः
03220372 भौतिकाश्च कथं क्लेशा बाधन्ते हरि-संश्रयम्
03220381 यः पृष्टो मुनिभिः प्राह धर्मान् नाना-विधान् छुभान्
03220382 नृणां वर्णाश्रमाणां च सर्व-भूत-हितः सदा
03220391 एतत् त आदि-राजस्य मनोश्चरितम् अद्भुतम्
03220392 वर्णितं वर्णनीयस्य तद्-अपत्योदयं शृणु

Chapter 23

0323001 मैत्रेय उवाच
03230011 पितृभ्यां प्रस्थिते साध्वी पतिम् इङ्गित-कोविदा
03230012 नित्यं पर्यचरत् प्रीत्या भवानीव भवं प्रभुम्
03230021 विश्रम्भेणात्म-शौचेन गौरवेण दमेन च
03230022 शुश्रूषया सौहृदेन वाचा मधुरया च भोः
03230031 विसृज्य कामं दम्भं च द्वेषं लोभम् अघं मदम्
03230032 अप्रमत्तोद्यता नित्यं तेजीयांसम् अतोषयत्
03230041 स वै देवर्षि-वर्यस्तां मानवीं समनुव्रताम्
03230042 दैवाद्गरीयसः पत्युराशासानां महाशिषः
03230051 कालेन भूयसा क्षामां कर्शितां व्रत-चर्यया
03230052 प्रेम-गद्गदया वाचा पीडितः कृपयाब्रवीत्
0323006 कर्दम उवाच
03230061 तुष्टोऽहम् अद्य तव मानवि मानदायाः
03230062 शुश्रूषया परमया परया च भक्त्या
03230063 यो देहिनाम् अयम् अतीव सुहृत् स देहो
03230064 नावेक्षितः समुचितः क्षपितुं मद्-अर्थे
03230071 ये मे स्व-धर्म-निरतस्य तपः-समाधि-
03230072 विद्यात्म-योग-विजिता भगवत्-प्रसादाः
03230073 तान् एव ते मद्-अनुसेवनयावरुद्धान्
03230074 दृष्टिं प्रपश्य वितराम्यभयान् अशोकान्
03230081 अन्ये पुनर्भगवतो भ्रुव उद्विजृम्भ-
03230082 विभ्रंशितार्थ-रचनाः किम् उरुक्रमस्य
03230083 सिद्धासि भुङ्क्ष्व विभवान् निज-धर्म-दोहान्
03230084 दिव्यान् नरैर्दुरधिगान् नृप-विक्रियाभिः
03230091 एवं ब्रुवाणम् अबलाखिल-योगमाया-
03230092 विद्या-विचक्षणम् अवेक्ष्य गताधिरासीत्
03230093 सम्प्रश्रय-प्रणय-विह्वलया गिरेषद्-
03230094 व्रीडावलोक-विलसद्-धसिताननाह

0323010 देवहूतिरुवाच
03230101 राद्धं बत द्विज-वृषैतदमोघ-योग-
03230102 मायाधिपे त्वयि विभो तदवैमि भर्तः
03230103 यस्तेऽभ्यधायि समयः सकृदङ्ग-सङ्गो
03230104 भूयाद्गरीयसि गुणः प्रसवः सतीनाम्
03230111 तत्रेति-कृत्यम् उपशिक्ष यथोपदेशं
03230112 येनैष मे कर्शितोऽतिरिरंसयात्मा
03230113 सिद्ध्येत ते कृत-मनोभव-धर्षिताया
03230114 दीनस्तदीश भवनं सदृशं विचक्ष्व
0323012 मैत्रेय उवाच
03230121 प्रियायाः प्रियम् अन्विच्छन् कर्दमो योगम् आस्थितः
03230122 विमानं काम-गं क्षत्तस्तर्ह्येवाविरचीकरत्
03230131 सर्व-काम-दुघं दिव्यं सर्व-रत्न-समन्वितम्
03230132 सर्वर्द्धि-उपचयोदर्कं मणि-स्तम्भैरुपस्कृतम्
03230141 दिव्योपकरणोपेतं सर्व-काल-सुखावहम्
03230142 पट्टिकाभिः पताकाभिर्विचित्राभिरलङ्कृतम्
03230151 स्रग्भिर्विचित्र-माल्याभिर्मञ्जु-शिञ्जत्-षड्-अङ्घ्रिभिः
03230152 दुकूल-क्षौम-कौशेयैर्नाना-वस्त्रैर्विराजितम्
03230161 उपर्युपरि विन्यस्त- निलयेषु पृथक् पृथक्
03230162 क्षिप्तैः कशिपुभिः कान्तं पर्यङ्क-व्यजनासनैः
03230171 तत्र तत्र विनिक्षिप्त- नाना-शिल्पोपशोभितम्
03230172 महा-मरकत-स्थल्या जुष्टं विद्रुम-वेदिभिः
03230181 द्वाःसु विद्रुम-देहल्या भातं वज्र-कपाटवत्
03230182 शिखरेष्विन्द्रनीलेषु हेम-कुम्भैरधिश्रितम्
03230191 चक्षुष्मत् पद्मरागाग्र्यैर्वज्र-भित्तिषु निर्मितैः
03230192 जुष्टं विचित्र-वैतानैर्महार्हैर्हेम-तोरणैः
03230201 हंस-पारावत-व्रातैस्तत्र तत्र निकूजितम्
03230202 कृत्रिमान् मन्यमानैः स्वान् अधिरुह्याधिरुह्य च
03230211 विहार-स्थान-विश्राम- संवेश-प्राङ्गणाजिरैः
03230212 यथोपजोषं रचितैर्विस्मापनम् इवात्मनः
03230221 ईदृग् गृहं तत् पश्यन्तीं नातिप्रीतेन चेतसा
03230222 सर्व-भूताशयाभिज्ञः प्रावोचत् कर्दमः स्वयम्
03230231 निमज्ज्यास्मिन् ह्रदे भीरु विमानम् इदम् आरुह
03230232 इदं शुक्ल-कृतं तीर्थम् आशिषां यापकं नृणाम्
03230241 सा तद्भर्तुः समादाय वचः कुवलयेक्षणा
03230242 सरजं बिभ्रती वासो वेणी-भूतांश्च मूर्धजान्
03230251 अङ्गं च मल-पङ्केन सञ्छन्नं शबल-स्तनम्
03230252 आविवेश सरस्वत्याः सरः शिव-जलाशयम्
03230261 सान्तः सरसि वेश्म-स्थाः शतानि दश कन्यकाः

03230262 सर्वाः किशोर-वयसो ददर्शोत्पल-गन्धयः
03230271 तां दृष्ट्वा सहसोत्थाय प्रोचुः प्राञ्जलयः स्त्रियः
03230272 वयं कर्म-करीस्तुभ्यं शाधि नः करवाम किम्
03230281 स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीम्
03230282 दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः
03230291 भूषणानि परार्ध्यानि वरीयांसि द्युमन्ति च
03230292 अन्नं सर्व-गुणोपेतं पानं चैवामृतासवम्
03230301 अथादर्शे स्वम् आत्मानं स्रग्विणं विरजाम्बरम्
03230302 विरजं कृत-स्वस्त्ययनं कन्याभिर्बहु-मानितम्
03230311 स्नातं कृत-शिरः-स्नानं सर्वाभरण-भूषितम्
03230312 निष्क-ग्रीवं वलयिनं कूजत्-काञ्चन-नूपुरम्
03230321 श्रोण्योरध्यस्तया काञ्च्या काञ्चन्या बहु-रत्नया
03230322 हारेण च महार्हेण रुचकेन च भूषितम्
03230331 सुदता सुभ्रुवा श्लक्ष्ण- स्निग्धापाङ्गेन चक्षुषा
03230332 पद्म-कोश-स्पृधा नीलैरलकैश्च लसन्-मुखम्
03230341 यदा सस्मार ऋषभम् ऋषीणां दयितं पतिम्
03230342 तत्र चास्ते सह स्त्रीभिर्यत्रास्ते स प्रजापतिः
03230351 भर्तुः पुरस्तादात्मानं स्त्री-सहस्र-वृतं तदा
03230352 निशाम्य तद्-योग-गतिं संशयं प्रत्यपद्यत
03230361 स तां कृत-मल-स्नानां विभ्राजन्तीम् अपूर्ववत्
03230362 आत्मनो बिभ्रतीं रूपं संवीत-रुचिर-स्तनीम्
03230371 विद्याधरी-सहस्रेण सेव्यमानां सुवाससम्
03230372 जात-भावो विमानं तदारोहयदमित्र-हन्
03230381 तस्मिन्न् अलुप्त-महिमा प्रिययानुरक्तो
03230382 विद्याधरीभिरुपचीर्ण-वपुर्विमाने
03230383 बभ्राज उत्कच-कुमुद्-गणवान् अपीच्यस्
03230384 ताराभिरावृत इवोडु-पतिर्नभः-स्थः
03230391 तेनाष्ट-लोकप-विहार-कुलाचलेन्द्र-
03230392 द्रोणीष्वनङ्ग-सख-मारुत-सौभगासु
03230393 सिद्धैर्नुतो द्युधुनि-पात-शिव-स्वनासु
03230394 रेमे चिरं धनदवल्-ललना-वरूथी
03230401 वैश्रम्भके सुरसने नन्दने पुष्पभद्रके
03230402 मानसे चैत्ररथ्ये च स रेमे रामया रतः
03230411 भ्राजिष्णुना विमानेन काम-गेन महीयसा
03230412 वैमानिकान् अत्यशेत चरल् लोकान् यथानिलः
03230421 किं दुरापादनं तेषां पुंसाम् उद्दाम-चेतसाम्
03230422 यैराश्रितस्तीर्थ-पदश्चरणो व्यसनात्ययः
03230431 प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्व-संस्थया
03230432 बह्व्-आश्चर्यं महा-योगी स्वाश्रमाय न्यवर्तत

03230441 विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम्
03230442 रामां निरमयन् रेमे वर्ष-पूगान् मुहूर्तवत्
03230451 तस्मिन् विमान उत्कृष्टां शय्यां रति-करीं श्रिता
03230452 न चाबुध्यत तं कालं पत्यापीच्येन सङ्गता
03230461 एवं योगानुभावेन दम्-पत्यो रममाणयोः
03230462 शतं व्यतीयुः शरदः काम-लालसयोर्मनाक्
03230471 तस्याम् आधत्त रेतस्तां भावयन्न् आत्मनात्म-वित्
03230472 नोधा विधाय रूपं स्वं सर्व-सङ्कल्प-विद्विभुः
03230481 अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः
03230482 सर्वास्ताश्चारु-सर्वाङ्ग्यो लोहितोत्पल-गन्धयः
03230491 पतिं सा प्रव्रजिष्यन्तं तदालक्ष्योशती बहिः
03230492 स्मयमाना विक्लवेन हृदयेन विदूयता
03230501 लिखन्त्यधो-मुखी भूमिं पदा नख-मणि-श्रिया
03230502 उवाच ललितां वाचं निरुध्याश्रु-कलां शनैः
0323051 देवहूतिरुवाच
03230511 सर्वं तद्भगवान् मह्यम् उपोवाह प्रतिश्रुतम्
03230512 अथापि मे प्रपन्नाया अभयं दातुम् अर्हसि
03230521 ब्रह्मन् दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः
03230522 कश्चित् स्यान् मे विशोकाय त्वयि प्रव्रजिते वनम्
03230531 एतावतालं कालेन व्यतिक्रान्तेन मे प्रभो
03230532 इन्द्रियार्थ-प्रसङ्गेन परित्यक्त-परात्मनः
03230541 इन्द्रियार्थेषु सज्जन्त्या प्रसङ्गस्त्वयि मे कृतः
03230542 अजानन्त्या परं भावं तथाप्यस्त्वभयाय मे
03230551 सङ्गो यः संसृतेर्हेतुरसत्सु विहितोऽधिया
03230552 स एव साधुषु कृतो निःसङ्गत्वाय कल्पते
03230561 नेह यत् कर्म धर्माय न विरागाय कल्पते
03230562 न तीर्थ-पद-सेवायै जीवन्न् अपि मृतो हि सः
03230571 साहं भगवतो नूनं वञ्चिता मायया दृढम्
03230572 यत् त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बन्धनात्

Chapter 24

0324001 मैत्रेय उवाच
03240011 निर्वेद-वादिनीम् एवं मनोर्दुहितरं मुनिः
03240012 दयालुः शालिनीम् आह शुक्लाभिव्याहृतं स्मरन्
0324002 ऋषिरुवाच
03240021 मा खिदो राज-पुत्रीत्थम् आत्मानं प्रत्यनिन्दिते
03240022 भगवांस्तेऽक्षरो गर्भम् अदूरात् सम्प्रपत्स्यते
03240031 धृत-व्रतासि भद्रं ते दमेन नियमेन च
03240032 तपो-द्रविण-दानैश्च श्रद्धया चेश्वरं भज
03240041 स त्वयाराधितः शुक्लो वितन्वन् मामकं यशः
03240042 छेत्ता ते हृदय-ग्रन्थिम् औदर्यो ब्रह्म-भावनः
0324005 मैत्रेय उवाच
03240051 देवहूत्यपि सन्देशं गौरवेण प्रजापतेः
03240052 सम्यक् श्रद्धाय पुरुषं कूट-स्थम् अभजद्गुरुम्
03240061 तस्यां बहु-तिथे काले भगवान् मधुसूदनः
03240062 कार्दमं वीर्यम् आपन्नो जज्ञेऽग्निरिव दारुणि
03240071 अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः
03240072 गायन्ति तं स्म गन्धर्वा नृत्यन्त्यप्सरसो मुदा
03240081 पेतुः सुमनसो दिव्याः खे-चरैरपवर्जिताः
03240082 प्रसेदुश्च दिशः सर्वा अम्भांसि च मनांसि च
03240091 तत् कर्दमाश्रम-पदं सरस्वत्या परिश्रितम्
03240092 स्वयम्भूः साकम् ऋषिभिर्मरीच्य्-आदिभिरभ्ययात्
03240101 भगवन्तं परं ब्रह्म सत्त्वेनांशेन शत्रु-हन्
03240102 तत्त्व-सङ्ख्यान-विज्ञप्त्यै जातं विद्वान् अजः स्वराट्
03240111 सभाजयन् विशुद्धेन चेतसा तच्-चिकीर्षितम्
03240112 प्रहृष्यमाणैरसुभिः कर्दमं चेदम् अभ्यधात्
0324012 ब्रह्मोवाच
03240121 त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः
03240122 यन् मे सञ्जगृहे वाक्यं भवान् मानद मानयन्

03240131 एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः
03240132 बाढम् इत्यनुमन्येत गौरवेण गुरोर्वचः
03240141 इमा दुहितरः सत्यस्तव वत्स सुमध्यमाः
03240142 सर्गम् एतं प्रभावैः स्वैर्बृंहयिष्यन्त्यनेकधा
03240151 अतस्त्वम् ऋषि-मुख्येभ्यो यथा-शीलं यथा-रुचि
03240152 आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि
03240161 वेदाहम् आद्यं पुरुषम् अवतीर्णं स्व-मायया
03240162 भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने
03240171 ज्ञान-विज्ञान-योगेन कर्मणाम् उद्धरन् जटाः
03240172 हिरण्य-केशः पद्माक्षः पद्म-मुद्रा-पदाम्बुजः
03240181 एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः
03240182 अविद्या-संशय-ग्रन्थिं छित्त्वा गां विचरिष्यति
03240191 अयं सिद्ध-गणाधीशः साङ्ख्याचार्यैः सुसम्मतः
03240192 लोके कपिल इत्याख्यां गन्ता ते कीर्ति-वर्धनः
0324020 मैत्रेय उवाच
03240201 तावाश्वास्य जगत्-स्रष्टा कुमारैः सह-नारदः
03240202 हंसो हंसेन यानेन त्रि-धाम-परमं ययौ
03240211 गते शत-धृतौ क्षत्तः कर्दमस्तेन चोदितः
03240212 यथोदितं स्व-दुहित्-ः प्रादाद्विश्व-सृजां ततः
03240221 मरीचये कलां प्रादादनसूयाम् अथात्रये
03240222 श्रद्धाम् अङ्गिरसेऽयच्छत् पुलस्त्याय हविर्भुवम्
03240231 पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीम्
03240232 ख्यातिं च भृगवेऽयच्छद्वसिष्ठायाप्यरुन्धतीम्
03240241 अथर्वणेऽददाच् छान्तिं यया यज्ञो वितन्यते
03240242 विप्रर्षभान् कृतोद्वाहान् सदारान् समलालयत्
03240251 ततस्त ऋषयः क्षत्तः कृत-दारा निमन्त्र्य तम्
03240252 प्रातिष्ठन् नन्दिम् आपन्नाः स्वं स्वम् आश्रम-मण्डलम्
03240261 स चावतीर्णं त्रि-युगम् आज्ञाय विबुधर्षभम्
03240262 विविक्त उपसङ्गम्य प्रणम्य समभाषत
03240271 अहो पापच्यमानानां निरये स्वैरमङ्गलैः
03240272 कालेन भूयसा नूनं प्रसीदन्तीह देवताः
03240281 बहु-जन्म-विपक्वेन सम्यग्-योग-समाधिना
03240282 द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्-पदम्
03240291 स एव भगवान् अद्य हेलनं न गणय्य नः
03240292 गृहेषु जातो ग्राम्याणां यः स्वानां पक्ष-पोषणः
03240301 स्वीयं वाक्यम् ऋतं कर्तुम् अवतीर्णोऽसि मे गृहे
03240302 चिकीर्षुर्भगवान् ज्ञानं भक्तानां मान-वर्धनः
03240311 तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव
03240312 यानि यानि च रोचन्ते स्व-जनानाम् अरूपिणः
03240321 त्वां सूरिभिस्तत्त्व-बुभुत्सयाद्धा । सदाभिवादार्हण-पाद-पीठम्

03240322 ऐश्वर्य-वैराग्य-यशो-'वबोध- ।वीर्य-श्रिया पूर्तम् अहं प्रपद्ये
03240331 परं प्रधानं पुरुषं महान्तं ।कालं कविं त्रि-वृतं लोक-पालम्
03240332 आत्मानुभूत्यानुगत-प्रपञ्चं ।स्वच्छन्द-शक्तिं कपिलं प्रपद्ये
03240341 अ स्माभिपृच्छेऽद्य पतिं प्रजानां ।त्वयावतीर्णर्ण उताप्त-कामः
03240342 परिव्रजत्-पदवीम् आस्थितोऽहं ।चरिष्ये त्वां हृदि युञ्जन् विशोकः
0324035 श्री-भगवान् उवाच
03240351 मया प्रोक्तं हि लोकस्य प्रमाणं सत्य-लौकिके
03240352 अथाजनि मया तुभ्यं यदवोचम् ऋतं मुने
03240361 एतन् मे जन्म लोकेऽस्मिन् मुमुक्षूणां दुराशयात्
03240362 प्रसङ्ख्यानाय तत्त्वानां सम्मतायात्म-दर्शने
03240371 एष आत्म-पथोऽव्यक्तो नष्टः कालेन भूयसा
03240372 तं प्रवर्तयितुं देहम् इमं विद्धि मया भृतम्
03240381 गच्छ कामं मयापृष्टो मयि सन्न्यस्त-कर्मणा
03240382 जित्वा सुदुर्जयं मृत्युम् अमृतत्वाय मां भज
03240391 माम् आत्मानं स्वयं-ज्योतिः सर्व-भूत-गुहाशयम्
03240392 आत्मन्येवात्मना वीक्ष्य विशोकोऽभयम् ऋच्छसि
03240401 मात्र आध्यात्मिकीं विद्यां शमनीं सर्व-कर्मणाम्
03240402 वितरिष्ये यया चासौ भयं चातितरिष्यति
0324041 मैत्रेय उवाच
03240411 एवं समुदितस्तेन कपिलेन प्रजापतिः
03240412 दक्षिणी-कृत्य तं प्रीतो वनम् एव जगाम ह
03240421 व्रतं स आस्थितो मौनम् आत्मैक-शरणो मुनिः
03240422 निःसङ्गो व्यचरत् क्षोणीम् अनग्निरनिकेतनः
03240431 मनो ब्रह्मणि युञ्जानो यत् तत् सद्-असतः परम्
03240432 गुणावभासे विगुण एक-भक्त्यानुभाविते
03240441 निरहङ्कृतिर्निर्ममश्च निर्द्वन्द्वः सम-दृक् स्व-दृक्
03240442 प्रत्यक्-प्रशान्त-धीर्धीरः प्रशान्तोर्मिरिवोदधिः
03240451 वासुदेवे भगवति सर्व-ज्ञे प्रत्यग्-आत्मनि
03240452 परेण भक्ति-भावेन लब्धात्मा मुक्त-बन्धनः
03240461 आत्मानं सर्व-भूतेषु भगवन्तम् अवस्थितम्
03240462 अपश्यत् सर्व-भूतानि भगवत्यपि चात्मनि
03240471 इच्छा-द्वेष-विहीनेन सर्वत्र सम-चेतसा
03240472 भगवद्-भक्ति-युक्तेन प्राप्ता भागवती गतिः

Chapter 25

0325001 शौनक उवाच
03250011 कपिलस्तत्त्व-सङ्ख्याता भगवान् आत्म-मायया
03250012 जातः स्वयम् अजः साक्षादात्म-प्रज्ञप्तये नृणाम्
03250021 न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्व-योगिनाम्
03250022 विश्रुतौ श्रुत-देवस्य भूरि तृप्यन्ति मेऽसवः
03250031 यद्यद्विधत्ते भगवान् स्वच्छन्दात्मात्म-मायया
03250032 तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय
0325004 सूत उवाच
03250041 द्वैपायन-सखस्त्वेवं मैत्रेयो भगवांस्तथा
03250042 प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः
0325005 मैत्रेय उवाच
03250051 पितरि प्रस्थितेऽरण्यं मातुः प्रिय-चिकीर्षया
03250052 तस्मिन् बिन्दुसरेऽवात्सीद्भगवान् कपिलः किल
03250061 तम् आसीनम् अकर्माणं तत्त्व-मार्गाग्र-दर्शनम्
03250062 स्व-सुतं देवहूत्याह धातुः संस्मरती वचः
0325007 देवहूतिरुवाच
03250071 निर्विण्णा नितरां भूमन्न् असद्-इन्द्रिय-तर्षणात्
03250072 येन सम्भाव्यमानेन प्रपन्नान्धं तमः प्रभो
03250081 तस्य त्वं तमसोऽन्धस्य दुष्पारस्याद्य पारगम्
03250082 सच्-चक्षुर्जन्मनाम् अन्ते लब्धं मे त्वद्-अनुग्रहात्
03250091 य आद्यो भगवान् पुंसाम् ईश्वरो वै भवान् किल
03250092 लोकस्य तमसान्धस्य चक्षुः सूर्य इवोदितः
03250101 अथ मे देव सम्मोहम् अपाक्रष्टुं त्वम् अर्हसि
03250102 योऽवग्रहोऽहं ममेतीत्येतस्मिन् योजितस्त्वया
03250111 तं त्वा गताहं शरणं शरण्यं ।स्व-भृत्य-संसार-तरोः कुठारम्
03250112 जिज्ञासयाहं प्रकृतेः पूरुषस्य ।नमामि सद्-धर्म-विदां वरिष्ठम्
0325012 मैत्रेय उवाच
03250121 इति स्व-मातुर्निरवद्यम् ईप्सितं ।निशम्य पुंसाम् अपवर्ग-वर्धनम्

03250122 धियाभिनन्द्यात्मवतां सतां गतिर् ।बभाष ईषत्-स्मित-शोभिताननः
0325013 श्री-भगवान् उवाच
03250131 योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे
03250132 अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च
03250141 तम् इमं ते प्रवक्ष्यामि यम् अवोचं पुरानघे
03250142 ऋषीणां श्रोतु-कामानां योगं सर्वाङ्ग-नैपुणम्
03250151 चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम्
03250152 गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये
03250161 अहं ममाभिमानोत्थैः काम-लोभादिभिर्मलैः
03250162 वीतं यदा मनः शुद्धम् अदुःखम् असुखं समम्
03250171 तदा पुरुष आत्मानं केवलं प्रकृतेः परम्
03250172 निरन्तरं स्वयं-ज्योतिरणिमानम् अखण्डितम्
03250181 ज्ञान-वैराग्य-युक्तेन भक्ति-युक्तेन चात्मना
03250182 परिपश्यत्युदासीनं प्रकृतिं च हतौजसम्
03250191 न युज्यमानया भक्त्या भगवत्यखिलात्मनि
03250192 सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्म-सिद्धये
03250201 प्रसङ्गम् अजरं पाशम् आत्मनः कवयो विदुः
03250202 स एव साधुषु कृतो मोक्ष-द्वारम् अपावृतम्
03250211 तितिक्षवः कारुणिकाः सुहृदः सर्व-देहिनाम्
03250212 अजात-शत्रवः शान्ताः साधवः साधु-भूषणाः
03250221 मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्
03250222 मत्-कृते त्यक्त-कर्माणस्त्यक्त-स्वजन-बान्धवाः
03250231 मद्-आश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च
03250232 तपन्ति विविधास्तापा नैतान् मद्-गत-चेतसः
03250241 त एते साधवः साध्वि सर्व-सङ्ग-विवर्जिताः
03250242 सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्ग-दोष-हरा हि ते
03250251 सतां प्रसङ्गान् मम वीर्य-संविदो ।भवन्ति हृत्-कर्ण-रसायनाः कथाः
03250252 तज्-जोषणादाश्वपवर्ग-वर्त्मनि ।श्रद्धा रतिर्भक्तिरनुक्रमिष्यति
03250261 भक्त्या पुमान् जात-विराग ऐन्द्रियाद् ।दृष्ट-श्रुतान् मद्-रचनानुचिन्तया
03250262 चित्तस्य यत्तो ग्रहणे योग-युक्तो ।यतिष्यते ऋजुभिर्योग-मार्गैः
03250271 असेवयायं प्रकृतेर्गुणानां ।ज्ञानेन वैराग्य-विजृम्भितेन
03250272 योगेन मय्यर्पितया च भक्त्या ।मां प्रत्यग्-आत्मानम् इहावरुन्धे
0325028 देवहूतिरुवाच
03250281 काचित् त्वय्युचिता भक्तिः कीदृशी मम गोचरा
03250282 यया पदं ते निर्वाणम् अञ्जसान्वाश्नवा अहम्
03250291 यो योगो भगवद्-बाणो निर्वाणात्मंस्त्वयोदितः
03250292 कीदृशः कति चाङ्गानि यतस्तत्त्वावबोधनम्
03250301 तदेतन् मे विजानीहि यथाहं मन्द-धीर्हरे
03250302 सुखं बुद्ध्येय दुर्बोधं योषा भवद्-अनुग्रहात्
0325031 मैत्रेय उवाच

03250311 विदित्वार्थं कपिलो मातुरित्थं । जात-स्नेहो यत्र तन्वाभिजातः
03250312 तत्त्वाम्नायं यत् प्रवदन्ति साङ्ख्यं । प्रोवाच वै भक्ति-वितान-योगम्
0325032 श्री-भगवान् उवाच
03250321 देवानां गुण-लिङ्गानाम् आनुश्रविक-कर्मणाम्
03250322 सत्त्व एवैक-मनसो वृत्तिः स्वाभाविकी तु या
03250341 अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी
03250342 जरयत्याशु या कोशं निगीर्णम् अनलो यथा
03250351 नैकात्मतां मे स्पृहयन्ति केचिन् । मत्-पाद-सेवाभिरता मद्-ईहाः
03250352 येऽन्योन्यतो भागवताः प्रसज्य । सभाजयन्ते मम पौरुषाणि
03250361 पश्यन्ति ते मे रुचिराण्यम्ब सन्तः । प्रसन्न-वक्त्रारुण-लोचनानि
03250362 रूपाणि दिव्यानि वर-प्रदानि । साकं वाचं स्पृहणीयां वदन्ति
03250371 तैर्दर्शनीयावयवैरुदार- । विलास-हासेक्षित-वाम-सूक्तैः
03250372 हृतात्मनो हृत-प्राणांश्च भक्तिर् । अनिच्छतो मे गतिम् अण्वीं प्रयुङ्क्ते
03250381 अथो विभूतिं मम मायाविनस्ताम् । ऐश्वर्यम् अष्टाङ्गम् अनुप्रवृत्तम्
03250382 श्रियं भागवतीं वास्पृहयन्ति भद्रां । परस्य मे तेऽश्नुवते तु लोके
03250391 न कर्हिचिन् मत्-पराः शान्त-रूपे । नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेतिः
03250392 येषाम् अहं प्रिय आत्मा सुतश्च । सखा गुरुः सुहृदो दैवम् इष्टम्
03250401 इमं लोकं तथैवामुम् आत्मानम् उभयायिनम्
03250402 आत्मानम् अनु ये चेह ये रायः पशवो गृहाः
03250411 विसृज्य सर्वान् अन्यांश्च माम् एवं विश्वतो-मुखम्
03250412 भजन्त्यनन्यया भक्त्या तान् मृत्योरतिपारये
03250421 नान्यत्र मद्भगवतः प्रधान-पुरुषेश्वरात्
03250422 आत्मनः सर्व-भूतानां भयं तीव्रं निवर्तते
03250431 मद्-भयाद्वाति वातोऽयं सूर्यस्तपति मद्-भयात्
03250432 वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्-भयात्
03250441 ज्ञान-वैराग्य-युक्तेन भक्ति-योगेन योगिनः
03250442 क्षेमाय पाद-मूलं मे प्रविशन्त्यकुतो-भयम्
03250451 एतावान् एव लोकेऽस्मिन् पुंसां निःश्रेयसोदयः
03250452 तीव्रेण भक्ति-योगेन मनो मय्यर्पितं स्थिरम्

Chapter 26

0326001 श्री-भगवान् उवाच
03260011 अथ ते सम्प्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्
03260012 यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः
03260021 ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्म-दर्शनम्
03260022 यदाहुर्वर्णये तत् ते हृदय-ग्रन्थि-भेदनम्
03260031 अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः
03260032 प्रत्यग्-धामा स्वयं-ज्योतिर्विश्वं येन समन्वितम्
03260041 स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः
03260042 यदृच्छयैवोपगताम् अभ्यपद्यत लीलया
03260051 गुणैर्विचित्राः सृजतीं स-रूपाः प्रकृतिं प्रजाः
03260052 विलोक्य मुमुहे सद्यः स इह ज्ञान-गूहया
03260061 एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान्
03260062 कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते
03260071 तदस्य संसृतिर्बन्धः पार-तन्त्र्यं च तत्-कृतम्
03260072 भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः
03260081 कार्य-कारण-कर्तृत्वे कारणं प्रकृतिं विदुः
03260082 भोक्तृत्वे सुख-दुःखानां पुरुषं प्रकृतेः परम्
0326009 देवहूतिरुवाच
03260091 प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम
03260092 ब्रूहि कारणयोरस्य सद्-असच् च यद्-आत्मकम्
0326010 श्री-भगवान् उवाच
03260101 यत् तत् त्रि-गुणम् अव्यक्तं नित्यं सद्-असद्-आत्मकम्
03260102 प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्
03260111 पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा
03260112 एतच् चतुर्-विंशतिकं गणं प्राधानिकं विदुः
03260121 महा-भूतानि पञ्चैव भूरापोऽग्निर्मरुन् नभः
03260122 तन्-मात्राणि च तावन्ति गन्धादीनि मतानि मे
03260131 इन्द्रियाणि दश श्रोत्रं त्वग् दृग् रसन-नासिकाः

03260132 वाक् करौ चरणौ मेढ्रं पायुर्दशम उच्यते
03260141 मनो बुद्धिरहङ्कारश्चित्तम् इत्यन्तर्-आत्मकम्
03260142 चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षण-रूपया
03260151 एतावान् एव सङ्ख्यातो ब्रह्मणः स-गुणस्य ह
03260152 सन्निवेशो मया प्रोक्तो यः कालः पञ्च-विंशकः
03260161 प्रभावं पौरुषं प्राहुः कालम् एके यतो भयम्
03260162 अहङ्कार-विमूढस्य कर्तुः प्रकृतिम् ईयुषः
03260171 प्रकृतेर्गुण-साम्यस्य निर्विशेषस्य मानवि
03260172 चेष्टा यतः स भगवान् काल इत्युपलक्षितः
03260181 अन्तः पुरुष-रूपेण काल-रूपेण यो बहिः
03260182 समन्वेत्येष सत्त्वानां भगवान् आत्म-मायया
03260191 दैवात् क्षुभित-धर्मिण्यां स्वस्यां योनौ परः पुमान्
03260192 आधत्त वीर्यं सासूत महत्-तत्त्वं हिरण्मयम्
03260201 विश्वम् आत्म-गतं व्यञ्जन् कूट-स्थो जगद्-अङ्कुरः
03260202 स्व-तेजसापिबत् तीव्रम् आत्म-प्रस्वापनं तमः
03260211 यत् तत् सत्त्व-गुणं स्वच्छं शान्तं भगवतः पदम्
03260212 यदाहुर्वासुदेवाख्यं चित्तं तन् महद्-आत्मकम्
03260221 स्वच्छत्वम् अविकारित्वं शान्तत्वम् इति चेतसः
03260222 वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा
03260231 महत्-तत्त्वाद्विकुर्वाणाद्भगवद्-वीर्य-सम्भवात्
03260232 क्रिया-शक्तिरहङ्कारस्त्रि-विधः समपद्यत
03260241 वैकारिकस्तैजसश्च तामसश्च यतो भवः
03260242 मनसश्चेन्द्रियाणां च भूतानां महताम् अपि
03260251 सहस्र-शिरसं साक्षाद्यम् अनन्तं प्रचक्षते
03260252 सङ्कर्षणाख्यं पुरुषं भूतेन्द्रिय-मनोमयम्
03260261 कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणम्
03260262 शान्त-घोर-विमूढत्वम् इति वा स्यादहङ्कृतेः
03260271 वैकारिकाद्विकुर्वाणान् मनस्-तत्त्वम् अजायत
03260272 यत्-सङ्कल्प-विकल्पाभ्यां वर्तते काम-सम्भवः
03260281 यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणाम् अधीश्वरम्
03260282 शारदेन्दीवर-श्यामं संराध्यं योगिभिः शनैः
03260291 तैजसात् तु विकुर्वाणाद्बुद्धि-तत्त्वम् अभूत् सति
03260292 द्रव्य-स्फुरण-विज्ञानम् इन्द्रियाणाम् अनुग्रहः
03260301 संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च
03260302 स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्
03260311 तैजसानीन्द्रियाण्येव क्रिया-ज्ञान-विभागशः
03260312 प्राणस्य हि क्रिया-शक्तिर्बुद्धेर्विज्ञान-शक्तिता
03260321 तामसाच् च विकुर्वाणाद्भगवद्-वीर्य-चोदितात्
03260322 शब्द-मात्रम् अभूत् तस्मान् नभः श्रोत्रं तु शब्दगम्

03260331 अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वम् एव च
03260332 तन्-मात्रत्वं च नभसो लक्षणं कवयो विदुः
03260341 भूतानां छिद्र-दातृत्वं बहिरन्तरम् एव च
03260342 प्राणेन्द्रियात्म-धिष्ण्यत्वं नभसो वृत्ति-लक्षणम्
03260351 नभसः शब्द-तन्मात्रात् काल-गत्या विकुर्वतः
03260352 स्पर्शोऽभवत् ततो वायुस्त्वक् स्पर्शस्य च सङ्ग्रहः
03260361 मृदुत्वं कठिनत्वं च शैत्यम् उष्णत्वम् एव च
03260362 एतत् स्पर्शस्य स्पर्शत्वं तन्-मात्रत्वं नभस्वतः
03260371 चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्य-शब्दयोः
03260372 सर्वेन्द्रियाणाम् आत्मत्वं वायोः कर्माभिलक्षणम्
03260381 वायोश्च स्पर्श-तन्मात्राद्रूपं दैवेरितादभूत्
03260382 समुत्थितं ततस्तेजश्चक्षू रूपोपलम्भनम्
03260391 द्रव्याकृतित्वं गुणता व्यक्ति-संस्थात्वम् एव च
03260392 तेजस्त्वं तेजसः साध्वि रूप-मात्रस्य वृत्तयः
03260401 द्योतनं पचनं पानम् अदनं हिम-मर्दनम्
03260402 तेजसो वृत्तयस्त्वेताः शोषणं क्षुत् तृडेव च
03260411 रूप-मात्राद्विकुर्वाणात् तेजसो दैव-चोदितात्
03260412 रस-मात्रम् अभूत् तस्मादम्भो जिह्वा रस-ग्रहः
03260421 कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा
03260422 भौतिकानां विकारेण रस एको विभिद्यते
03260431 क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्
03260432 तापापनोदो भूयस्त्वम् अम्भसो वृत्तयस्त्विमाः
03260441 रस-मात्राद्विकुर्वाणादम्भसो दैव-चोदितात्
03260442 गन्ध-मात्रम् अभूत् तस्मात् पृथ्वी घ्राणस्तु गन्धगः
03260451 करम्भ-पूति-सौरभ्य- शान्तोग्राम्लादिभिः पृथक्
03260452 द्रव्यावयव-वैषम्याद्गन्ध एको विभिद्यते
03260461 भावनं ब्रह्मणः स्थानं धारणं सद्-विशेषणम्
03260462 सर्व-सत्त्व-गुणोद्भेदः पृथिवी-वृत्ति-लक्षणम्
03260471 नभो-गुण-विशेषोऽर्थो यस्य तच् छ्रोत्रम् उच्यते
03260472 वायोर्गुण-विशेषोऽर्थो यस्य तत् स्पर्शनं विदुः
03260481 तेजो-गुण-विशेषोऽर्थो यस्य तच् चक्षुरुच्यते
03260482 अम्भो-गुण-विशेषोऽर्थो यस्य तद्रसनं विदुः
03260483 भूमेर्गुण-विशेषोऽर्थो यस्य स घ्राण उच्यते
03260491 परस्य दृश्यते धर्मो ह्यपरस्मिन् समन्वयात्
03260492 अतो विशेषो भावानां भूमावेवोपलक्ष्यते
03260501 एतान्यसंहत्य यदा महद्-आदीनि सप्त वै
03260502 काल-कर्म-गुणोपेतो जगद्-आदिरुपाविशत्
03260511 ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डम् अचेतनम्
03260512 उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट्

03260521 एतदण्डं विशेषाख्यं क्रम-वृद्धैर्दशोत्तरैः
03260522 तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः
03260523 यत्र लोक-वितानोऽयं रूपं भगवतो हरेः
03260531 हिरण्मयादण्ड-कोशादुत्थाय सलिले शयात्
03260532 तम् आविश्य महा-देवो बहुधा निर्बिभेद खम्
03260541 निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत्
03260542 वाण्या वह्निरथो नासे प्राणोतो घ्राण एतयोः
03260551 घ्राणाद्वायुरभिद्येताम् अक्षिणी चक्षुरेतयोः
03260552 तस्मात् सूर्यो न्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः
03260561 निर्बिभेद विराजस्त्वग्- रोम-श्मश्रु-आदयस्ततः
03260562 तत ओषधयश्चासन् शिश्नं निर्बिभिदे ततः
03260571 रेतस्तस्मादाप आसन् निरभिद्यत वै गुदम्
03260572 गुदादपानोऽपानाच् च मृत्युर्लोक-भयङ्करः
03260581 हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट्
03260582 पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः
03260591 नाड्योऽस्य निरभिद्यन्त ताभ्यो लोहितम् आभृतम्
03260592 नद्यस्ततः समभवन् उदरं निरभिद्यत
03260601 क्षुत्-पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत्
03260602 अथास्य हृदयं भिन्नं हृदयान् मन उत्थितम्
03260611 मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः
03260612 अहङ्कारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत्
03260621 एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन्
03260622 पुनराविविशुः खानि तम् उत्थापयितुं क्रमात्
03260631 वह्निर्वाचा मुखं भेजे नोदतिष्ठत् तदा विराट्
03260632 घ्राणेन नासिके वायुर्नोदतिष्ठत् तदा विराट्
03260641 अक्षिणी चक्षुषादित्यो नोदतिष्ठत् तदा विराट्
03260642 श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत् तदा विराट्
03260651 त्वचं रोमभिरोषध्यो नोदतिष्ठत् तदा विराट्
03260652 रेतसा शिश्नम् आपस्तु नोदतिष्ठत् तदा विराट्
03260661 गुदं मृत्युरपानेन नोदतिष्ठत् तदा विराट्
03260662 हस्ताविन्द्रो बलेनैव नोदतिष्ठत् तदा विराट्
03260671 विष्णुर्गत्यैव चरणौ नोदतिष्ठत् तदा विराट्
03260672 नाडीर्नद्यो लोहितेन नोदतिष्ठत् तदा विराट्
03260681 क्षुत्-तृड्भ्याम् उदरं सिन्धुर्नोदतिष्ठत् तदा विराट्
03260682 हृदयं मनसा चन्द्रो नोदतिष्ठत् तदा विराट्
03260691 बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत् तदा विराट्
03260692 रुद्रोऽभिमत्या हृदयं नोदतिष्ठत् तदा विराट्
03260701 चित्तेन हृदयं चैत्यः क्षेत्र-ज्ञः प्राविशद्यदा
03260702 विराट् तदैव पुरुषः सलिलादुदतिष्ठत
03260711 यथा प्रसुप्तं पुरुषं प्राणेन्द्रिय-मनो-धियः

03260712 प्रभवन्ति विना येन नोत्थापयितुम् ओजसा
03260721 तम् अस्मिन् प्रत्यग्-आत्मानं धिया योग-प्रवृत्तया
03260722 भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्

Chapter 27

0327001 श्री-भगवान् उवाच
03270011 प्रकृति-स्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः
03270012 अविकारादकर्तृत्वान् निर्गुणत्वाज् जलार्कवत्
03270021 स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते
03270022 अहङ्क्रिया-विमूढात्मा कर्तास्मीत्यभिमन्यते
03270031 तेन संसार-पदवीम् अवशोऽभ्येत्यनिर्वृतः
03270032 प्रासङ्गिकैः कर्म-दोषैः सद्-असन्-मिश्र-योनिषु
03270041 अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते
03270042 ध्यायतो विषयान् अस्य स्वप्नेऽनर्थागमो यथा
03270051 अत एव शनैश्चित्तं प्रसक्तम् असतां पथि
03270052 भक्ति-योगेन तीव्रेण विरक्त्या च नयेद्वशम्
03270061 यमादिभिर्योग-पथैरभ्यस' श्रद्धयान्वितः
03270062 मयि भावेन सत्येन मत्-कथा-श्रवणेन च
03270071 सर्व-भूत-समत्वेन निर्वैरेणाप्रसङ्गतः
03270072 ब्रह्मचर्येण मौनेन स्व-धर्मेण बलीयसा
03270081 यदृच्छयोपलब्धेन सन्तुष्टो मित-भुङ् मुनिः
03270082 विविक्त-शरणः शान्तो मैत्रः करुण आत्मवान्
03270091 सानुबन्धे च देहेऽस्मिन्न् अकुर्वन्न् असद्-आग्रहम्
03270092 ज्ञानेन दृष्ट-तत्त्वेन प्रकृतेः पुरुषस्य च
03270101 निवृत्त-बुद्ध्-अवस्थानो दूरी-भूतान्य-दर्शनः
03270102 उपलभ्यात्मनात्मानं चक्षुषेवार्कम् आत्म-दृक्
03270111 मुक्त-लिङ्गं सद्-आभासम् असति प्रतिपद्यते
03270112 सतो बन्धुम् असच्-चक्षुः सर्वानुस्यूतम् अद्वयम्
03270121 यथा जल-स्थ आभासः स्थल-स्थेनावदृश्यते
03270122 स्वाभासेन तथा सूर्यो जल-स्थेन दिवि स्थितः
03270131 एवं त्रिवृद्-अहङ्कारो भूतेन्द्रिय-मनोमयैः
03270132 स्वाभासैर्लक्षितोऽनेन सद्-आभासेन सत्य-दृक्
03270141 भूत-सूक्ष्मेन्द्रिय-मनो- बुद्ध्-आदिष्विह निद्रया

03270142 लीनेष्वसति यस्तत्र विनिद्रो निरहङ्क्रियः
03270151 मन्यमानस्तदात्मानम् अनष्टो नष्टवन् मृषा
03270152 नष्टेऽहङ्करणे द्रष्टा नष्ट-वित्त इवातुरः
03270161 एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते
03270162 साहङ्कारस्य द्रव्यस्य योऽवस्थानम् अनुग्रहः
0327017 देवहूतिरुवाच
03270171 पुरुषं प्रकृतिर्ब्रह्मन् न विमुञ्चति कर्हिचित्
03270172 अन्योन्यापाश्रयत्वाच् च नित्यत्वादनयोः प्रभो
03270181 यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः
03270182 अपां रसस्य च यथा तथा बुद्धेः परस्य च
03270191 अकर्तुः कर्म-बन्धोऽयं पुरुषस्य यद्-आश्रयः
03270192 गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम्
03270201 क्वचित् तत्त्वावमर्शेन निवृत्तं भयम् उल्बणम्
03270202 अनिवृत्त-निमित्तत्वात् पुनः प्रत्यवतिष्ठते
0327021 श्री-भगवान् उवाच
03270211 अनिमित्त-निमित्तेन स्व-धर्मेणामलात्मना
03270212 तीव्रया मयि भक्त्या च श्रुत-सम्भृतया चिरम्
03270221 ज्ञानेन दृष्ट-तत्त्वेन वैराग्येण बलीयसा
03270222 तपो-युक्तेन योगेन तीव्रेणात्म-समाधिना
03270231 प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्-निशम्
03270232 तिरो-भवित्री शनकैरग्नेर्योनिरिवारणिः
03270241 भुक्त-भोगा परित्यक्ता दृष्ट-दोषा च नित्यशः
03270242 नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च
03270251 यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्व्-अनर्थ-भृत्
03270252 स एव प्रतिबुद्धस्य न वै मोहाय कल्पते
03270261 एवं विदित-तत्त्वस्य प्रकृतिर्मयि मानसम्
03270262 युञ्जतो नापकुरुत आत्मारामस्य कर्हिचित्
03270271 यदैवम् अध्यात्म-रतः कालेन बहु-जन्मना
03270272 सर्वत्र जात-वैराग्य आब्रह्म-भुवनान् मुनिः
03270281 मद्-भक्तः प्रतिबुद्धार्थो मत्-प्रसादेन भूयसा
03270282 निःश्रेयसं स्व-संस्थानं कैवल्याख्यं मद्-आश्रयम्
03270291 प्राप्नोतीहाञ्जसा धीरः स्व-दृशा च्छिन्न-संशयः
03270292 यद्गत्वा न निवर्तेत योगी लिङ्गाद्विनिर्गमे
03270301 यदा न योगोपचितासु चेतो ।मायासु सिद्धस्य विषज्जतेऽङ्ग
03270302 अनन्य-हेतुष्वथ मे गतिः स्याद् ।आत्यन्तिकी यत्र न मृत्यु-हासः

Chapter 28

0328001 श्री-भगवान् उवाच
03280011 योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे
03280012 मनो येनैव विधिना प्रसन्नं याति सत्-पथम्
03280021 स्व-धर्माचरणं शक्त्या विधर्माच् च निवर्तनम्
03280022 दैवाल् लब्धेन सन्तोष आत्मविच्-चरणार्चनम्
03280031 ग्राम्य-धर्म-निवृत्तिश्च मोक्ष-धर्म-रतिस्तथा
03280032 मित-मेध्यादनं शश्वद्विविक्त-क्षेम-सेवनम्
03280041 अहिंसा सत्यम् अस्तेयं यावद्-अर्थ-परिग्रहः
03280042 ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम्
03280051 मौनं सद्-आसन-जयः स्थैर्यं प्राण-जयः शनैः
03280052 प्रत्याहारश्चेन्द्रियाणां विषयान् मनसा हृदि
03280061 स्व-धिष्ण्यानाम् एक-देशे मनसा प्राण-धारणम्
03280062 वैकुण्ठ-लीलाभिध्यानं समाधानं तथात्मनः
03280071 एतैरन्यैश्च पथिभिर्मनो दुष्टम् असत्-पथम्
03280072 बुद्ध्या युञ्जीत शनकैर्जित-प्राणो ह्यतन्द्रितः
03280081 शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम्
03280082 तस्मिन् स्वस्ति समासीन ऋजु-कायः समभ्यसेत्
03280091 प्राणस्य शोधयेन् मार्गं पूर-कुम्भक-रेचकैः
03280092 प्रतिकूलेन वा चित्तं यथा स्थिरम् अचञ्चलम्
03280101 मनो ऽचिरात् स्याद्विरजं जित-श्वासस्य योगिनः
03280102 वाय्व्-अग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्
03280111 प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्
03280112 प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्
03280121 यदा मनः स्वं विरजं योगेन सुसमाहितम्
03280122 काष्ठां भगवतो ध्यायेत् स्व-नासाग्रावलोकनः
03280131 प्रसन्न-वदनाम्भोजं पद्म-गर्भारुणेक्षणम्
03280132 नीलोत्पल-दल-श्यामं शङ्ख-चक्र-गदा-धरम्
03280141 लसत्-पङ्कज-किञ्जल्क- पीत-कौशेय-वाससम्

03280142 श्रीवत्स-वक्षसं भ्राजत् कौस्तुभामुक्त-कन्धरम्
03280151 मत्त-द्विरेफ-कलया परीतं वन-मालया
03280152 परार्ध्य-हार-वलय- किरीटाङ्गद-नूपुरम्
03280161 काञ्ची-गुणोल्लसच्-छ्रोणिं हृदयाम्भोज-विष्टरम्
03280162 दर्शनीयतमं शान्तं मनो-नयन-वर्धनम्
03280171 अपीच्य-दर्शनं शश्वत् सर्व-लोक-नमस्कृतम्
03280172 सन्तं वयसि कैशोरे भृत्यानुग्रह-कातरम्
03280181 कीर्तन्य-तीर्थ-यशसं पुण्य-श्लोक-यशस्करम्
03280182 ध्यायेद्देवं समग्राङ्गं यावन् न च्यवते मनः
03280191 स्थितं व्रजन्तम् आसीनं शयानं वा गुहाशयम्
03280192 प्रेक्षणीयेहितं ध्यायेच् छुद्ध-भावेन चेतसा
03280201 तस्मिन् लब्ध-पदं चित्तं सर्वावयव-संस्थितम्
03280202 विलक्ष्यैकत्र संयुज्यादङ्गे भगवतो मुनिः
03280211 सञ्चिन्तयेद्भगवतश्चरणारविन्दं
03280212 वज्राङ्कुश-ध्वज-सरोरुह-लाञ्छनाढ्यम्
03280213 उत्तुङ्ग-रक्त-विलसन्-नख-चक्रवाल-
03280214 ज्योत्स्नाभिराहत-महद्-धृदयान्धकारम्
03280221 यच्-छौच-निःसृत-सरित्-प्रवरोदकेन
03280222 तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्
03280223 ध्यातुर्मनः-शमल-शैल-निसृष्ट-वज्रं
03280224 ध्यायेच् चिरं भगवतश्चरणारविन्दम्
03280231 जानु-द्वयं जलज-लोचनया जनन्या
03280232 लक्ष्म्याखिलस्य सुर-वन्दितया विधातुः
03280233 ऊर्वोर्निधाय कर-पल्लव-रोचिषा यत्
03280234 संलालितं हृदि विभोरभवस्य कुर्यात्
03280241 ऊरू सुपर्ण-भुजयोरधि शोभमानाव्
03280242 ओजो-निधी अतसिका-कुसुमावभासौ
03280243 व्यालम्बि-पीत-वर-वाससि वर्तमान-
03280244 काञ्ची-कलाप-परिरम्भि नितम्ब-बिम्बम्
03280251 नाभि-ह्रदं भुवन-कोश-गुहोदर-स्थं
03280252 यत्रात्म-योनि-धिषणाखिल-लोक-पद्मम्
03280253 व्यूढं हरिन्-मणि-वृष-स्तनयोरमुष्य
03280254 ध्यायेद्द्वयं विशद-हार-मयूख-गौरम्
03280261 वक्षोऽधिवासम् ऋषभस्य महा-विभूतेः
03280262 पुंसां मनो-नयन-निर्वृतिम् आदधानम्
03280263 कण्ठं च कौस्तुभ-मणेरधिभूषणार्थं
03280264 कुर्यान् मनस्यखिल-लोक-नमस्कृतस्य
03280271 बाहूंश्च मन्दर-गिरेः परिवर्तनेन
03280272 निर्णिक्त-बाहु-वलयान् अधिलोक-पालान्

03280273 सञ्चिन्तयेद्दश-शतारम् असह्य-तेजः
03280274 शङ्खं च तत्-कर-सरोरुह-राज-हंसम्
03280281 कौमोदकीं भगवतो दयितां स्मरेत
03280282 दिग्धाम् अराति-भट-शोणित-कर्दमेन
03280283 मालां मधुव्रत-वरूथ-गिरोपघुष्टां
03280284 चैत्यस्य तत्त्वम् अमलं मणिम् अस्य कण्ठे
03280291 भृत्यानुकम्पित-धियेह गृहीत-मूर्तेः
03280292 सञ्चिन्तयेद्भगवतो वदनारविन्दम्
03280293 यद्विस्फुरन्-मकर-कुण्डल-वल्गितेन
03280294 विद्योतितामल-कपोलम् उदार-नासम्
03280301 यच् छ्री-निकेतम् अलिभिः परिसेव्यमानं
03280302 भूत्या स्वया कुटिल-कुन्तल-वृन्द-जुष्टम्
03280303 मीन-द्वयाश्रयम् अधिक्षिपदब्ज-नेत्रं
03280304 ध्यायेन् मनोमयम् अतन्द्रित उल्लसद्-भ्रु
03280311 तस्यावलोकम् अधिकं कृपयातिघोर-
03280312 ताप-त्रयोपशमनाय निसृष्टम् अक्ष्णोः
03280313 स्निग्ध-स्मितानुगुणितं विपुल-प्रसादं
03280314 ध्यायेच् चिरं विपुल-भावनया गुहायाम्
03280321 हासं हरेरवनताखिल-लोक-तीव्र-
03280322 शोकाश्रु-सागर-विशोषणम् अत्युदारम्
03280323 सम्मोहनाय रचितं निज-माययास्य
03280324 भ्रू-मण्डलं मुनि-कृते मकर-ध्वजस्य
03280331 ध्यानायनं प्रहसितं बहुलाधरोष्ठ-
03280332 भासारुणायित-तनु-द्विज-कुन्द-पङ्क्ति
03280333 ध्यायेत् स्वदेह-कुहरेऽवसितस्य विष्णोर्
03280334 भक्त्यार्द्रयार्पित-मना न पृथग् दिदृक्षेत्
03280341 एवं हरौ भगवति प्रतिलब्ध-भावो
03280342 भक्त्या द्रवद्-धृदय उत्पुलकः प्रमोदात्
03280343 औत्कण्ठ्य-बाष्प-कलया मुहुरर्द्यमानस्
03280344 तच् चापि चित्त-बडिशं शनकैर्वियुङ्क्ते
03280351 मुक्ताश्रयं यर्हि निर्विषयं विरक्तं
03280352 निर्वाणम् ऋच्छति मनः सहसा यथार्चिः
03280353 आत्मानम् अत्र पुरुषोऽव्यवधानम् एकम्
03280354 अन्वीक्षते प्रतिनिवृत्त-गुण-प्रवाहः
03280361 सोऽप्येतया चरमया मनसो निवृत्त्या
03280362 तस्मिन् महिम्न्यवसितः सुख-दुःख-बाह्ये
03280363 हेतुत्वम् अप्यसति कर्तरि दुःखयोर्यत्
03280364 स्वात्मन् विधत्त उपलब्ध-परात्म-काष्ठः
03280371 देहं च तं न चरमः स्थितम् उत्थितं वा
03280372 सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम्

03280373 दैवादुपेतम् अथ दैव-वशादपेतं
03280374 वासो यथा परिकृतं मदिरा-मदान्धः
03280381 देहोऽपि दैव-वशगः खलु कर्म यावत्
03280382 स्वारम्भकं प्रतिसमीक्षत एव सासुः
03280383 तं स-प्रपञ्चम् अधिरूढ-समाधि-योगः
03280384 स्वाप्नं पुनर्न भजते प्रतिबुद्ध-वस्तुः
03280391 यथा पुत्राच् च वित्ताच् च पृथङ् मर्त्यः प्रतीयते
03280392 अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा
03280401 यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वापि स्व-सम्भवात्
03280402 अप्यात्मत्वेनाभिमताद्यथाग्निः पृथग् उल्मुकात्
03280411 भूतेन्द्रियान्तः-करणात् प्रधानाज् जीव-संज्ञितात्
03280412 आत्मा तथा पृथग् द्रष्टा भगवान् ब्रह्म-संज्ञितः
03280421 सर्व-भूतेषु चात्मानं सर्व-भूतानि चात्मनि
03280422 ईक्षेतानन्य-भावेन भूतेष्विव तद्-आत्मताम्
03280431 स्व-योनिषु यथा ज्योतिरेकं नाना प्रतीयते
03280432 योनीनां गुण-वैषम्यात् तथात्मा प्रकृतौ स्थितः
03280441 तस्मादिमां स्वां प्रकृतिं दैवीं सद्-असद्-आत्मिकाम्
03280442 दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते

Chapter 29

0329001 देवहूतिरुवाच
03290011 लक्षणं महद्-आदीनां प्रकृतेः पुरुषस्य च
03290012 स्वरूपं लक्ष्यतेऽमीषां येन तत्-पारमार्थिकम्
03290021 यथा साङ्ख्येषु कथितं यन्-मूलं तत् प्रचक्षते
03290022 भक्ति-योगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो
03290031 विरागो येन पुरुषो भगवन् सर्वतो भवेत्
03290032 आचक्ष्व जीव-लोकस्य विविधा मम संसृतीः
03290041 कालस्येश्वर-रूपस्य परेषां च परस्य ते
03290042 स्वरूपं बत कुर्वन्ति यद्-धेतोः कुशलं जनाः
03290051 लोकस्य मिथ्याभिमतेरचक्षुषश् । चिरं प्रसुप्तस्य तमस्यनाश्रये
03290052 श्रान्तस्य कर्मस्वनुविद्धया धिया । त्वम् आविरासीः किल योग-भास्करः
0329006 मैत्रेय उवाच
03290061 इति मातुर्वचः श्लक्ष्णं प्रतिनन्द्य महा-मुनिः
03290062 आबभाषे कुरु-श्रेष्ठ प्रीतस्तां करुणार्दितः
0329007 श्री-भगवान् उवाच
03290071 भक्ति-योगो बहु-विधो मार्गैर्भामिनि भाव्यते
03290072 स्वभाव-गुण-मार्गेण पुंसां भावो विभिद्यते
03290081 अभिसन्धाय यो हिंसां दम्भं मात्सर्यम् एव वा
03290082 संरम्भी भिन्न-दृग् भावं मयि कुर्यात् स तामसः
03290091 विषयान् अभिसन्धाय यश ऐश्वर्यम् एव वा
03290092 अर्चादावर्चयेद्यो मां पृथग्-भावः स राजसः
03290101 कर्म-निर्हारम् उद्दिश्य परस्मिन् वा तद्-अर्पणम्
03290102 यजेद्यष्टव्यम् इति वा पृथग्-भावः स सात्त्विकः
03290111 मद्-गुण-श्रुति-मात्रेण मयि सर्व-गुहाशये
03290112 मनो-गतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ
03290121 लक्षणं भक्ति-योगस्य निर्गुणस्य ह्युदाहृतम्
03290122 अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे
03290131 सालोक्य-सार्ष्टि-सामीप्य- सारूप्यैकत्वम् अप्युत

03290132 दीयमानं न गृह्णन्ति विना मत्-सेवनं जनाः
03290141 स एव भक्ति-योगाख्य आत्यन्तिक उदाहृतः
03290142 येनातिव्रज्य त्रि-गुणं मद्-भावायोपपद्यते
03290151 निषेवितेनानिमित्तेन स्व-धर्मेण महीयसा
03290152 क्रिया-योगेन शस्तेन नातिहिंस्रेण नित्यशः
03290161 मद्-धिष्ण्य-दर्शन-स्पर्श- पूजा-स्तुत्य्-अभिवन्दनैः
03290162 भूतेषु मद्-भावनया सत्त्वेनासङ्गमेन च
03290171 महतां बहु-मानेन दीनानाम् अनुकम्पया
03290172 मैत्र्या चैवात्म-तुल्येषु यमेन नियमेन च
03290181 आध्यात्मिकानुश्रवणान् नाम-सङ्कीर्तनाच् च मे
03290182 आर्जवेनार्य-सङ्गेन निरहङ्क्रियया तथा
03290191 मद्-धर्मणो गुणैरेतैः परिसंशुद्ध आशयः
03290192 पुरुषस्याञ्जसाभ्येति श्रुत-मात्र-गुणं हि माम्
03290201 यथा वात-रथो घ्राणम् आवृङ्क्ते गन्ध आशयात्
03290202 एवं योग-रतं चेत आत्मानम् अविकारि यत्
03290211 अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा
03290212 तम् अवज्ञाय मां मर्त्यः कुरुतेऽर्चा-विडम्बनम्
03290221 यो मां सर्वेषु भूतेषु सन्तम् आत्मानम् ईश्वरम्
03290222 हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः
03290231 द्विषतः पर-काये मां मानिनो भिन्न-दर्शिनः
03290232 भूतेषु बद्ध-वैरस्य न मनः शान्तिम् ऋच्छति
03290241 अहम् उच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे
03290242 नैव तुष्येऽर्चितोऽर्चायां भूत-ग्रामावमानिनः
03290251 अर्चादावर्चयेत् तावदीश्वरं मां स्व-कर्म-कृत्
03290252 यावन् न वेद स्व-हृदि सर्व-भूतेष्ववस्थितम्
03290261 आत्मनश्च परस्यापि यः करोत्यन्तरोदरम्
03290262 तस्य भिन्न-दृशो मृत्युर्विदधे भयम् उल्बणम्
03290271 अथ मां सर्व-भूतेषु भूतात्मानं कृतालयम्
03290272 अर्हयेद्दान-मानाभ्यां मैत्र्याभिन्नेन चक्षुषा
03290281 जीवाः श्रेष्ठा ह्यजीवानां ततः प्राण-भृतः शुभे
03290282 ततः स-चित्ताः प्रवरास्ततश्चेन्द्रिय-वृत्तयः
03290291 तत्रापि स्पर्श-वेदिभ्यः प्रवरा रस-वेदिनः
03290292 तेभ्यो गन्ध-विदः श्रेष्ठास्ततः शब्द-विदो वराः
03290301 रूप-भेद-विदस्तत्र ततश्चोभयतो-दतः
03290302 तेषां बहु-पदाः श्रेष्ठाश्चतुष्-पादस्ततो द्वि-पात्
03290311 ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः
03290312 ब्राह्मणेष्वपि वेद-ज्ञो ह्यर्थ-ज्ञोऽभ्यधिकस्ततः
03290321 अर्थ-ज्ञात् संशय-च्छेत्ता ततः श्रेयान् स्व-कर्म-कृत्
03290322 मुक्त-सङ्गस्ततो भूयान् अदोग्धा धर्मम् आत्मनः

03290331 तस्मान् मय्यर्पिताशेष- क्रियार्थात्मा निरन्तरः
03290332 मय्यर्पितात्मनः पुंसो मयि सन्न्यस्त-कर्मणः
03290333 न पश्यामि परं भूतम् अकर्तुः सम-दर्शनात्
03290341 मनसैतानि भूतानि प्रणमेद्बहु-मानयन्
03290342 ईश्वरो जीव-कलया प्रविष्टो भगवान् इति
03290351 भक्ति-योगश्च योगश्च मया मानव्युदीरितः
03290352 ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत्
03290361 एतद्भगवतो रूपं ब्रह्मणः परमात्मनः
03290362 परं प्रधानं पुरुषं दैवं कर्म-विचेष्टितम्
03290371 रूप-भेदास्पदं दिव्यं काल इत्यभिधीयते
03290372 भूतानां महद्-आदीनां यतो भिन्न-दृशां भयम्
03290381 योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः
03290382 स विष्ण्व्-आख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः
03290391 न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः
03290392 आविशत्यप्रमत्तोऽसौ प्रमत्तं जनम् अन्त-कृत्
03290401 यद्-भयाद्वाति वातोऽयं सूर्यस्तपति यद्-भयात्
03290402 यद्-भयाद्वर्षते देवो भ-गणो भाति यद्-भयात्
03290411 यद्वनस्पतयो भीता लताश्चौषधिभिः सह
03290412 स्वे स्वे कालेऽभिगृह्णन्ति पुष्पाणि च फलानि च
03290421 स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः
03290422 अग्निरिन्धे स-गिरिभिर्भूर्न मज्जति यद्-भयात्
03290431 नभो ददाति श्वसतां पदं यन्-नियमाददः
03290432 लोकं स्व-देहं तनुते महान् सप्तभिरावृतम्
03290441 गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्-भयात्
03290442 वर्तन्तेऽनुयुगं येषां वश एतच् चराचरम्
03290451 सोऽनन्तोऽन्त-करः कालोऽनादिरादि-कृदव्ययः
03290452 जनं जनेन जनयन् मारयन् मृत्युनान्तकम्

Chapter 30

0330001 कपिल उवाच
03300011 तस्यैतस्य जनो नूनं नायं वेदोरु-विक्रमम्
03300012 काल्यमानोऽपि बलिनो वायोरिव घनावलिः
03300021 यं यम् अर्थम् उपादत्ते दुःखेन सुख-हेतवे
03300022 तं तं धुनोति भगवान् पुमान् छोचति यत्-कृते
03300031 यदध्रुवस्य देहस्य सानुबन्धस्य दुर्मतिः
03300032 ध्रुवाणि मन्यते मोहाद्गृह-क्षेत्र-वसूनि च
03300041 जन्तुर्वै भव एतस्मिन् यां यां योनिम् अनुव्रजेत्
03300042 तस्यां तस्यां स लभते निर्वृतिं न विरज्यते
03300051 नरक-स्थोऽपि देहं वै न पुमांस्त्यक्तुम् इच्छति
03300052 नारक्यां निर्वृतौ सत्यां देव-माया-विमोहितः
03300061 आत्म-जाया-सुतागार- पशु-द्रविण-बन्धुषु
03300062 निरूढ-मूल-हृदय आत्मानं बहु मन्यते
03300071 सन्दह्यमान-सर्वाङ्ग एषाम् उद्वहनाधिना
03300072 करोत्यविरतं मूढो दुरितानि दुराशयः
03300081 आक्षिप्तात्मेन्द्रियः स्त्रीणाम् असतीनां च मायया
03300082 रहो रचितयालापैः शिशूनां कल-भाषिणाम्
03300091 गृहेषु कूट-धर्मेषु दुःख-तन्त्रेष्वतन्द्रितः
03300092 कुर्वन् दुःख-प्रतीकारं सुखवन् मन्यते गृही
03300101 अर्थैरापादितैर्गुर्व्या हिंसयेतस्-ततश्च तान्
03300102 पुष्णाति येषां पोषेण शेष-भुग् यात्यधः स्वयम्
03300111 वार्तायां लुप्यमानायाम् आरब्धायां पुनः पुनः
03300112 लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहाम्
03300121 कुटुम्ब-भरणाकल्पो मन्द-भाग्यो वृथोद्यमः
03300122 श्रिया विहीनः कृपणो ध्यायन् छ्वसिति मूढ-धीः
03300131 एवं स्व-भरणाकल्पं तत्-कलत्रादयस्तथा
03300132 नाद्रियन्ते यथा पूर्वं कीनाशा इव गो-जरम्
03300141 तत्राप्यजात-निर्वेदो भ्रियमाणः स्वयम् भृतैः

03300142 जरयोपात्त-वैरूप्यो मरणाभिमुखो गृहे
03300151 आस्तेऽवमत्योपन्यस्तं गृह-पाल इवाहरन्
03300152 आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्प-चेष्टितः
03300161 वायुनोत्क्रमतोत्तारः कफ-संरुद्ध-नाडिकः
03300162 कास-श्वास-कृतायासः कण्ठे घुर-घुरायते
03300171 शयानः परिशोचद्भिः परिवीतः स्व-बन्धुभिः
03300172 वाच्यमानोऽपि न ब्रूते काल-पाश-वशं गतः
03300181 एवं कुटुम्ब-भरणे व्यापृतात्माजितेन्द्रियः
03300182 म्रियते रुदतां स्वानाम् उरु-वेदनयास्त-धीः
03300191 यम-दूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ
03300192 स दृष्ट्वा त्रस्त-हृदयः शकृन्-मूत्रं विमुञ्चति
03300201 यातना-देह आवृत्य पाशैर्बद्ध्वा गले बलात्
03300202 नयतो दीर्घम् अध्वानं दण्ड्यं राज-भटा यथा
03300211 तयोर्निर्भिन्न-हृदयस्तर्जनैर्जात-वेपथुः
03300212 पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वम् अनुस्मरन्
03300221 क्षुत्-तृट्-परीतोऽर्क-दवानलानिलैः ।सन्तप्यमानः पथि तप्त-वालुके
03300222 कृच्छ्रेण पृष्ठे कशया च ताडितश् ।चलत्यशक्तोऽपि निराश्रमोदके
03300231 तत्र तत्र पतन् छ्रान्तो मूर्च्छितः पुनरुत्थितः
03300232 पथा पापीयसा नीतस्तरसा यम-सादनम्
03300241 योजनानां सहस्राणि नवतिं नव चाध्वनः
03300242 त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः
03300251 आदीपनं स्व-गात्राणां वेष्टयित्वोल्मुकादिभिः
03300252 आत्म-मांसादनं क्वापि स्व-कृत्तं परतोऽपि वा
03300261 जीवतश्चान्त्राभ्युद्धारः श्व-गृध्रैर्यम-सादने
03300262 सर्प-वृश्चिक-दंशाद्यैर्दशद्भिश्चात्म-वैशसम्
03300271 कृन्तनं चावयवशो गजादिभ्यो भिदापनम्
03300272 पातनं गिरि-शृङ्गेभ्यो रोधनं चाम्बु-गर्तयोः
03300281 यास्तामिस्रान्ध-तामिस्रा रौरवाद्याश्च यातनाः
03300282 भुङ्क्ते नरो वा नारी वा मिथः सङ्गेन निर्मिताः
03300291 अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते
03300292 या यातना वै नारक्यस्ता इहाप्युपलक्षिताः
03300301 एवं कुटुम्बं बिभ्राण उदरम् भर एव वा
03300302 विसृज्येहोभयं प्रेत्य भुङ्क्ते तत्-फलम् ईदृशम्
03300311 एकः प्रपद्यते ध्वान्तं हित्वेदं स्व-कलेवरम्
03300312 कुशलेतर-पाथेयो भूत-द्रोहेण यद्भृतम्
03300321 दैवेनासादितं तस्य शमलं निरये पुमान्
03300322 भुङ्क्ते कुटुम्ब-पोषस्य हृत-वित्त इवातुरः
03300331 केवलेन ह्यधर्मेण कुटुम्ब-भरणोत्सुकः
03300332 याति जीवोऽन्ध-तामिस्रं चरमं तमसः पदम्
03300341 अधस्तान् नर-लोकस्य यावतीर्यातनादयः

03300342 क्रमशः समनुक्रम्य पुनरत्राव्रजेच् छुचिः

Chapter 31

0331001 श्री-भगवान् उवाच
03310011 कर्मणा दैव-नेत्रेण जन्तुर्देहोपपत्तये
03310012 स्त्रियाः प्रविष्ट उदरं पुंसो रेतः-कणाश्रयः
03310021 कललं त्वेक-रात्रेण पञ्च-रात्रेण बुद्बुदम्
03310022 दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्
03310031 मासेन तु शिरो द्वाभ्यां बाह्व्-अङ्घ्र्य्-आद्य्-अङ्ग-विग्रहः
03310032 नख-लोमास्थि-चर्माणि लिङ्ग-च्छिद्रोद्भवस्त्रिभिः
03310041 चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्-तृड्-उद्भवः
03310042 षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे
03310051 मातुर्जग्धान्न-पानाद्यैरेधद्-धातुरसम्मते
03310052 शेते विण्-मूत्रयोर्गर्ते स जन्तुर्जन्तु-सम्भवे
03310061 कृमिभिः क्षत-सर्वाङ्गः सौकुमार्यात् प्रतिक्षणम्
03310062 मूर्च्छाम् आप्नोत्युरु-क्लेशस्तत्रत्यैः क्षुधितैर्मुहुः
03310071 कटु-तीक्ष्णोष्ण-लवण- रूक्षाम्लादिभिरुल्बणैः
03310072 मातृ-भुक्तैरुपस्पृष्टः सर्वाङ्गोत्थित-वेदनः
03310081 उल्बेन संवृतस्तस्मिन्न् अन्त्रैश्च बहिरावृतः
03310082 आस्ते कृत्वा शिरः कुक्षौ भुग्न-पृष्ठ-शिरोधरः
03310091 अकल्पः स्वाङ्ग-चेष्टायां शकुन्त इव पञ्जरे
03310092 तत्र लब्ध-स्मृतिर्दैवात् कर्म जन्म-शतोद्भवम्
03310093 स्मरन् दीर्घम् अनुच्छ्वासं शर्म किं नाम विन्दते
03310101 आरभ्य सप्तमान् मासाल् लब्ध-बोधोऽपि वेपितः
03310102 नैकत्रास्ते सूति-वातैर्विष्ठा-भूरिव सोदरः
03310111 नाथमान ऋषिर्भीतः सप्त-वध्रिः कृताञ्जलिः
03310112 स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः
0331012 जन्तुरुवाच
03310121 तस्योपसन्नम् अवितुं जगदिच्छयात्त-
03310122 नाना-तनोर्भुवि चलच्-चरणारविन्दम्
03310123 सोऽहं व्रजामि शरणं ह्यकुतो-भयं मे

03310124 येनेदृशी गतिरदर्श्यसतोऽनुरूपा
03310131 यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा
03310132 भूतेन्द्रियाशयमयीम् अवलम्ब्य मायाम्
03310133 आस्ते विशुद्धम् अविकारम् अखण्ड-बोधम्
03310134 आतप्यमान-हृदयेऽवसितं नमामि
03310141 यः पञ्च-भूत-रचिते रहितः शरीरे
03310142 च्छन्नोऽयथेन्द्रिय-गुणार्थ-चिद्-आत्मकोऽहम्
03310143 तेनाविकुण्ठ-महिमानम् ऋषिं तम् एनं
03310144 वन्दे परं प्रकृति-पूरुषयोः पुमांसम्
03310151 यन्-माययोरु-गुण-कर्म-निबन्धनेऽस्मिन्
03310152 सांसारिके पथि चरंस्तद्-अभिश्रमेण
03310153 नष्ट-स्मृतिः पुनरयं प्रवृणीत लोकं
03310154 युक्त्या कया महद्-अनुग्रहम् अन्तरेण
03310161 ज्ञानं यदेतददधात् कतमः स देवस्
03310162 त्रै-कालिकं स्थिर-चरेष्वनुवर्तितांशः
03310163 तं जीव-कर्म-पदवीम् अनुवर्तमानास्
03310164 ताप-त्रयोपशमनाय वयं भजेम
03310171 देह्यन्य-देह-विवरे जठराग्निनासृग्-
03310172 विण्-मूत्र-कूप-पतितो भृश-तप्त-देहः
03310173 इच्छन्न् इतो विवसितुं गणयन् स्व-मासान्
03310174 निर्वास्यते कृपण-धीर्भगवन् कदा नु
03310181 येनेदृशीं गतिम् असौ दश-मास्य ईश
03310182 सङ्ग्राहितः पुरु-दयेन भवादृशेन
03310183 स्वेनैव तुष्यतु कृतेन स दीन-नाथः
03310184 को नाम तत्-प्रति विनाञ्जलिम् अस्य कुर्यात्
03310191 पश्यत्ययं धिषणया ननु सप्त-वध्रिः
03310192 शारीरके दम-शरीर्यपरः स्व-देहे
03310193 यत्-सृष्टयासं तम् अहं पुरुषं पुराणं
03310194 पश्ये बहिर्हृदि च चैत्यम् इव प्रतीतम्
03310201 सोऽहं वसन्न् अपि विभो बहु-दुःख-वासं
03310202 गर्भान् न निर्जिगमिषे बहिरन्ध-कूपे
03310203 यत्रोपयातम् उपसर्पति देव-माया
03310204 मिथ्या मतिर्यद्-अनु संसृति-चक्रम् एतत्
03310211 तस्मादहं विगत-विक्लव उद्धरिष्य
03310212 आत्मानम् आशु तमसः सुहृदात्मनैव
03310213 भूयो यथा व्यसनम् एतदनेक-रन्ध्रं
03310214 मा मे भविष्यदुपसादित-विष्णु-पादः

Chapter 32

0332022 कपिल उवाच
03320221 एवं कृत-मतिर्गर्भे दश-मास्यः स्तुवन्न् ऋषिः
03320222 सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूति-मारुतः
03320231 तेनावसृष्टः सहसा कृत्वावाक् शिर आतुरः
03320232 विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हत-स्मृतिः
03320241 पतितो भुव्यसृङ्-मिश्रः विष्ठा-भूरिव चेष्टते
03320242 रोरूयति गते ज्ञाने विपरीतां गतिं गतः
03320251 पर-च्छन्दं न विदुषा पुष्यमाणो जनेन सः
03320252 अनभिप्रेतम् आपन्नः प्रत्याख्यातुम् अनीश्वरः
03320261 शायितोऽशुचि-पर्यङ्के जन्तुः स्वेदज-दूषिते
03320262 नेशः कण्डूयनेऽङ्गानाम् आसनोत्थान-चेष्टने
03320271 तुदन्त्याम-त्वचं दंशा मशका मत्कुणादयः
03320272 रुदन्तं विगत-ज्ञानं कृमयः कृमिकं यथा
03320281 इत्येवं शैशवं भुक्त्वा दुःखं पौगण्डम् एव च
03320282 अलब्धाभीप्सितो ज्ञानादिद्ध-मन्युः शुचार्पितः
03320291 सह देहेन मानेन वर्धमानेन मन्युना
03320292 करोति विग्रहं कामी कामिष्वन्ताय चात्मनः
03320301 भूतैः पञ्चभिरारब्धे देहे देह्यबुधोऽसकृत्
03320302 अहं ममेत्यसद्-ग्राहः करोति कुमतिर्मतिम्
03320311 तद्-अर्थं कुरुते कर्म यद्-बद्धो याति संसृतिम्
03320312 योऽनुयाति ददत् क्लेशम् अविद्या-कर्म-बन्धनः
03320321 यद्यसद्भिः पथि पुनः शिश्नोदर-कृतोद्यमैः
03320322 आस्थितो रमते जन्तुस्तमो विशति पूर्ववत्
03320331 सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा
03320332 शमो दमो भगश्चेति यत्-सङ्गाद्याति सङ्क्षयम्
03320341 तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु
03320342 सङ्गं न कुर्याच् छोच्येषु योषित्-क्रीडा-मृगेषु च
03320351 न तथास्य भवेन् मोहो बन्धश्चान्य-प्रसङ्गतः

03320352 योषित्-सङ्गाद्यथा पुंसो यथा तत्-सङ्गि-सङ्गतः
03320361 प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्-रूप-धर्षितः
03320362 रोहिद्-भूतां सोऽन्वधावदृक्ष-रूपी हत-त्रपः
03320371 तत्-सृष्ट-सृष्ट-सृष्टेषु को न्वखण्डित-धीः पुमान्
03320372 ऋषिं नारायणम् ऋते योषिन्-मय्येह मायया
03320381 बलं मे पश्य मायायाः स्त्री-मय्या जयिनो दिशाम्
03320382 या करोति पदाक्रान्तान् भ्रूवि-जृम्भेण केवलम्
03320391 सङ्गं न कुर्यात् प्रमदासु जातु । योगस्य पारं परम् आरुरुक्षुः
03320392 मत्-सेवया प्रतिलब्धात्म-लाभो । वदन्ति या निरय-द्वारम् अस्य
03320401 योपयाति शनैर्माया योषिद्देव-विनिर्मिता
03320402 ताम् ईक्षेतात्मनो मृत्युं तृणैः कूपम् इवावृतम्
03320411 यां मन्यते पतिं मोहान् मन्-मायाम् ऋषभायतीम्
03320412 स्त्रीत्वं स्त्री-सङ्गतः प्राप्तो वित्तापत्य-गृह-प्रदम्
03320421 ताम् आत्मनो विजानीयात् पत्य्-अपत्य-गृहात्मकम्
03320422 दैवोपसादितं मृत्युं मृगयोर्गायनं यथा
03320431 देहेन जीव-भूतेन लोकाल् लोकम् अनुव्रजन्
03320432 भुञ्जान एव कर्माणि करोत्यविरतं पुमान्
03320441 जीवो ह्यस्यानुगो देहो भूतेन्द्रिय-मनो-मयः
03320442 तन्-निरोधोऽस्य मरणम् आविर्भावस्तु सम्भवः
03320451 द्रव्योपलब्धि-स्थानस्य द्रव्येक्षायोग्यता यदा
03320452 तत् पञ्चत्वम् अहं-मानादुत्पत्तिर्द्रव्य-दर्शनम्
03320461 यथाक्ष्णोर्द्रव्यावयव- दर्शनायोग्यता यदा
03320462 तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः
03320471 तस्मान् न कार्यः सन्त्रासो न कार्पण्यं न सम्भ्रमः
03320472 बुद्ध्वा जीव-गतिं धीरो मुक्त-सङ्गश्चरेदिह
03320481 सम्यग्-दर्शनया बुद्ध्या योग-वैराग्य-युक्तया
03320482 माया-विरचिते लोके चरेन् न्यस्य कलेवरम्
0332001 कपिल उवाच
03320011 अथ यो गृह-मेधीयान् धर्मान् एवावसन् गृहे
03320012 कामम् अर्थं च धर्मान् स्वान् दोग्धि भूयः पिपर्ति तान्
03320021 स चापि भगवद्-धर्मात् काम-मूढः पराङ्-मुखः
03320022 यजते क्रतुभिर्देवान् पित्ःंश्च श्रद्धयान्वितः
03320031 तच्-छ्रद्धयाक्रान्त-मतिः पितृ-देव-व्रतः पुमान्
03320032 गत्वा चान्द्रमसं लोकं सोम-पाः पुनरेष्यति
03320041 यदा चाहीन्द्र-शय्यायां शेतेऽनन्तासनो हरिः
03320042 तदा लोका लयं यान्ति त एते गृह-मेधिनाम्
03320051 ये स्व-धर्मान् न दुह्यन्ति धीराः कामार्थ-हेतवे
03320052 निःसङ्गा न्यस्त-कर्माणः प्रशान्ताः शुद्ध-चेतसः
03320061 निवृत्ति-धर्म-निरता निर्ममा निरहङ्कृताः

03320062 स्व-धर्माप्तेन सत्त्वेन परिशुद्धेन चेतसा
03320071 सूर्य-द्वारेण ते यान्ति पुरुषं विश्वतो-मुखम्
03320072 परावरेशं प्रकृतिम् अस्योत्पत्त्य्-अन्त-भावनम्
03320081 द्वि-परार्धावसाने यः प्रलयो ब्रह्मणस्तु ते
03320082 तावदध्यासते लोकं परस्य पर-चिन्तकाः
03320091 क्ष्माम्भो-'नलानिल-वियन्-मन-इन्द्रियार्थ-
03320092 भूतादिभिः परिवृतं प्रतिसञ्जिहीर्षुः
03320093 अव्याकृतं विशति यर्हि गुण-त्रयात्माकालं
03320094 पराख्यम् अनुभूय परः स्वयम्भूः
03320101 एवं परेत्य भगवन्तम् अनुप्रविष्टाये
03320102 योगिनो जित-मरुन्-मनसो विरागाः
03320103 तेनैव साकम् अमृतं पुरुषं पुराणं
03320104 ब्रह्म प्रधानम् उपयान्त्यगताभिमानाः
03320111 अथ तं सर्व-भूतानां हृत्-पद्मेषु कृतालयम्
03320112 श्रुतानुभावं शरणं व्रज भावेन भामिनि
03320121 आद्यः स्थिर-चराणां यो वेद-गर्भः सहर्षिभिः
03320122 योगेश्वरैः कुमाराद्यैः सिद्धैर्योग-प्रवर्तकैः
03320131 भेद-दृष्ट्याभिमानेन निःसङ्गेनापि कर्मणा
03320132 कर्तृत्वात् सगुणं ब्रह्म पुरुषं पुरुषर्षभम्
03320141 स संसृत्य पुनः काले कालेनेश्वर-मूर्तिना
03320142 जाते गुण-व्यतिकरे यथा-पूर्वं प्रजायते
03320151 ऐश्वर्यं पारमेष्ठ्यं च तेऽपि धर्म-विनिर्मितम्
03320152 निषेव्य पुनरायान्ति गुण-व्यतिकरे सति
03320161 ये त्विहासक्त-मनसः कर्मसु श्रद्धयान्विताः
03320162 कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः
03320171 रजसा कुण्ठ-मनसः कामात्मानो ज्ञितेन्द्रियाः
03320172 पितृ-न् यजन्त्यनुदिनं गृहेष्वभिरताशयाः
03320181 त्रै-वर्गिकास्ते पुरुषा विमुखा हरि-मेधसः
03320182 कथायां कथनीयोरु- विक्रमस्य मधुद्विषः
03320191 नूनं दैवेन विहता ये चाच्युत-कथा-सुधाम्
03320192 हित्वा शृण्वन्त्यसद्-गाथाः पुरीषम् इव विड्-भुजः
03320201 दक्षिणेन पथार्यम्णः पितृ-लोकं व्रजन्ति ते
03320202 प्रजाम् अनु प्रजायन्ते श्मशानान्त-क्रिया-कृतः
03320211 ततस्ते क्षीण-सुकृताः पुनर्लोकम् इमं सति
03320211 पतन्ति विवशा देवैः सद्यो विभ्रंशितोदयाः
03320221 तस्मात् त्वं सर्व-भावेन भजस्व परमेष्ठिनम्
03320222 तद्-गुणाश्रयया भक्त्या भजनीय-पदाम्बुजम्
03320231 वासुदेवे भगवति भक्ति-योगः प्रयोजितः
03320232 जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्म-दर्शनम्

03320241 यदास्य चित्तम् अर्थेषु समेष्विन्द्रिय-वृत्तिभिः
03320242 न विगृह्णाति वैषम्यं प्रियम् अप्रियम् इत्युत
03320251 स तदैवात्मनात्मानं निःसङ्गं सम-दर्शनम्
03320252 हेयोपादेय-रहितम् आरूढं पदम् ईक्षते
03320261 ज्ञान-मात्रं परं ब्रह्म परमात्मेश्वरः पुमान्
03320262 दृश्य्-आदिभिः पृथग् भावैर्भगवान् एक ईयते
03320271 एतावान् एव योगेन समग्रेणेह योगिनः
03320272 युज्यतेऽभिमतो ह्यर्थो यदसङ्गस्तु कृत्स्नशः
03320281 ज्ञानम् एकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम्
03320282 अवभात्यर्थ-रूपेण भ्रान्त्या शब्दादि-धर्मिणा
03320291 यथा महान् अहं-रूपस्त्रि-वृत् पञ्च-विधः स्वराट्
03320292 एकादश-विधस्तस्य वपुरण्डं जगद्यतः
03320301 एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः
03320302 समाहितात्मा निःसङ्गो विरक्त्या परिपश्यति
03320311 इत्येतत् कथितं गुर्वि ज्ञानं तद्ब्रह्म-दर्शनम्
03320312 येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च
03320321 ज्ञान-योगश्च मन्-निष्ठो नैर्गुण्यो भक्ति-लक्षणः
03320322 द्वयोरप्येक एवार्थो भगवच्-छब्द-लक्षणः
03320331 यथेन्द्रियैः पृथग्-द्वारैरर्थो बहु-गुणाश्रयः
03320332 एको नानेयते तद्वद्भगवान् शास्त्र-वर्त्मभिः
03320341 क्रियया क्रतुभिर्दानैस्तपः-स्वाध्याय-मर्शनैः
03320342 आत्मेन्द्रिय-जयेनापि सन्न्यासेन च कर्मणाम्
03320351 योगेन विविधाङ्गेन भक्ति-योगेन चैव हि
03320352 धर्मेणोभय-चिह्नेन यः प्रवृत्ति-निवृत्तिमान्
03320361 आत्म-तत्त्वावबोधेन वैराग्येण दृढेन च
03320362 ईयते भगवान् एभिः सगुणो निर्गुणः स्व-दृक्
03320371 प्रावोचं भक्ति-योगस्य स्वरूपं ते चतुर्-विधम्
03320372 कालस्य चाव्यक्त-गतेर्योऽन्तर्धावति जन्तुषु
03320381 जीवस्य संसृतीर्बह्वीरविद्या-कर्म-निर्मिताः
03320382 यास्वङ्ग प्रविशन्न् आत्मा न वेद गतिम् आत्मनः
03320391 नैतत् खलायोपदिशेन् नाविनीताय कर्हिचित्
03320392 न स्तब्धाय न भिन्नाय नैव धर्म-ध्वजाय च
03320401 न लोलुपायोपदिशेन् न गृहारूढ-चेतसे
03320402 नाभक्ताय च मे जातु न मद्-भक्त-द्विषाम् अपि
03320411 श्रद्दधानाय भक्ताय विनीतायानसूयवे
03320412 भूतेषु कृत-मैत्राय शुश्रूषाभिरताय च
03320421 बहिर्-जात-विरागाय शान्त-चित्ताय दीयताम्
03320422 निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः
03320431 य इदं शृणुयादम्ब श्रद्धया पुरुषः सकृत्

03320432 यो वाभिधत्ते मच्-चित्तः स ह्येति पदवीं च मे

Chapter 33

0333001 मैत्रेय उवाच
03330011 एवं निशम्य कपिलस्य वचो जनित्रीसा कर्दमस्य दयिता किल देवहूतिः
03330012 विस्रस्त-मोह-पटला तम् अभिप्रणम्यतुष्टाव तत्त्व-विषयाङ्कित-सिद्धि-भूमिम्
0333002 देवहूतिरुवाच
03330021 अथाप्यजोऽन्तः-सलिले शयानं ।भूतेन्द्रियार्थात्म-मयं वपुस्ते
03330022 गुण-प्रवाहं सद्-अशेष-बीजं ।दध्यौ स्वयं यज्-जठराब्ज-जातः
03330031 स एव विश्वस्य भवान् विधत्ते ।गुण-प्रवाहेण विभक्त-वीर्यः
03330032 सर्गाद्यनीहोऽवितथाभिसन्धिर् ।आत्मेश्वरोऽतर्क्य-सहस्र-शक्तिः
03330041 स त्वं भृतो मे जठरेण नाथ ।कथं नु यस्योदर एतदासीत्
03330042 विश्वं युगान्ते वट-पत्र एकः ।शेते स्म माया-शिशुरङ्घ्रि-पानः
03330051 त्वं देह-तन्त्रः प्रशमाय पाप्मनां ।निदेश-भाजां च विभो विभूतये
03330052 यथावतारास्तव सूकरादयस् ।तथायम् अप्यात्म-पथोपलब्धये
03330061 यन्-नामधेय-श्रवणानुकीर्तनाद् ।यत्-प्रह्वणाद्यत्-स्मरणादपि क्वचित्
03330062 श्वादोऽपि सद्यः सवनाय कल्पते ।कुतः पुनस्ते भगवन् नु दर्शनात्
03330071 अहो बत श्व-पचोऽतो गरीयान् ।यज्-जिह्वाग्रे वर्तते नाम तुभ्यम्
03330072 तेपुस्तपस्ते जुहुवुः सस्नुरार्या ।ब्रह्मानूचुर्नाम गृणन्ति ये ते
03330081 तं त्वाम् अहं ब्रह्म परं पुमांसं ।प्रत्यक्-स्रोतस्यात्मनि संविभाव्यम्
03330082 स्व-तेजसा ध्वस्त-गुण-प्रवाहं ।वन्दे विष्णुं कपिलं वेद-गर्भम्
0333009 मैत्रेय उवाच
03330091 ईडितो भगवान् एवं कपिलाख्यः परः पुमान्
03330092 वाचाविक्लवयेत्याह मातरं मातृ-वत्सलः
0333010 कपिल उवाच
03330101 मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे
03330102 आस्थितेन परां काष्ठाम् अचिरादवरोत्स्यसि
03330111 श्रद्धत्स्वैतन् मतं मह्यं जुष्टं यद्ब्रह्म-वादिभिः
03330112 येन माम् अभयं याया मृत्युम् ऋच्छन्त्यतद्-विदः
0333012 मैत्रेय उवाच

03330121 इति प्रदर्श्य भगवान् सतीं ताम् आत्मनो गतिम्
03330122 स्व-मात्रा ब्रह्म-वादिन्या कपिलोऽनुमतो ययौ
03330131 सा चापि तनयोक्तेन योगादेशेन योग-युक्
03330132 तस्मिन्न् आश्रम आपीडे सरस्वत्याः समाहिता
03330141 अभीक्ष्णावगाह-कपिशान् जटिलान् कुटिलालकान्
03330142 आत्मानं चोग्र-तपसा बिभ्रती चीरिणं कृशम्
03330151 प्रजापतेः कर्दमस्य तपो-योग-विजृम्भितम्
03330152 स्व-गार्हस्थ्यम् अनौपम्यं प्रार्थ्यं वैमानिकैरपि
03330161 पयः-फेन-निभाः शय्या दान्ता रुक्म-परिच्छदाः
03330162 आसनानि च हैमानि सुस्पर्शास्तरणानि च
03330171 स्वच्छ-स्फटिक-कुड्येषु महा-मारकतेषु च
03330172 रत्न-प्रदीपा आभान्ति ललना रत्न-संयुताः
03330181 गृहोद्यानं कुसुमितै रम्यं बह्व्-अमर-द्रुमैः
03330182 कूजद्-विहङ्ग-मिथुनं गायन्-मत्त-मधुव्रतम्
03330191 यत्र प्रविष्टम् आत्मानं विबुधानुचरा जगुः
03330192 वाप्याम् उत्पल-गन्धिन्यां कर्दमेनोपलालितम्
03330201 हित्वा तदीप्सिततमम् अप्याखण्डल-योषिताम्
03330202 किञ्चिच् चकार वदनं पुत्र-विश्लेषणातुरा
03330211 वनं प्रव्रजिते पत्यावपत्य-विरहातुरा
03330212 ज्ञात-तत्त्वाप्यभून् नष्टे वत्से गौरिव वत्सला
03330221 तम् एव ध्यायती देवम् अपत्यं कपिलं हरिम्
03330222 बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे
03330231 ध्यायती भगवद्-रूपं यदाह ध्यान-गोचरम्
03330232 सुतः प्रसन्न-वदनं समस्त-व्यस्त-चिन्तया
03330241 भक्ति-प्रवाह-योगेन वैराग्येण बलीयसा
03330242 युक्तानुष्ठान-जातेन ज्ञानेन ब्रह्म-हेतुना
03330251 विशुद्धेन तदात्मानम् आत्मना विश्वतो-मुखम्
03330252 स्वानुभूत्या तिरोभूत- माया-गुण-विशेषणम्
03330261 ब्रह्मण्यवस्थित-मतिर्भगवत्यात्म-संश्रये
03330262 निवृत्त-जीवापत्तित्वात् क्षीण-क्लेशाप्त-निर्वृतिः
03330271 नित्यारूढ-समाधित्वात् परावृत्त-गुण-भ्रमा
03330272 न सस्मार तदात्मानं स्वप्ने दृष्टम् इवोत्थितः
03330281 तद्-देहः परतः पोषोऽप्यकृशश्चाध्य्-असम्भवात्
03330282 बभौ मलैरवच्छन्नः सधूम इव पावकः
03330291 स्वाङ्गं तपो-योगमयं मुक्त-केशं गताम्बरम्
03330292 दैव-गुप्तं न बुबुधे वासुदेव-प्रविष्ट-धीः
03330301 एवं सा कपिलोक्तेन मार्गेणाचिरतः परम्
03330302 आत्मानं ब्रह्म-निर्वाणं भगवन्तम् अवाप ह
03330311 तद्वीरासीत् पुण्यतमं क्षेत्रं त्रैलोक्य-विश्रुतम्

03330312 नाम्ना सिद्ध-पदं यत्र सा संसिद्धिम् उपेयुषी
03330321 तस्यास्तद्योग-विधुत- मार्त्यं मर्त्यम् अभूत् सरित्
03330322 स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्ध-सेविता
03330331 कपिलोऽपि महा-योगी भगवान् पितुराश्रमात्
03330332 मातरं समनुज्ञाप्य प्राग्-उदीचीं दिशं ययौ
03330341 सिद्ध-चारण-गन्धर्वैर्मुनिभिश्चाप्सरो-गणैः
03330342 स्तूयमानः समुद्रेण दत्तार्हण-निकेतनः
03330351 आस्ते योगं समास्थाय साङ्ख्याचार्यैरभिष्टुतः
03330352 त्रयाणाम् अपि लोकानाम् उपशान्त्यै समाहितः
03330361 एतन् निगदितं तात यत् पृष्टोऽहं तवानघ
03330362 कपिलस्य च संवादो देवहूत्याश्च पावनः
03330371 य इदम् अनुशृणोति योऽभिधत्ते ।कपिल-मुनेर्मतम् आत्म-योग-गुह्यम्
03330372 भगवति कृत-धीः सुपर्ण-केताव् ।उपलभते भगवत्-पदारविन्दम्

Part IV

Canto Four

Chapter 1

0401001 मैत्रेय उवाच
04010011 मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे
04010012 आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः
04010021 आकूतिं रुचये प्रादाद् अपि भ्रातृमतीं नृपः
04010022 पुत्रिका-धर्मम् आश्रित्य शतरूपानुमोदितः
04010031 प्रजापतिः स भगवान् रुचिस्तस्याम् अजीजनत्
04010032 मिथुनं ब्रह्म-वर्चस्वी परमेण समाधिना
04010041 यस्तयोः पुरुषः साक्षाद् विष्णुर्यज्ञ-स्वरूप-धृक्
04010042 या स्त्री सा दक्षिणा भूतेरंश-भूतानपायिनी
04010051 आनिन्ये स्व-गृहं पुत्र्याः पुत्रं वितत-रोचिषम्
04010052 स्वायम्भुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम्
04010061 तां कामयानां भगवान् उवाह यजुषां पतिः
04010062 तुष्टायां तोषम् आपन्नोऽ जनयद् द्वादशात्मजान्
04010071 तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः
04010072 इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्वि-षट्
04010081 तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे
04010082 मरीचि-मिश्रा ऋषयो यज्ञः सुर-गणेश्वरः
04010091 प्रियव्रतोत्तानपादौ मनु-पुत्रौ महौजसौ
04010092 तत्-पुत्र-पौत्र-नप्तॄणाम् अनुवृत्तं तद्-अन्तरम्
04010101 देवहूतिम् अदात् तात कर्दमायात्मजां मनुः
04010102 तत्-सम्बन्धि श्रुत-प्रायं भवता गदतो मम
04010111 दक्षाय ब्रह्म-पुत्राय प्रसूतिं भगवान् मनुः
04010112 प्रायच्छद् यत्-कृतः सर्गस्त्रि-लोक्यां विततो महान्
04010121 याः कर्दम-सुताः प्रोक्ता नव ब्रह्मर्षि-पत्नयः
04010122 तासां प्रसूति-प्रसवं प्रोच्यमानं निबोध मे
04010131 पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा
04010132 कश्यपं पूर्णिमानं च ययोरापूरितं जगत्
04010141 पूर्णिमासूत विरजं विश्वगं च परन्तप

04010142 देवकुल्यां हरेः पाद- शौचाद् याभूत् सरिद् दिवः
04010151 अत्रेः पत्न्यनसूया त्रीं' जज्ञे सुयशसः सुतान्
04010152 दत्तं दुर्वाससं सोमम् आत्मेश-ब्रह्म-सम्भवान्
0401016 विदुर उवाच
04010161 अत्रेर्गृहे सुर-श्रेष्ठाः स्थित्य्-उत्पत्त्य्-अन्त-हेतवः
04010162 किञ्चिच् चिकीर्षवो जाता एतद् आख्याहि मे गुरो
0401017 मैत्रेय उवाच
04010171 ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्म-विदां वरः
04010172 सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः
04010181 तस्मिन् प्रसून-स्तबक- पलाशाशोक-कानने
04010182 वार्भिः स्रवद्भिरुद्घुष्टे निर्विन्ध्यायाः समन्ततः
04010191 प्राणायामेन संयम्य मनो वर्ष-शतं मुनिः
04010192 अतिष्ठद् एक-पादेन निर्द्वन्द्वोऽनिल-भोजनः
04010201 शरणं तं प्रपद्येऽहं य एव जगद्-ईश्वरः
04010202 प्रजाम् आत्म-समां मह्यं प्रयच्छत्विति चिन्तयन्
04010211 तप्यमानं त्रि-भुवनं प्राणायामैधसाग्निना
04010212 निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः
04010221 अप्सरो-मुनि-गन्धर्व- सिद्ध-विद्याधरोरगैः
04010222 वितायमान-यशसस्तद्-आश्रम-पदं ययुः
04010231 तत्-प्रादुर्भाव-संयोग- विद्योतित-मना मुनिः
04010232 उत्तिष्ठन्न् एक-पादेन ददर्श विबुधर्षभान्
04010241 प्रणम्य दण्डवद् भूमावुपतस्थेऽर्हणाञ्जलिः
04010242 वृष-हंस-सुपर्ण-स्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान्
04010251 कृपावलोकेन हसद्- वदनेनोपलम्भितान्
04010252 तद्-रोचिषा प्रतिहते निमील्य मुनिरक्षिणी
04010261 चेतस्तत्-प्रवणं युञ्जन्न् अस्तावीत् संहताञ्जलिः
04010262 श्लक्ष्णया सूक्तया वाचा सर्व-लोक-गरीयसः
0401027 अत्रिरुवाच
04010271 विश्वोद्भव-स्थिति-लयेषु विभज्यमानैर्
04010272 माया-गुणैरनुयुगं विगृहीत-देहाः
04010273 ते ब्रह्म-विष्णु-गिरिशाः प्रणतोऽस्म्यहं वस्
04010274 तेभ्यः क एव भवतां म इहोपहूतः
04010281 एको मयेह भगवान् विविध-प्रधानैश्
04010282 चित्ती-कृतः प्रजननाय कथं नु यूयम्
04010283 अत्रागतास्तनु-भृतां मनसोऽपि दूराद्
04010284 ब्रूत प्रसीदत महान् इह विस्मयो मे
0401029 मैत्रेय उवाच
04010291 इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः
04010292 प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तम् ऋषिं प्रभो

0401030 देवा ऊचुः
04010301 यथा कृतस्ते सङ्कल्पो भाव्यं तेनैव नान्यथा
04010302 सत्-सङ्कल्पस्य ते ब्रह्मन् यद् वै ध्यायति ते वयम्
04010311 अथास्मद्-अंश-भूतास्ते आत्मजा लोक-विश्रुताः
04010312 भवितारोऽङ्ग भद्रं ते विस्रप्स्यन्ति च ते यशः
04010321 एवं काम-वरं दत्त्वा प्रतिजग्मुः सुरेश्वराः
04010322 सभाजितास्तयोः सम्यग् दम्पत्योर्मिषतोस्ततः
04010331 सोमोऽभूद् ब्रह्मणोऽंशेन दत्तो विष्णोस्तु योगवित्
04010332 दुर्वासाः शङ्करस्यांशो निबोधाङ्गिरसः प्रजाः
04010341 श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः
04010342 सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा
04010351 तत्-पुत्रावपरावास्तां ख्यातौ स्वारोचिषेऽन्तरे
04010352 उतथ्यो भगवान् साक्षाद् ब्रह्मिष्ठश्च बृहस्पतिः
04010361 पुलस्त्यो ऽजनयत् पत्न्याम् अगस्त्यं च हविर्भुवि
04010362 सोऽन्य-जन्मनि दह्राग्निर्विश्रवाश्च महा-तपाः
04010371 तस्य यक्ष-पतिर्देवः कुबेरस्त्विडविडा-सुतः
04010372 रावणः कुम्भकर्णश्च तथान्यस्यां विभीषणः
04010381 पुलहस्य गतिर्भार्या त्रीन् असूत सती सुतान्
04010382 कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महा-मते
04010391 क्रतोरपि क्रिया भार्या वालखिल्यान् असूयत
04010392 ऋषीन् षष्टि-सहस्राणि ज्वलतो ब्रह्म-तेजसा
04010401 ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परन्तप
04010402 चित्रकेतु-प्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः
04010411 चित्रकेतुः सुरोचिश्च विरजा मित्र एव च
04010412 उल्बणो वसुभृद्यानो द्युमान् शक्त्य्-आदयोऽपरे
04010421 चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृत-व्रतम्
04010422 दध्यञ्चम् अश्वशिरसं भृगोर्वंशं निबोध मे
04010431 भृगुः ख्यात्यां महा-भागः पत्न्यां पुत्रान् अजीजनत्
04010432 धातारं च विधातारं श्रियं च भगवत्-पराम्
04010441 आयतिं नियतिं चैव सुते मेरुस्तयोरदात्
04010442 ताभ्यां तयोरभवतां मृकण्डः प्राण एव च
04010451 मार्कण्डेयो मृकण्डस्य प्राणाद् वेदशिरा मुनिः
04010452 कविश्च भार्गवो यस्य भगवान् उशना सुतः
04010461 त एते मुनयः क्षत्तर्लोकान् सर्गैरभावयन्
04010462 एष कर्दम-दौहित्र- सन्तानः कथितस्तव
04010463 शृण्वतः श्रद्दधानस्य सद्यः पाप-हरः परः
04010471 प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः
04010472 तस्यां ससर्ज दुहितॄः षोडशामल-लोचनाः
04010481 त्रयोदशादाद् धर्माय तथैकाम् अग्नये विभुः
04010482 पितृभ्य एकां युक्तेभ्यो भवायैकां भव-च्छिदे

04010491 श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः
04010492 बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः
04010501 श्रद्धासूत शुभं मैत्री प्रसादम् अभयं दया
04010502 शान्तिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत
04010511 योगं क्रियोन्नतिर्दर्पम् अर्थं बुद्धिरसूयत
04010512 मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम्
04010521 मूर्तिः सर्व-गुणोत्पत्तिर्नर-नारायणावृषी
04010531 ययोर्जन्मन्यदो विश्वम् अभ्यनन्दत् सुनिर्वृतम्
04010532 मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः
04010541 दिव्यवाद्यन्त तूर्याणि पेतुः कुसुम-वृष्टयः
04010542 मुनयस्तुष्टुवुस्तुष्टा जगुर्गन्धर्व-किन्नराः
04010551 नृत्यन्ति स्म स्त्रियो देव्य आसीत् परम-मङ्गलम्
04010552 देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः
0401056 देवा ऊचुः
04010561 यो मायया विरचितं निजयात्मनीदं
04010562 खे रूप-भेदम् इव तत्-प्रतिचक्षणाय
04010563 एतेन धर्म-सदने ऋषि-मूर्तिनाद्य
04010564 प्रादुश्चकार पुरुषाय नमः परस्मै
04010571 सोऽयं स्थिति-व्यतिकरोपशमाय सृष्टान्
04010572 सत्त्वेन नः सुर-गणान् अनुमेय-तत्त्वः
04010573 दृश्याद् अदभ्र-करुणेन विलोकनेन
04010574 यच् छ्री-निकेतम् अमलं क्षिपतारविन्दम्
04010581 एवं सुर-गणैस्तात भगवन्तावभिष्टुतौ
04010582 लब्धावलोकैर्ययतुरर्चितौ गन्धमादनम्
04010591 ताविमौ वै भगवतो हरेरंशाविहागतौ
04010592 भार-व्ययाय च भुवः कृष्णौ यदु-कुरूद्वहौ
04010601 स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीन् अजीजनत्
04010602 पावकं पवमानं च शुचिं च हुत-भोजनम्
04010611 तेभ्योऽग्नयः समभवन् चत्वारिंशच् च पञ्च च
04010612 त एवैकोनपञ्चाशत् साकं पितृ-पितामहैः
04010621 वैतानिके कर्मणि यन्- नामभिर्ब्रह्म-वादिभिः
04010622 आग्नेय्य इष्टयो यज्ञे निरूप्यन्तेऽग्नयस्तु ते
04010631 अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः
04010632 साग्नयोऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा
04010641 तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा
04010642 उभे ते ब्रह्म-वादिन्यौ ज्ञान-विज्ञान-पारगे
04010651 भवस्य पत्नी तु सती भवं देवम् अनुव्रता
04010652 आत्मनः सदृशं पुत्रं न लेभे गुण-शीलतः
04010661 पितर्यप्रतिरूपे स्वे भवायानागसे रुषा
04010662 अप्रौढैवात्मनात्मानम् अजहाद् योग-संयुता

Chapter 2

0402001 विदुर उवाच
04020011 भवे शीलवतां श्रेष्ठे दक्षो दुहितृ-वत्सलः
04020012 विद्वेषम् अकरोत् कस्माद् अनादृत्यात्मजां सतीम्
04020021 कस्तं चराचर-गुरुं निर्वैरं शान्त-विग्रहम्
04020022 आत्मारामं कथं द्वेष्टि जगतो दैवतं महत्
04020031 एतद् आख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च
04020032 विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान् सती
0402004 मैत्रेय उवाच
04020041 पुरा विश्व-सृजां सत्रे समेताः परमर्षयः
04020042 तथामर-गणाः सर्वे सानुगा मुनयोऽग्नयः
04020051 तत्र प्रविष्टम् ऋषयो दृष्ट्वार्कम् इव रोचिषा
04020052 भ्राजमानं वितिमिरं कुर्वन्तं तन् महत् सदः
04020061 उदतिष्ठन् सदस्यास्ते स्व-धिष्ण्येभ्यः सहाग्नयः
04020062 ऋते विरिञ्चां शर्वं च तद्-भासाक्षिप्त-चेतसः
04020071 सदसस्-पतिभिर्दक्षो भगवान् साधु सत्-कृतः
04020072 अजं लोक-गुरुं नत्वा निषसाद तद्-आज्ञया
04020081 प्राङ्-निषण्णं मृडं दृष्ट्वा नामृष्यत् तद्-अनादृतः
04020082 उवाच वामं चक्षुर्भ्याम् अभिवीक्ष्य दहन्न् इव
04020091 श्रूयतां ब्रह्मर्षयो मे सह-देवाः सहाग्नयः
04020092 साधूनां ब्रुवतो वृत्तं नाज्ञानान् न च मत्सरात्
04020101 अयं तु लोक-पालानां यशो-घ्नो निरपत्रपः
04020102 सद्भिराचरितः पन्था येन स्तब्धेन दूषितः
04020111 एष मे शिष्यतां प्राप्तो यन् मे दुहितुरग्रहीत्
04020112 पाणिं विप्राग्नि-मुखतः सावित्र्या इव साधुवत्
04020121 गृहीत्वा मृग-शावाक्ष्याः पाणिं मर्कट-लोचनः
04020122 प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितम्
04020131 लुप्त-क्रियायाशुचये मानिने भिन्न-सेतवे
04020132 अनिच्छन्न् अप्यदां बालां शूद्रायेवोशतीं गिरम्

04020141 प्रेतावासेषु घोरेषु प्रेतैर्भूत-गणैर्वृतः
04020142 अटत्युन्मत्तवन् नग्नो व्युप्त-केशो हसन् रुदन्
04020151 चिता-भस्म-कृत-स्नानः प्रेत-स्रङ्-न्रस्थि-भूषणः
04020152 शिवापदेशो ह्यशिवो मत्तो मत्त-जन-प्रियः
04020153 पतिः प्रमथ-नाथानां तमो-मात्रात्मकात्मनाम्
04020161 तस्मा उन्माद-नाथाय नष्ट-शौचाय दुर्हृदे
04020162 दत्ता बत मया साध्वी चोदिते परमेष्ठिना
0402017 मैत्रेय उवाच
04020171 विनिन्द्यैवं स गिरिशम् अप्रतीपम् अवस्थितम्
04020172 दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे
04020181 अयं तु देव-यजन इन्द्रोपेन्द्रादिभिर्भवः
04020182 सह भागं न लभतां देवैर्देव-गणाधमः
04020191 निषिध्यमानः स सदस्य-मुख्यैर् ।दक्षो गिरित्राय विसृज्य शापम्
04020192 तस्माद् विनिष्क्रम्य विवृद्ध-मन्युर् ।जगाम कौरव्य निजं निकेतनम्
04020201 विज्ञाय शापं गिरिशानुगाग्रणीर् ।नन्दीश्वरो रोष-कषाय-दूषितः
04020202 दक्षाय शापं विससर्ज दारुणं ।ये चान्वमोदंस्तद्-अवाच्यतां द्विजाः
04020211 य एतन् मर्त्यम् उद्दिश्य भगवत्यप्रतिद्रुहि
04020212 द्रुह्यत्यज्ञः पृथग्-दृष्टिस्तत्त्वतो विमुखो भवेत्
04020221 गृहेषु कूट-धर्मेषु सक्तो ग्राम्य-सुखेच्छया
04020222 कर्म-तन्त्रं वितनुते वेद-वाद-विपन्न-धीः
04020231 बुद्ध्या पराभिध्यायिन्या विस्मृतात्म-गतिः पशुः
04020232 स्त्री-कामः सोऽस्त्वतितरां दक्षो बस्त-मुखो ञ्चिरात्
04020241 विद्या-बुद्धिरविद्यायां कर्ममय्याम् असौ जडः
04020242 संसरन्त्विह ये चामुम् अनु शर्वावमानिनम्
04020251 गिरः श्रुतायाः पुष्पिण्या मधु-गन्धेन भूरिणा
04020252 मथ्ना चोन्मथितात्मानः सम्मुह्यन्तु हर-द्विषः
04020261 सर्व-भक्षा द्विजा वृत्त्यै धृत-विद्या-तपो-व्रताः
04020262 वित्त-देहेन्द्रियारामा याचका विचरन्त्विह
04020271 तस्यैवं वदतः शापं श्रुत्वा द्विज-कुलाय वै
04020272 भृगुः प्रत्यसृजच् छापं ब्रह्म-दण्डं दुरत्ययम्
04020281 भव-व्रत-धरा ये च ये च तान् समनुव्रताः
04020282 पाषण्डिनस्ते भवन्तु सच्-छास्त्र-परिपन्थिनः
04020291 नष्ट-शौचा मूढ-धियो जटा-भस्मास्थि-धारिणः
04020292 विशन्तु शिव-दीक्षायां यत्र दैवं सुरासवम्
04020301 ब्रह्म च ब्राह्मणांश्चैव यद् यूयं परिनिन्दथ
04020302 सेतुं विधारणं पुंसाम् अतः पाषण्डम् आश्रिताः
04020311 एष एव हि लोकानां शिवः पन्थाः सनातनः
04020312 यं पूर्वे चानुसन्तस्थुर्यत्-प्रमाणं जनार्दनः
04020321 तद् ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम्
04020322 विगर्ह्य यात पाषण्डं दैवं वो यत्र भूत-राट्

0402033 मैत्रेय उवाच
04020331 तस्यैवं वदतः शापं भृगोः स भगवान् भवः
04020332 निश्चक्राम ततः किञ्चिद् विमना इव सानुगः
04020341 तेऽपि विश्व-सृजः सत्रं सहस्र-परिवत्सरान्
04020342 संविधाय महेष्वास यत्रेज्य ऋषभो हरिः
04020351 आप्लुत्यावभृथं यत्र गङ्गा यमुनयान्विता
04020352 विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः

Chapter 3

0403001 मैत्रेय उवाच
04030011 सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः
04030012 जामातुः श्वशुरस्यापि सुमहान् अतिचक्रमे
04030021 यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना
04030022 प्रजापतीनां सर्वेषाम् आधिपत्ये स्मयोऽभवत्
04030031 इष्ट्वा स वाजपेयेन ब्रह्मिष्ठान् अभिभूय च
04030032 बृहस्पति-सवं नाम समारेभे क्रतूत्तमम्
04030041 तस्मिन् ब्रह्मर्षयः सर्वे देवर्षि-पितृ-देवताः
04030042 आसन् कृत-स्वस्त्ययनास्तत्-पत्न्यश्च स-भर्तृकाः
04030051 तद् उपश्रुत्य नभसि खे-चराणां प्रजल्पताम्
04030052 सती दाक्षायणी देवी पितृ-यज्ञ-महोत्सवम्
04030061 व्रजन्तीः सर्वतो दिग्भ्य उपदेव-वर-स्त्रियः
04030062 विमान-यानाः स-प्रेष्ठा निष्क-कण्ठीः सुवाससः
04030071 दृष्ट्वा स्व-निलयाभ्याशे लोलाक्षीर्मृष्ट-कुण्डलाः
04030072 पतिं भूत-पतिं देवम् औत्सुक्याद् अभ्यभाषत
0403008 सत्युवाच
04030081 प्रजापतेस्ते श्वशुरस्य साम्प्रतं । निर्यापितो यज्ञ-महोत्सवः किल
04030082 वयं च तत्राभिसराम वाम ते । यद्यर्थितामी विबुधा व्रजन्ति हि
04030091 तस्मिन् भगिन्यो मम भर्तृभिः स्वकैर् । ध्रुवं गमिष्यन्ति सुहृद्-दिदृक्षवः
04030092 अहं च तस्मिन् भवताभिकामये । सहोपनीतं परिबर्हम् अर्हितुम्
04030101 तत्र स्वसॄर्मे ननु भर्तृ-सम्मिता । मातृ-ष्वसॄः क्लिन्न-धियं च मातरम्
04030102 द्रक्ष्ये चिरोत्कण्ठ-मना महर्षिभिर् । उन्नीयमानं च मृडाध्वर-ध्वजम्
04030111 त्वय्येतद् आश्चर्यम् अजात्म-मायया । विनिर्मितं भाति गुण-त्रयात्मकम्
04030112 तथाप्यहं योषिद् अतत्त्व-विच् च ते । दीना दिदृक्षे भव मे भव-क्षितिम्
04030121 पश्य प्रयान्तीरभवान्य-योषितो । 'प्यलङ्कृताः कान्त-सखा वरूथशः
04030122 यासां व्रजद्भिः शिति-कण्ठ मण्डितं । नभो विमानैः कल-हंस-पाण्डुभिः
04030131 कथं सुतायाः पितृ-गेह-कौतुकं । निशम्य देहः सुर-वर्य नेङ्गते
04030132 अनाहुता अप्यभियन्ति सौहृदं । भर्तुर्गुरोर्देह-कृतश्च केतनम्

04030141 तन् मे प्रसीदेदम् अमर्त्य वाञ्छितं ।कर्तुं भवान् कारुणिको बतार्हति
04030142 त्वयात्मनोऽर्धेऽहम् अदभ्र-चक्षुषा ।निरूपिता मानुगृहाण याचितः
0403015 ऋषिरुवाच
04030151 एवं गिरित्रः प्रिययाभिभाषितः ।प्रत्यभ्यधत्त प्रहसन् सुहृत्-प्रियः
04030152 संस्मारितो मर्म-भिदः कुवाग्-इषून् ।यान् आह को विश्व-सृजां समक्षतः
0403016 श्री-भगवान् उवाच
04030161 त्वयोदितं शोभनम् एव शोभने ।अनाहुता अप्यभियन्ति बन्धुषु
04030162 ते यद्यनुत्पादित-दोष-दृष्टयो ।बलीयसानात्म्य-मदेन मन्युना
04030171 विद्या-तपो-वित्त-वपुर्-वयः-कुलैः ।सतां गुणैः षड्भिरसत्तमेतरैः
04030172 स्मृतौ हतायां भृत-मान-दुर्दृशः ।स्तब्धा न पश्यन्ति हि धाम भूयसाम्
04030181 नैतादृशानां स्व-जन-व्यपेक्षया ।गृहान् प्रतीयाद् अनवस्थितात्मनाम्
04030182 येऽभ्यागतान् वक्र-धियाभिचक्षते ।आरोपित-भ्रूभिरमर्षणाक्षिभिः
04030191 तथारिभिर्न व्यथते शिलीमुखैः ।शेतेऽर्दिताङ्गो हृदयेन दूयता
04030192 स्वानां यथा वक्र-धियां दुरुक्तिभिर् ।दिवा-निशं तप्यति मर्म-ताडितः
04030201 व्यक्तं त्वम् उत्कृष्ट-गतेः प्रजापतेः ।प्रियात्मजानाम् असि सुभ्रु मे मता
04030202 तथापि मानं न पितुः प्रपत्स्यसे ।मद्-आश्रयात् कः परितप्यते यतः
04030211 पापच्यमानेन हृदातुरेन्द्रियः ।समृद्धिभिः पूरुष-बुद्धि-साक्षिणाम्
04030212 अकल्प एषाम् अधिरोढुम् अञ्जसा ।परं पदं द्वेष्टि यथासुरा हरिम्
04030221 प्रत्युद्गम-प्रश्रयणाभिवादनं ।विधीयते साधु मिथः सुमध्यमे
04030222 प्राज्ञैः परस्मै पुरुषाय चेतसा ।गुहा-शयायैव न देह-मानिने
04030231 सत्त्वं विशुद्धं वसुदेव-शब्दितं ।यद् ईयते तत्र पुमान् अपावृतः
04030232 सत्त्वे च तस्मिन् भगवान् वासुदेवो ।ह्यधोक्षजो मे नमसा विधीयते
04030241 तत् ते निरीक्ष्यो न पितापि देह-कृद् ।दक्षो मम द्विट् तद्-अनुव्रताश्च ये
04030242 यो विश्वसृग्-यज्ञ-गतं वरोरु माम् ।अनागसं दुर्वचसाकरोत् तिरः
04030251 यदि व्रजिष्यस्यतिहाय मद्-वचो ।भद्रं भवत्या न ततो भविष्यति
04030252 सम्भावितस्य स्व-जनात् पराभवो ।यदा स सद्यो मरणाय कल्पते

Chapter 4

0404001 मैत्रेय उवाच
04040011 एतावद् उक्त्वा विरराम शङ्करः । पत्न्य्-अङ्ग-नाशं ह्युभयत्र चिन्तयन्
04040012 सुहृद्-दिदृक्षुः परिशङ्किता भवान् । निष्क्रामती निर्विशती द्विधास सा
04040021 सुहृद्-दिदृक्षा-प्रतिघात-दुर्मनाः । स्नेहाद् रुदत्यश्रु-कलातिविह्वला
04040022 भवं भवान्यप्रतिपूरुषं रुषा । प्रधक्ष्यतीवैक्षत जात-वेपथुः
04040031 ततो विनिःश्वस्य सती विहाय तं । शोकेन रोषेण च दूयता हृदा
04040032 पित्रोरगात् स्त्रैण-विमूढ-धीर्गृहान् । प्रेम्णात्मनो योऽर्धम् अदात् सतां प्रियः
04040041 ताम् अन्वगच्छन् द्रुत-विक्रमां सतीम् । एकां त्रि-नेत्रानुचराः सहस्रशः
04040042 स-पार्षद-यक्षा मणिमन्-मदादयः । पुरो-वृषेन्द्रास्तरसा गत-व्यथाः
04040051 तां सारिका-कन्दुक-दर्पणाम्बुज- । श्वेतातपत्र-व्यजन-स्रग्-आदिभिः
04040052 गीतायनैर्दुन्दुभि-शङ्ख-वेणुभिर् । वृषेन्द्रम् आरोप्य विटङ्किता ययुः
04040061 आब्रह्म-घोषोर्जित-यज्ञ-वैशसं । विप्रर्षि-जुष्टं विबुधैश्च सर्वशः
04040062 मृद्-दार्व्-अयः-काञ्चन-दर्भ-चर्मभिर् । निसृष्ट-भाण्डं यजनं समाविशत्
04040071 ताम् आगतां तत्र न कश्चनाद्रियद् । विमानितां यज्ञ-कृतो भयाज् जनः
04040072 ऋते स्वसॄर्वै जननीं च सादराः । प्रेमाश्रु-कण्ठ्यः परिषस्वजुर्मुदा
04040081 सौदर्य-सम्प्रश्न-समर्थ-वार्तया । मात्रा च मातृ-ष्वसृभिश्च सादरम्
04040082 दत्तां सपर्यां वरम् आसनं च सा । नादत्त पित्राप्रतिनन्दिता सती
04040091 अरुद्र-भागं तम् अवेक्ष्य चाध्वरं । पित्रा च देवे कृत-हेलनं विभौ
04040092 अनादृता यज्ञ-सदस्यधीश्वरी । चुकोप लोकान् इव धक्ष्यती रुषा
04040101 जगर्ह सामर्ष-विपन्नया गिरा । शिव-द्विषं धूम-पथ-श्रम-स्मयम्
04040102 स्व-तेजसा भूत-गणान् समुत्थितान् । निगृह्य देवी जगतोऽभिशृण्वतः
0404011 देव्युवाच
04040111 न यस्य लोकेऽस्त्यतिशायनः प्रियस् । तथाप्रियो देह-भृतां प्रियात्मनः
04040112 तस्मिन् समस्तात्मनि मुक्त-वैरके । ऋते भवन्तं कतमः प्रतीपयेत्
04040121 दोषान् परेषां हि गुणेषु साधवो । गृह्णन्ति केचिन् न भवादृशो द्विज
04040122 गुणांश्च फल्गून् बहुली-करिष्णवो । महत्तमास्तेष्वविदद् भवान् अघम्
04040131 नाश्चर्यम् एतद् यद् असत्सु सर्वदा । महद्-विनिन्दा कुणपात्म-वादिषु

04040132 सेर्ष्यं महापूरुष-पाद-पांसुभिर् ।निरस्त-तेजःसु तद् एव शोभनम्
04040141 यद् द्व्य्-अक्षरं नाम गिरेरितं नृणां ।सकृत् प्रसङ्गाद् अघम् आशु हन्ति तत्
04040142 पवित्र-कीर्तिं तम् अलङ्घ्य-शासनं ।भवान् अहो द्वेष्टि शिवं शिवेतरः
04040151 यत्-पाद-पद्मं महतां मनो-'लिभिर् ।निषेवितं ब्रह्म-रसासवार्थिभिः
04040152 लोकस्य यद् वर्षति चाशिषोऽर्थिनस् ।तस्मै भवान् द्रुह्यति विश्व-बन्धवे
04040161 किं वा शिवाख्यम् अशिवं न विदुस्त्वद् अन्ये ।ब्रह्मादयस्तम् अवकीर्य जटाः श्मशाने
04040162 तन्-माल्य-भस्म-नृकपाल्यवसत् पिशाचैर् । ये मूर्धभिर्दधति तच्-चरणावसृष्टम्
04040171 कर्णौ पिधाय निरयाद् यद् अकल्प ईशे ।धर्माविर्तर्यसृणिभिर्नृभिरस्यमाने
04040172 छिन्द्यात् प्रसह्य रुशतीम् असतीं प्रभुश्चेज् । जिह्वाम् असून् अपि ततो विसृजेत् स धर्मः
04040181 अतस्तवोत्पन्नम् इदं कलेवरं ।न धारयिष्ये शिति-कण्ठ-गर्हिणः
04040182 जग्धस्य मोहाद् धि विशुद्धिम् अन्धसो ।जुगुप्सितस्योद्धरणं प्रचक्षते
04040191 न वेद-वादान् अनुवर्तते मतिः ।स्व एव लोके रमतो महा-मुनेः
04040192 यथा गतिर्देव-मनुष्ययोः पृथक् ।स्व एव धर्मे न परं क्षिपेत् स्थितः
04040201 कर्म प्रवृत्तं च निवृत्तम् अप्यृतं ।वेदे विविच्योभय-लिङ्गम् आश्रितम्
04040202 विरोधि तद् यौगपदैक-कर्तरि ।द्वयं तथा ब्रह्मणि कर्म नर्च्छति
04040211 मा वः पदव्यः पितरस्मद्-आस्थिता ।या यज्ञ-शालासु न धूम-वर्त्मभिः
04040212 तद्-अन्न-तृप्तैरसु-भृद्भिरीडिता ।अव्यक्त-लिङ्गा अवधूत-सेविताः
04040221 नैतेन देहेन हरे कृतागसो ।देहोद्भवेनालम् अलं कुजन्मना
04040222 व्रीडा ममाभूत् कुजन-प्रसङ्गतस् ।तज् जन्म धिग् यो महताम् अवद्य-कृत्
04040231 गोत्रं त्वदीयं भगवान् वृषध्वजो ।दाक्षायणीत्याह यदा सुदुर्मनाः
04040232 व्यपेत-नर्म-स्मितम् आशु तदाहं ।व्युत्स्रक्ष्य एतत् कुणपं त्वद्-अङ्गजम्
0404024 मैत्रेय उवाच
04040241 इत्यध्वरे दक्षम् अनूद्य शत्रु-हन् ।क्षिताविदीचीं निषसाद शान्त-वाक्
04040242 स्पृष्ट्वा जलं पीत-दुकूल-संवृता ।निमील्य दृग् योग-पथं समाविशत्
04040251 कृत्वा समानावनिलौ जितासना ।सोदानम् उत्थाप्य च नाभि-चक्रतः
04040252 शनैर्हृदि स्थाप्य धियोरसि स्थितं ।कण्ठाद् भ्रुवोर्मध्यम् अनिन्दितानयत्
04040261 एवं स्व-देहं महतां महीयसा ।मुहुः समारोपितम् अङ्कम् आदरात्
04040262 जिहासती दक्ष-रुषा मनस्विनी ।दधार गात्रेष्वनिलाग्नि-धारणाम्
04040271 ततः स्व-भर्तुश्चरणाम्बुजासवं ।जगद्-गुरोश्चिन्तयती न चापरम्
04040272 ददर्श देहो हत-कल्मषः सती ।सद्यः प्रजज्वाल समाधिजाग्निना
04040281 तत् पश्यतां खे भुवि चाद्भुतं महद् ।हा हेति वादः सुमहान् अजायत
04040282 हन्त प्रिया दैवतमस्य देवी ।जहावसून् केन सती प्रकोपिता
04040291 अहो अनात्म्यं महद् अस्य पश्यत ।प्रजापतेर्यस्य चराचरं प्रजाः
04040292 जहावसून् यद्-विमतात्मजा सती ।मनस्विनी मानम् अभीक्ष्णम् अर्हति
04040301 सोऽयं दुर्मर्ष-हृदयो ब्रह्म-ध्रुक् च ।लोकेऽपकीर्तिं महतीम् अवाप्स्यति
04040302 यद्-अङ्गजां स्वां पुरुष-द्विड् उद्यतां ।न प्रत्यषेधन् मृतयेऽपराधतः

04040311 वदत्येवं जने सत्या दृष्ट्वासु-त्यागम् अद्भुतम्
04040312 दक्षं तत्-पार्षदा हन्तुम् उदतिष्ठन्न् उदायुधाः
04040321 तेषाम् आपततां वेगं निशाम्य भगवान् भृगुः
04040322 यज्ञ-घ्न-घ्नेन यजुषा दक्षिणाग्नौ जुहाव ह
04040331 अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा
04040332 ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः
04040341 तैरलातायुधैः सर्वे प्रमथाः सह-गुह्यकाः
04040342 हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्म-तेजसा

Chapter 5

0405001 मैत्रेय उवाच
04050011 भवो भवान्या निधनं प्रजापतेर् ।असत्-कृताया अवगम्य नारदात्
04050012 स्व-पार्षद-सैन्यं च तद्-अध्वरर्भुभिर् ।विद्रावितं क्रोधम् अपारम् आदधे
04050021 क्रुद्धः सुदष्टौष्ठ-पुटः स धूर्-जटिर् ।जटां तडिद्-वह्नि-सटोग्र-रोचिषम्
04050022 उत्कृत्य रुद्रः सहसोत्थितो हसन् ।गम्भीर-नादो विससर्ज तां भुवि
04050031 ततोऽतिकायस्तनुवा स्पृशन् दिवं ।सहस्र-बाहुर्घन-रुक् त्रि-सूर्य-दृक्
04050032 कराल-दंष्ट्रो ज्वलद्-अग्नि-मूर्धजः ।कपाल-माली विविधोद्यतायुधः
04050041 तं किं करोमीति गृणन्तम् आह ।बद्धाञ्जलिं भगवान् भूत-नाथः
04050042 दक्षं स-यज्ञं जहि मद्-भटानां ।त्वम् अग्रणी रुद्र भटांशको मे
04050051 आज्ञप्त एवं कुपितेन मन्युना ।स देव-देवं परिचक्रमे विभुम्
04050052 मेने-तदात्मानम् असङ्ग-रंहसा ।महीयसां तात सहः सहिष्णुम्
04050061 अन्वीयमानः स तु रुद्र-पार्षदैर् ।भृशं नदद्भिर्व्यनदत् सुभैरवम्
04050062 उद्यम्य शूलं जगद्-अन्तकान्तकं ।सम्प्राद्रवद् घोषण-भूषणाङ्घ्रिः
04050071 अथर्त्विजो यजमानः सदस्याः ।ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम्
04050072 तमः किम् एतत् कुत एतद् रजोऽभूद् ।इति द्विजा द्विज-पत्न्यश्च दध्युः
04050081 वाता न वान्ति न हि सन्ति दस्यवः ।प्राचीन-बर्हिर्जीवति होग्र-दण्डः
04050082 गावो न काल्यन्त इदं कुतो रजो ।लोकोऽधुना किं प्रलयाय कल्पते
04050091 प्रसूति-मिश्राः स्त्रिय उद्विग्न-चित्ता ।ऊचुर्विपाको वृजिनस्यैव तस्य
04050092 यत् पश्यन्तीनां दुहितॄणां प्रजेशः ।सुतां सतीम् अवदध्यावनागाम्
04050101 यस्त्वन्त-काले व्युप्त-जटा-कलापः । स्व-शूल-सूच्य्-अर्पित-दिग्-गजेन्द्रः
04050102 वितत्य नृत्यत्युदितास्त्र-दोर्-ध्वजान् । उच्चाट्ट-हास-स्तनयित्नु-भिन्न-दिक्
04050111 अमर्षयित्वा तम् असह्य-तेजसं ।मन्यु-प्लुतं दुर्निरीक्ष्यं भ्रु-कुट्या
04050112 कराल-दंष्ट्राभिरुदस्त-भागणं ।स्यात् स्वस्ति किं कोपयतो विधातुः
04050121 बह्वेवम् उद्विग्न-दृशोच्यमाने ।जनेन दक्षस्य मुहुर्महात्मनः
04050122 उत्पेतुरुत्पाततमाः सहस्रशो ।भयावहा दिवि भूमौ च पर्यक्
04050131 तावत् स रुद्रानुचरैर्महा-मखो ।नानायुधैर्वामनकैरुदायुधैः

04050132 पिङ्गैः पिशङ्गैर्मकरोदराननैः । पर्याद्रवद्भिर्विदुरान्वरुध्यत
04050141 केचिद् बभञ्जुः प्राग्-वंशं पत्नी-शालां तथापरे
04050142 सद आग्नीध्र-शालां च तद्-विहारं महानसम्
04050151 रुरुजुर्यज्ञ-पात्राणि तथैकेऽग्नीन् अनाशयन्
04050152 कुण्डेष्वमूत्रयन् केचिद् बिभिदुर्वेदि-मेखलाः
04050161 अबाधन्त मुनीन् अन्ये एके पत्नीरतर्जयन्
04050162 अपरे जगृहुर्देवान् प्रत्यासन्नान् पलायितान्
04050171 भृगुं बबन्ध मणिमान् वीरभद्रः प्रजापतिम्
04050172 चण्डेशः पूषणं देवं भगं नन्दीश्वरोऽग्रहीत्
04050181 सर्व एवर्त्विजो दृष्ट्वा सदस्याः स-दिवौकसः
04050182 तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन्
04050191 जुह्वतः स्रुव-हस्तस्य श्मश्रूणि भगवान् भवः
04050192 भृगोर्लुलुञ्चे सदसि योऽहसच् छ्मश्रु दर्शयन्
04050201 भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि
04050202 उज्जहार सद-स्थोऽक्ष्णा यः शपन्तम् असूसुचत्
04050211 पूष्णो ह्यपातयद् दन्तान् कालिङ्गस्य यथा बलः
04050212 शप्यमाने गरिमणि योऽहसद् दर्शयन् दतः
04050221 आक्रम्योरसि दक्षस्य शित-धारेण हेतिना
04050222 छिन्दन्न् अपि तद् उद्धर्तुं नाशक्नोत् त्र्यम्बकस्तदा
04050231 शस्त्रैरस्त्रान्वितैरेवम् अनिर्भिन्न-त्वचं हरः
04050232 विस्मयं परम् आपन्नो दध्यौ पशुपतिश्चिरम्
04050241 दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे
04050242 यजमान-पशोः कस्य कायात् तेनाहरच् छिरः
04050251 साधु-वादस्तदा तेषां कर्म तत् तस्य पश्यताम्
04050252 भूत-प्रेत-पिशाचानां अन्येषां तद्-विपर्ययः
04050261 जुहावैतच् छिरस्तस्मिन् दक्षिणाग्नावमर्षितः
04050262 तद्-देव-यजनं दग्ध्वा प्रातिष्ठद् गुह्यकालयम्

Chapter 6

0406001 मैत्रेय उवाच
04060011 अथ देव-गणाः सर्वे रुद्रानीकैः पराजिताः
04060012 शूल-पट्टिश-निस्त्रिंश- गदा-परिघ-मुद्गरैः
04060021 सञ्छिन्न-भिन्न-सर्वाङ्गाः सर्त्विक्-सभ्या भयाकुलाः
04060022 स्वयम्भुवे नमस्कृत्य कार्त्स्न्येनैतन् न्यवेदयन्
04060031 उपलभ्य पुरैवैतद् भगवान् अब्ज-सम्भवः
04060032 नारायणश्च विश्वात्मा न कस्याध्वरम् ईयतुः
04060041 तद् आकर्ण्य विभुः प्राह तेजीयसि कृतागसि
04060042 क्षेमाय तत्र सा भूयान् न प्रायेण बुभूषताम्
04060051 अथापि यूयं कृत-किल्बिषा भवं । ये बर्हिषो भाग-भाजं परादुः
04060052 प्रसादयध्वं परिशुद्ध-चेतसा । क्षिप्र-प्रसादं प्रगृहीताङ्घ्रि-पद्मम्
04060061 आशासाना जीवितम् अध्वरस्य । लोकः स-पालः कुपिते न यस्मिन्
04060062 तम् आशु देवं प्रियया विहीनं । क्षमापयध्वं हृदि विद्धं दुरुक्तैः
04060071 नाहं न यज्ञो न च यूयम् अन्ये । ये देह-भाजो मुनयश्च तत्त्वम्
04060072 विदुः प्रमाणं बल-वीर्ययोर्वा । यस्यात्म-तन्त्रस्य क उपायं विधित्सेत्
04060081 स इत्थम् आदिश्य सुरान् अजस्तु तैः । समन्वितः पितृभिः स-प्रजेशैः
04060082 ययौ स्व-धिष्ण्यान् निलयं पुर-द्विषः । कैलासम् अद्रि-प्रवरं प्रियं प्रभोः
04060091 जन्मौषधि-तपो-मन्त्र- योग-सिद्धैर्नरेतरैः
04060092 जुष्टं किन्नर-गन्धर्वैरप्सरोभिर्वृतं सदा
04060101 नाना-मणिमयैः शृङ्गैर्नाना-धातु-विचित्रितैः
04060102 नाना-द्रुम-लता-गुल्मैर्नाना-मृग-गणावृतैः
04060111 नानामल-प्रस्रवणैर्नाना-कन्दर-सानुभिः
04060112 रमणं विहरन्तीनां रमणैः सिद्ध-योषिताम्
04060121 मयूर-केकाभिरुतं मदान्धालि-विमूर्च्छितम्
04060122 प्लावितै रक्त-कण्ठानां कूजितैश्च पतत्त्रिणाम्
04060131 आह्वयन्तम् इवोद्धस्तैर्द्विजान् काम-दुघैर्द्रुमैः
04060132 व्रजन्तम् इव मातङ्गैर्गृणन्तम् इव निर्झरैः
04060141 मन्दारैः पारिजातैश्च सरलैश्चोपशोभितम्

04060142 तमालैः शाल-तालैश्च कोविदारासनार्जुनैः
04060151 चूतैः कदम्बैर्नीपैश्च नाग-पुन्नाग-चम्पकैः
04060152 पाटलाशोक-बकुलैः कुन्दैः कुरबकैरपि
04060161 स्वर्णार्ण-शत-पत्रैश्च वर-रेणुक-जातिभिः
04060162 कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मण्डितम्
04060171 पनसोदुम्बराश्वत्थ- प्लक्ष-न्यग्रोध-हिङ्गुभिः
04060172 भूर्जैरोषधिभिः पूगै राजपूगैश्च जम्बुभिः
04060181 खर्जूराम्रातकाम्राद्यैः प्रियाल-मधुकेङ्गुदैः
04060182 द्रुम-जातिभिरन्यैश्च राजितं वेणु-कीचकैः
04060191 कुमुदोत्पल-कह्लार- शतपत्र-वनर्द्धिभिः
04060192 नलिनीषु कलं कूजत्- खग-वृन्दोपशोभितम्
04060201 मृगैः शाखामृगैः क्रोडैर्मृगेन्द्रैरृक्ष-शल्यकैः
04060202 गवयैः शरभैर्व्याघ्रै रुरुभिर्महिषादिभिः
04060211 कर्णान्त्रैकपदाश्वास्यैर्निर्जुष्टं वृक-नाभिभिः
04060212 कदली-खण्ड-संरुद्ध- नलिनी-पुलिन-श्रियम्
04060221 पर्यस्तं नन्दया सत्याः स्नान-पुण्यतरोदया
04060222 विलोक्य भूतेश-गिरिं विबुधा विस्मयं ययुः
04060231 ददृशुस्तत्र ते रम्याम् अलकां नाम वै पुरीम्
04060232 वनं सौगन्धिकं चापि यत्र तन्-नाम पङ्कजम्
04060241 नन्दा चालकनन्दा च सरितौ बाह्यतः पुरः
04060242 तीर्थपाद-पदाम्भोज- रजसातीव पावने
04060251 ययोः सुर-स्त्रियः क्षत्तरवरुह्य स्व-धिष्ण्यतः
04060252 क्रीडन्ति पुंसः सिञ्चन्त्यो विगाह्य रति-कर्शिताः
04060261 ययोस्तत्-स्नान-विभ्रष्ट- नव-कुङ्कुम-पिञ्जरम्
04060262 वितृषोऽपि पिबन्त्यम्भः पाययन्तो गजा गजीः
04060271 तार-हेम-महारत्न- विमान-शत-सङ्कुलाम्
04060272 जुष्टां पुण्यजन-स्त्रीभिर्यथा खं सतडिद्-घनम्
04060281 हित्वा यक्षेश्वर-पुरीं वनं सौगन्धिकं च तत्
04060282 द्रुमैः काम-दुघैर्हृद्यं चित्र-माल्य-फल-च्छदैः
04060291 रक्त-कण्ठ-खगानीक- स्वर-मण्डित-षट्पदम्
04060292 कलहंस-कुल-प्रेष्ठं खरदण्ड-जलाशयम्
04060301 वन-कुञ्जर-सङ्घृष्ट- हरिचन्दन-वायुना
04060302 अधि पुण्यजन-स्त्रीणां मुहुरुन्मथयन् मनः
04060311 वैदूर्य-कृत-सोपाना वाप्य उत्पल-मालिनीः
04060312 प्राप्तं किम्पुरुषैर्दृष्ट्वा त आराद् ददृशुर्वटम्
04060321 स योजन-शतोत्सेधः पादोन-विटपायतः
04060322 पर्यक्-कृताचल-च्छायो निर्नीडस्ताप-वर्जितः
04060331 तस्मिन् महा-योगमये मुमुक्षु-शरणे सुराः
04060332 ददृशुः शिवम् आसीनं त्यक्तामर्षम् इवान्तकम्

04060341 सनन्दनाद्यैर्महा-सिद्धैः शान्तैः संशान्त-विग्रहम्
04060342 उपास्यमानं सख्या च भर्त्रा गुह्यक-रक्षसाम्
04060351 विद्या-तपो-योग-पथम् आस्थितं तम् अधीश्वरम्
04060352 चरन्तं विश्व-सुहृदं वात्सल्याल् लोक-मङ्गलम्
04060361 लिङ्गं च तापसाभीष्टं भस्म-दण्ड-जटाजिनम्
04060362 अङ्गेन सन्ध्याभ्र-रुचा चन्द्र-लेखां च बिभ्रतम्
04060371 उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनम्
04060372 नारदाय प्रवोचन्तं पृच्छते शृण्वतां सताम्
04060381 कृत्वोरौ दक्षिणे सव्यं पाद-पद्मं च जानुनि
04060382 बाहुं प्रकोष्ठेऽक्ष-मालाम् आसीनं तर्क-मुद्रया
04060391 तं ब्रह्म-निर्वाण-समाधिम् आश्रितं । व्युपाश्रितं गिरिशं योग-कक्षाम्
04060392 स-लोक-पाला मुनयो मनूनाम् । आद्यं मनुं प्राञ्जलयः प्रणेमुः
04060401 स तूपलभ्यागतम् आत्म-योनिं । सुरासुरेशैरभिवन्दिताङ्घ्रिः
04060402 उत्थाय चक्रे शिरसाभिवन्दनम् । अर्हत्तमः कस्य यथैव विष्णुः
04060411 तथापरे सिद्ध-गणा महर्षिभिर् । ये वै समन्ताद् अनु नीललोहितम्
04060412 नमस्कृतः प्राह शशाङ्क-शेखरं । कृत-प्रणामं प्रहसन्न् इवात्मभूः
0406042 ब्रह्मोवाच
04060421 आने त्वाम् ईशं विश्वस्य जगतो योनि-बीजयोः
04060422 शक्तेः शिवस्य च परं यत् तद् ब्रह्मा निरन्तरम्
04060431 त्वम् एव भगवन्न् एतच् छिव-शक्त्योः स्वरूपयोः
04060432 विश्वं सृजसि पास्यत्सि क्रीडन्न् ऊर्ण-पटो यथा
04060441 त्वम् एव धर्मार्थ-दुघाभिपत्तये । दक्षेण सूत्रेण ससर्जिथाध्वरम्
04060442 त्वयैव लोकेऽवसिताश्च सेतवो । यान् ब्राह्मणाः श्रद्दधते धृत-व्रताः
04060451 त्वं कर्मणां मङ्गल मङ्गलानां । कर्तुः स्व-लोकं तनुषे स्वः परं वा
04060452 अमङ्गलानां च तमिस्रम् उल्बणं । विपर्ययः केन तद् एव कस्यचित्
04060461 न वै सतां त्वच्-चरणार्पितात्मनां । भूतेषु सर्वेष्वभिपश्यतां तव
04060462 भूतानि चात्मन्यपृथग्-दिदृक्षतां । प्रायेण रोषोऽभिभवेद् यथा पशुम्
04060471 पृथग्-धियः कर्म-दृशो दुराशयाः । परोदयेनार्पित-हृद्-रुजोऽनिशम्
04060472 परान् दुरुक्तैर्वितुदन्त्यरुन्तुदास् । तान् मावधीद् दैव-वधान् भवद्-विधः
04060481 यस्मिन् यदा पुष्कर-नाभ-मायया । दुरन्तया स्पृष्ट-धियः पृथग्-दृशः
04060482 कुर्वन्ति तत्र ह्यनुकम्पया कृपां । न साधवो दैव-बलात् कृते क्रमम्
04060491 भवांस्तु पुंसः परमस्य मायया । दुरन्तयास्पृष्ट-मतिः समस्त-दृक्
04060492 तया हतात्मस्वनुकर्म-चेतःस्व् । अनुग्रहं कर्तुम् इहार्हसि प्रभो
04060501 कुर्वध्वरस्योद्धरणं हतस्य भोः । त्वयासमाप्तस्य मनो प्रजापतेः
04060502 न यत्र भागं तव भागिनो ददुः । कुयाजिनो येन मखो निनीयते
04060511 जीवताद् यजमानोऽयं प्रपद्येताक्षिणी भगः
04060512 भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत्
04060521 देवानां भग्न-गात्राणाम् ऋत्विजां चायुधाश्मभिः
04060522 भवतानुगृहीतानाम् आशु मन्योऽस्त्वनातुरम्
04060531 एष ते रुद्र भागोऽस्तु यद्-उच्छिष्टोऽध्वरस्य वै

04060532 यज्ञस्ते रुद्र भागेन कल्पताम् अद्य यज्ञ-हन्

Chapter 7

0407001 मैत्रेय उवाच
04070011 इत्यजेनानुनीतेन भवेन परितुष्यता
04070012 अभ्यधायि महा-बाहो प्रहस्य श्रूयताम् इति
0407002 महादेव उवाच
04070021 नाघं प्रजेश बालानां वर्णये नानुचिन्तये
04070022 देव-मायाभिभूतानां दण्डस्तत्र धृतो मया
04070031 प्रजापतेर्दग्ध-शीर्ष्णो भवत्वज-मुखं शिरः
04070032 मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः
04070041 पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्ट-भुक्
04070042 देवाः प्रकृत-सर्वाङ्गा ये म उच्छेषणं ददुः
04070051 बाहुभ्याम् अश्विनोः पूष्णो हस्ताभ्यां कृत-बाहवः
04070052 भवन्त्वध्वर्यवश्चान्ये बस्त-श्मश्रुर्भृगुर्भवेत्
0407006 मैत्रेय उवाच
04070061 तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम्
04070062 परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्
04070071 ततो मीढ्वांसम् आमन्त्र्य शुनासीराः सहर्षिभिः
04070072 भूयस्तद् देव-यजनं स-मीढ्वद्-वेधसो ययुः
04070081 विधाय कार्त्स्न्येन च तद् यद् आह भगवान् भवः
04070082 सन्दधुः कस्य कायेन सवनीय-पशोः शिरः
04070091 सन्धीयमाने शिरसि दक्षो रुद्राभिवीक्षितः
04070092 सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम्
04070101 तदा वृषध्वज-द्वेष- कलिलात्मा प्रजापतिः
04070102 शिवावलोकाद् अभवच् छरद्-ध्रद इवामलः
04070111 भव-स्तवाय कृत-धीर्नाशक्नोद् अनुरागतः
04070112 औत्कण्ठ्याद् बाष्प-कलया सम्परेतां सुतां स्मरन्
04070121 कृच्छ्रात् संस्तभ्य च मनः प्रेम-विह्वलितः सुधीः
04070122 शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः
0407013 दक्ष उवाच

04070131 भूयान् अनुग्रह अहो भवता कृतो मे
04070132 दण्डस्त्वया मयि भृतो यद् अपि प्रलब्धः
04070133 न ब्रह्म-बन्धुषु च वां भगवन्न् अवज्ञा
04070134 तुभ्यं हरेश्च कुत एव धृत-व्रतेषु
04070141 विद्या-तपो-व्रत-धरान् मुखतः स्म विप्रान्
04070142 ब्रह्मात्म-तत्त्वम् अवितुं प्रथमं त्वम् अस्राक्
04070143 तद् ब्राह्मणान् परम सर्व-विपत्सु पासि
04070144 पालः पशून् इव विभो प्रगृहीत-दण्डः
04070151 योऽसौ मयाविदित-तत्त्व-दृशा सभायां
04070152 क्षिप्तो दुरुक्ति-विशिखैर्विगणय्य तन् माम्
04070153 अर्वाक् पतन्तम् अर्हत्तम-निन्दयापाद्
04070154 दृष्ट्यार्द्रया स भगवान् स्व-कृतेन तुष्येत्
0407016 मैत्रेय उवाच
04070161 क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमन्त्रितः
04070162 कर्म सन्तानयाम् आस सोपाध्यायर्त्विग्-आदिभिः
04070171 वैष्णवं यज्ञ-सन्तत्यै त्रि-कपालं द्विजोत्तमाः
04070172 पुरोडाशं निरवपन् वीर-संसर्ग-शुद्धये
04070181 अध्वर्युणात्त-हविषा यजमानो विशाम्पते
04070182 धिया विशुद्धया दध्यौ तथा प्रादुरभूद् धरिः
04070191 तदा स्व-प्रभया तेषां द्योतयन्त्या दिशो दश
04070192 मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्र-वाजिना
04070201 श्यामो हिरण्य-रशनोऽर्क-किरीट-जुष्टो
04070202 नीलालक-भ्रमर-मण्डित-कुण्डलास्यः
04070203 शङ्खाब्ज-चक्र-शर-चाप-गदासि-चर्म-
04070204 व्यग्रैर्हिरण्मय-भुजैरिव कर्णिकारः
04070211 वक्षस्यधिश्रित-वधूर्वन-माल्युदार-
04070212 हासावलोक-कलया रमयंश्च विश्वम्
04070213 पार्श्व-भ्रमद्-व्यजन-चामर-राज-हंसः
04070214 श्वेतातपत्र-शशिनोपरि रज्यमानः
04070221 तम् उपागतम् आलक्ष्य सर्वे सुर-गणादयः
04070222 प्रणेमुः सहसोत्थाय ब्रह्मेन्द्र-त्र्यक्ष-नायकाः
04070231 तत्-तेजसा हत-रुचः सन्न-जिह्वाः स-साध्वसाः
04070232 मूर्ध्ना धृताञ्जलि-पुटा उपतस्थुरधोक्षजम्
04070241 अप्यर्वाग्-वृत्तयो यस्य महि त्वात्मभुव्-आदयः
04070242 यथा-मति गृणन्ति स्म कृतानुग्रह-विग्रहम्
04070251 दक्षो गृहीतार्हण-सादनोत्तमं
04070252 यज्ञेश्वरं विश्व-सृजां परं गुरुम्
04070253 सुनन्द-नन्दाद्य्-अनुगैर्वृतं मुदा
04070254 गृणन् प्रपेदे प्रयतः कृताञ्जलिः
0407026 दक्ष उवाच

04070261 शुद्धं स्व-धाम्न्युपरताखिल-बुद्ध्य्-अवस्थं
04070262 चिन्-मात्रम् एकम् अभयं प्रतिषिध्य मायाम्
04070263 तिष्ठंस्तयैव पुरुषत्वम् उपेत्य तस्याम्
04070264 आस्ते भवान् अपरिशुद्ध इवात्म-तन्त्रः
0407027 ऋत्विज ऊचुः
04070271 तत्त्वं न ते वयम् अनञ्जन रुद्र-शापात्
04070272 कर्मण्यवग्रह-धियो भगवन् विदामः
04070273 धर्मोपलक्षणम् इदं त्रिवृद् अध्वराख्यं
04070274 ज्ञातं यद्-अर्थम् अधिदैवम् अदो व्यवस्थाः
0407028 सदस्या ऊचुः
04070281 उत्पत्त्य्-अध्वन्यशरण उरु-क्लेश-दुर्गेऽन्तकोग्र-
04070282 व्यालान्विष्टे विषय-मृग-तृष्यात्म-गेहोरु-भारः
04070283 द्वन्द्व-श्वभ्रे खल-मृग-भये शोक-दावे ऽज्ञ-सार्थः
04070284 पादौकस्ते शरणद कदा याति कामोपसृष्टः
0407029 रुद्र उवाच
04070291 तव वरद वराङ्घ्रावाशिषेहाखिलार्थे
04070292 ह्यपि मुनिभिरसक्तैरादरेणार्हणीये
04070293 यदि रचित-धियं माविद्य-लोकोऽपविद्धं
04070294 जपति न गणये तत् त्वत्-परानुग्रहेण
0407030 भृगुरुवाच
04070301 यन् मायया गहनयापहृतात्म-बोधा
04070302 ब्रह्मादयस्तनु-भृतस्तमसि स्वपन्तः
04070303 नात्मन्-श्रितं तव विदन्त्यधुनापि तत्त्वं
04070304 सोऽयं प्रसीदतु भवान् प्रणतात्म-बन्धुः
0407031 ब्रह्मोवाच
04070311 नैतत् स्वरूपं भवतोऽसौ पदार्थ- ।भेद-ग्रहैः पुरुषो यावद् ईक्षेत्
04070312 ज्ञानस्य चार्थस्य गुणस्य चाश्रयो ।मायामयाद् व्यतिरिक्तो मतस्त्वम्
0407032 इन्द्र उवाच
04070321 इदम् अप्यच्युत विश्व-भावनं ।वपुरानन्द-करं मनो-दृशाम्
04070322 सुर-विद्विट्-क्षपणैरुदायुधैर् ।भुज-दण्डैरुपपन्नम् अष्टभिः
0407033 पत्न्य ऊचुः
04070331 यज्ञोऽयं तव यजनाय केन सृष्टो ।विध्वस्तः पशुपतिनाद्य दक्ष-कोपात्
04070332 तं नस्त्वं शव-शयनाभ-शान्त-मेधं ।यज्ञात्मन् नलिन-रुचा दृशा पुनीहि
0407034 ऋषय ऊचुः
04070341 अनन्वितं ते भगवन् विचेष्टितं ।यद् आत्मना चरसि हि कर्म नाज्यसे
04070342 विभूतये यत उपसेदुरीश्वरीं ।न मन्यते स्वयम् अनुवर्ततीं भवान्
0407035 सिद्धा ऊचुः
04070351 अयं त्वत्-कथा-मृष्ट-पीयूष-नद्यां ।मनो-वारणः क्लेश-दावाग्नि-दग्धः
04070352 तृषार्तोऽवगाढो न सस्मार दावं ।न निष्क्रामति ब्रह्म-सम्पन्नवन् नः
0407036 यजमान्युवाच

04070361 स्वागतं ते प्रसीदेश तुभ्यं नमः ।श्रीनिवास श्रिया कान्तया त्राहि नः
04070362 त्वाम् ऋतेऽधीश नाङ्गैर्मखः शोभते ।शीर्ष-हीनः क-बन्धो यथा पुरुषः
0407037 लोकपाला ऊचुः
04070371 दृष्टः किं नो दृग्भिरसद्-ग्रहैस्त्वं ।प्रत्यग्-द्रष्टा दृश्यते येन विश्वम्
04070372 माया ह्येषा भवदीया हि भूमन् ।यस्त्वं षष्ठः पञ्चभिर्भासि भूतैः
0407038 योगेश्वरा ऊचुः
04070381 प्रेयान् न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो । विश्वात्मनीक्षेन् न पृथग् य आत्मनः
04070382 अथापि भक्त्येश तयोपधावताम् ।अनन्य-वृत्त्यानुगृहाण वत्सल
04070391 जगद्-उद्भव-स्थिति-लयेषु दैवतो बहु-भिद्यमान-गुणयात्म-मायया
04070392 रचितात्म-भेद-मतये स्व-संस्थया विनिवर्तित-भ्रम-गुणात्मने नमः
0407040 ब्रह्मोवाच
04070401 नमस्ते श्रित-सत्त्वाय धर्मादीनां च सूतये
04070402 निर्गुणाय च यत्-काष्ठां नाहं वेदापरेऽपि च
0407041 अग्निरुवाच
04070411 यत्-तेजसाहं सुसमिद्ध-तेजा ।हव्यं वहे स्वध्वर आज्य-सिक्तम्
04070412 तं यज्ञियं पञ्च-विधं च पञ्चभिः ।स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम्
0407042 देवा ऊचुः
04070421 पुरा कल्पापाये स्व-कृतम् उदरी-कृत्य विकृतं
04070422 त्वम् एवाद्यस्तस्मिन् सलिल उरगेन्द्राधिशयने
04070423 पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्म-पदविः
04070424 स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यान् अवसि नः
0407043 गन्धर्वा ऊचुः
04070431 अंशांशास्ते देव मरीच्य्-आदय एते ।ब्रह्मेन्द्राद्या देव-गणा रुद्र-पुरोगाः
04070432 क्रीडा-भाण्डं विश्वम् इदं यस्य विभूमन् ।तस्मै नित्यं नाथ नमस्ते करवाम
0407044 विद्याधरा ऊचुः
04070441 त्वन्-माययार्थम् अभिपद्य कलेवरेऽस्मिन्
04070442 कृत्वा ममाहम् इति दुर्मतिरुत्पथैः स्वैः
04070443 क्षिप्तोऽप्यसद्-विषय-लालस आत्म-मोहं
04070444 युष्मत्-कथामृत-निषेवक उद्व्युदस्येत्
0407045 ब्राह्मणा ऊचुः
04070451 त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं ।त्वं हि मन्त्रः समिद्-दर्भ-पात्राणि च
04070452 त्वं सदस्यर्त्विजो दम्पती देवता ।अग्निहोत्रं स्वधा सोम आज्यं पशुः
04070461 त्वं पुरा गां रसाया महा-सूकरो ।दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा
04070462 स्तूयमानो नदल् लीलया योगिभिर् ।व्युज्जहर्थ त्रयी-गात्र यज्ञ-क्रतुः
04070471 स प्रसीद त्वम् अस्माकम् आकाङ्क्षतां ।दर्शनं ते परिभ्रष्ट-सत्-कर्मणाम्
04070472 कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते ।यज्ञ-विघ्नाः क्षयं यान्ति तस्मै नमः
0407048 मैत्रेय उवाच
04070481 इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितम्

04070482 कीर्त्यमाने हृषीकेशे सन्निन्ये यज्ञ-भावने
04070491 भगवान् स्वेन भागेन सर्वात्मा सर्व-भाग-भुक्
04070492 दक्षं बभाष आभाष्य प्रीयमाण इवानघ
0407050 श्री-भगवान् उवाच
04070501 अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्
04070502 आत्मेश्वर उपद्रष्टा स्वयन्-दृग् अविशेषणः
04070511 आत्म-मायां समाविश्य सोऽहं गुणमयीं द्विज
04070512 सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम्
04070521 तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि
04070522 ब्रह्म-रुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति
04070531 यथा पुमान् न स्वाङ्गेषु शिरः-पाण्य्-आदिषु क्वचित्
04070532 पारक्य-बुद्धिं कुरुते एवं भूतेषु मत्-परः
04070541 त्रयाणाम् एक-भावानां यो न पश्यति वै भिदाम्
04070542 सर्व-भूतात्मनां ब्रह्मन् स शान्तिम् अधिगच्छति
0407055 मैत्रेय उवाच
04070551 एवं भगवतादिष्टः प्रजापति-पतिर्हरिम्
04070552 अर्चित्वा क्रतुना स्वेन देवान् उभयतोऽयजत्
04070561 रुद्रं च स्वेन भागेन ह्युपाधावत् समाहितः
04070562 कर्मणोदवसानेन सोमपान् इतरान् अपि
04070563 उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः
04070571 तस्मा अप्यनुभावेन स्वेनैवावाप्त-राधसे
04070572 धर्म एव मतिं दत्त्वा त्रिदशास्ते दिवं ययुः
04070581 एवं दाक्षायणी हित्वा सती पूर्व-कलेवरम्
04070582 जज्ञे हिमवतः क्षेत्रे मेनायाम् इति शुश्रुम
04070591 तम् एव दयितं भूय आवृङ्क्ते पतिम् अम्बिका
04070592 अनन्य-भावैक-गतिं शक्तिः सुप्तेव पूरुषम्
04070601 एतद् भगवतः शम्भोः कर्म दक्षाध्वर-द्रुहः
04070602 श्रुतं भागवताच् छिष्याद् उद्धवान् मे बृहस्पतेः
04070611 इदं पवित्रं परम् ईश-चेष्टितं ।यशस्यम् आयुष्यम् अघौघ-मर्षणम्
04070612 यो नित्यदाकर्ण्य नरोऽनुकीर्तयेद् ।धुनोत्यघं कौरव भक्ति-भावतः

Chapter 8

0408001 मैत्रेय उवाच
04080011 सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः
04080012 नैते गृहान् ब्रह्म-सुता ह्यावसन्न् ऊर्ध्व-रेतसः
04080021 मृषाधर्मस्य भार्यासीद् दम्भं मायां च शत्रु-हन्
04080022 असूत मिथुनं तत् तु निर्ऋतिर्जगृहेऽप्रजः
04080031 तयोः समभवल् लोभो निकृतिश्च महा-मते
04080032 ताभ्यां क्रोधश्च हिंसा च यद् दुरुक्तिः स्वसा कलिः
04080041 दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम
04080042 तयोश्च मिथुनं जज्ञे यातना निरयस्तथा
04080051 सङ्ग्रहेण मयाख्यातः प्रतिसर्गस्तवानघ
04080052 त्रिः श्रुत्वैतत् पुमान् पुण्यं विधुनोत्यात्मनो मलम्
04080061 अथातः कीर्तये वंशं पुण्य-कीर्तेः कुरूद्वह
04080062 स्वायम्भुवस्यापि मनोर्हरेरंशांश-जन्मनः
04080071 प्रियव्रतोत्तानपादौ शतरूपा-पतेः सुतौ
04080072 वासुदेवस्य कलया रक्षायां जगतः स्थितौ
04080081 जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः
04080082 सुरुचिः प्रेयसी पत्युर्नेतरा यत्-सुतो ध्रुवः
04080091 एकदा सुरुचेः पुत्रम् अङ्कम् आरोप्य लालयन्
04080092 उत्तमं नारुरुक्षन्तं ध्रुवं राजाभ्यनन्दत
04080101 तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम्
04080102 सुरुचिः शृण्वतो राज्ञः सेर्ष्यम् आहातिगर्विता
04080111 न वत्स नृपतेर्धिष्ण्यं भवान् आरोढुम् अर्हति
04080112 न गृहीतो मया यत् त्वं कुक्षावपि नृपात्मजः
04080121 बालोऽसि बत नात्मानम् अन्य-स्त्री-गर्भ-सम्भृतम्
04080122 नूनं वेद भवान् यस्य दुर्लभेऽर्थे मनोरथः
04080131 तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे
04080132 गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम्
0408014 मैत्रेय उवाच

04080141 मातुः सपत्न्याः स दुरुक्ति-विद्धः ।श्वसन् रुषा दण्ड-हतो यथाहिः
04080142 हित्वा मिषन्तं पितरं सन्न-वाचं ।जगाम मातुः प्ररुदन् सकाशम्
04080151 तं निःश्वसन्तं स्फुरिताधरोष्ठं ।सुनीतिरुत्सङ्ग उद्‌ह्य बालम्
04080152 निशम्य तत्-पौर-मुखान् नितान्तं ।सा विव्यथे यद् गदितं सपत्न्या
04080161 सोत्सृज्य धैर्यं विललाप शोक- ।दावाग्निना दाव-लतेव बाला
04080162 वाक्यं सपत्न्याः स्मरती सरोज- ।श्रिया दृशा बाष्प-कलाम् उवाह
04080171 दीर्घं श्वसन्ती वृजिनस्य पारम् ।अपश्यती बालकम् आह बाला
04080172 मामङ्गलं तात परेषु मंस्था ।भुङ्क्ते जनो यत् पर-दुःखदस्तत्
04080181 सत्यं सुरुच्याभिहितं भवान् मे ।यद् दुर्भगाया उदरे गृहीतः
04080182 स्तन्येन वृद्धश्च विलज्जते यां ।भार्येति वा वोढुम् इडस्पतिर्माम्
04080191 आतिष्ठ तत् तात विमत्सरस्त्वम् ।उक्तं समात्रापि यद् अव्यलीकम्
04080192 आराधयाधोक्षज-पाद-पद्मं ।यदीच्छसेऽध्यासनम् उत्तमो यथा
04080201 यस्याङ्घ्रि-पद्मं परिचर्य विश्व- ।विभावनायात्त-गुणाभिपत्तेः
04080202 अजोऽध्यतिष्ठत् खलु पारमेष्ठ्यं ।पदं जितात्म-श्वसनाभिवन्द्यम्
04080211 तथा मनुर्वो भगवान् पितामहो ।यम् एक-मत्या पुरु-दक्षिणैर्मखैः
04080212 इष्ट्वाभिपेदे दुरवापम् अन्यतो ।भौमं सुखं दिव्यम् अथापवर्ग्यम्
04080221 तम् एव वत्साश्रय भृत्य-वत्सलं ।मुमुक्षुभिर्मृग्य-पदाब्ज-पद्धतिम्
04080222 अनन्य-भावे निज-धर्म-भाविते ।मनस्यवस्थाप्य भजस्व पूरुषम्
04080231 नान्यं ततः पद्म-पलाश-लोचनाद् ।दुःख-च्छिदं ते मृगयामि कञ्चन
04080232 यो मृग्यते हस्त-गृहीत-पद्मया ।श्रियेतरैरङ्ग विमृग्यमाणया
0408024 मैत्रेय उवाच
04080241 एवं सञ्जल्पितं मातुराकर्ण्यार्थागमं वचः
04080242 सन्नियम्यात्मनात्मानं निश्चक्राम पितुः पुरात्
04080251 नारदस्तद् उपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितम्
04080252 स्पृष्ट्वा मूर्धन्यघ-घ्नेन पाणिना प्राह विस्मितः
04080261 अहो तेजः क्षत्रियाणां मान-भङ्गम् अमृष्यताम्
04080262 बालोऽप्ययं हृदा धत्ते यत् समातुरसद्-वचः
0408027 नारद उवाच
04080271 नाधुनाप्यवमानं ते सम्मानं वापि पुत्रक
04080272 लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु
04080281 विकल्पे विद्यमानेऽपि न ह्यसन्तोष-हेतवः
04080282 पुंसो मोहम् ऋते भिन्ना यल् लोके निज-कर्मभिः
04080291 परितुष्येत् ततस्तात तावन्-मात्रेण पूरुषः
04080292 दैवोपसादितं यावद् वीक्ष्येश्वर-गतिं बुधः
04080301 अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि
04080302 यत्-प्रसादं स वै पुंसां दुराराध्यो मतो मम
04080311 मुनयः पदवीं यस्य निःसङ्गेनोरु-जन्मभिः
04080312 न विदुर्मृगयन्तोऽपि तीव्र-योग-समाधिना
04080321 अतो निवर्ततां एष निर्बन्धस्तव निष्फलः
04080322 यतिष्यति भवान् काले श्रेयसां समुपस्थिते

04080331 यस्य यद् दैव-विहितं स तेन सुख-दुःखयोः
04080332 आत्मानं तोषयन् देही तमसः पारम् ऋच्छति
04080341 गुणाधिकान् मुदं लिप्सेद् अनुक्रोशं गुणाधमात्
04080342 मैत्रीं समानाद् अन्विच्छेन् न तापैरभिभूयते
0408035 ध्रुव उवाच
04080351 सोऽयं शमो भगवता सुख-दुःख-हतात्मनाम्
04080352 दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्-विधैस्तु यः
04080361 अथापि मेऽविनीतस्य क्षात्त्रं घोरम् उपेयुषः
04080362 सुरुच्या दुर्वचो-बाणैर्न भिन्ने श्रयते हृदि
04080371 पदं त्रि-भुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे
04080372 ब्रूह्यस्मत्-पितृभिर्ब्रह्मन्न् अन्यैरप्यनधिष्ठितम्
04080381 नूनं भवान् भगवतो योऽङ्गजः परमेष्ठिनः
04080382 वितुदन्न् अटते वीणां हिताय जगतोऽर्कवत्
0408039 मैत्रेय उवाच
04080391 इत्युदाहृतम् आकर्ण्य भगवान् नारदस्तदा
04080392 प्रीतः प्रत्याह तं बालं सद्-वाक्यम् अनुकम्पया
0408040 नारद उवाच
04080401 जनन्याभिहितः पन्थाः स वै निःश्रेयसस्य ते
04080402 भगवान् वासुदेवस्तं भज तं प्रवणात्मना
04080411 धर्मार्थ-काम-मोक्षाख्यं य इच्छेच् छ्रेय आत्मनः
04080412 एकं ह्येव हरेस्तत्र कारणं पाद-सेवनम्
04080421 तत् तात गच्छ भद्रं ते यमुनायास्तटं शुचि
04080422 पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः
04080431 स्नात्वानुसवनं तस्मिन् कालिन्द्याः सलिले शिवे
04080432 कृत्वोचितानि निवसन्न् आत्मनः कल्पितासनः
04080441 प्राणायामेन त्रि-वृता प्राणेन्द्रिय-मनो-मलम्
04080442 शनैर्व्युदस्याभिध्यायेन् मनसा गुरुणा गुरुम्
04080451 प्रसादाभिमुखं शश्वत् प्रसन्न-वदनेक्षणम्
04080452 सुनासं सुभ्रुवं चारु- कपोलं सुर-सुन्दरम्
04080461 तरुणं रमणीयाङ्गम् अरुणोष्ठेक्षणाधरम्
04080462 प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम्
04080471 श्रीवत्साङ्कं घन-श्यामं पुरुषं वन-मालिनम्
04080472 शङ्ख-चक्र-गदा-पद्मैरभिव्यक्त-चतुर्भुजम्
04080481 किरीटिनं कुण्डलिनं केयूर-वलयान्वितम्
04080482 कौस्तुभाभरण-ग्रीवं पीत-कौशेय-वाससम्
04080491 काञ्ची-कलाप-पर्यस्तं लसत्-काञ्चन-नूपुरम्
04080492 दर्शनीयतमं शान्तं मनो-नयन-वर्धनम्
04080501 पद्भ्यां नख-मणि-श्रेण्या विलसद्भ्यां समर्चताम्
04080502 हृत्-पद्म-कर्णिका-धिष्ण्यम् आक्रम्यात्मन्यवस्थितम्
04080511 स्मयमानम् अभिध्यायेत् सानुरागावलोकनम्

04080512 नियतेनैक-भूतेन मनसा वरदर्षभम्
04080521 एवं भगवतो रूपं सुभद्रं ध्यायतो मनः
04080522 निर्वृत्या परया तूर्णं सम्पन्नं न निवर्तते
04080531 जपश्च परमो गुह्यः श्रूयतां मे नृपात्मज
04080532 यं सप्त-रात्रं प्रपठन् पुमान् पश्यति खेचरान्
0408054 ओं नमो भगवते वासुदेवाय
04080541 मन्त्रेणानेन देवस्य कुर्याद् द्रव्यमयीं बुधः
04080542 सपर्यां विविधैर्द्रव्यैर्देश-काल-विभागवित्
04080551 सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूल-फलादिभिः
04080552 शस्ताङ्कुरांशुकैश्चार्चेत् तुलस्या प्रियया प्रभुम्
04080561 लब्ध्वा द्रव्यमयीम् अर्चां क्षित्य्-अम्ब्व्-आदिषु वार्चयेत्
04080562 आभृतात्मा मुनिः शान्तो यत-वाङ् मित-वन्य-भुक्
04080571 स्वेच्छावतार-चरितैरचिन्त्य-निज-मायया
04080572 करिष्यत्युत्तमश्लोकस्तद् ध्यायेद् धृदयङ्-गमम्
04080581 परिचर्या भगवतो यावत्यः पूर्व-सेविताः
04080582 ता मन्त्र-हृदयेनैव प्रयुञ्ज्यान् मन्त्र-मूर्तये
04080591 एवं कायेन मनसा वचसा च मनो-गतम्
04080592 परिचर्यमाणो भगवान् भक्तिमत्-परिचर्यया
04080601 पुंसाम् अमायिनां सम्यग् भजतां भाव-वर्धनः
04080602 श्रेयो दिशत्यभिमतं यद् धर्मादिषु देहिनाम्
04080611 विरक्तश्चेन्द्रिय-रतौ भक्ति-योगेन भूयसा
04080612 तं निरन्तर-भावेन भजेताद्धा विमुक्तये
04080621 इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः
04080622 ययौ मधुवनं पुण्यं हरेश्चरण-चर्चितम्
04080631 तपो-वनं गते तस्मिन् प्रविष्टोऽन्तः-पुरं मुनिः
04080632 अर्हितार्हणको राज्ञा सुखासीन उवाच तम्
0408064 नारद उवाच
04080641 राजन् किं ध्यायसे दीर्घं मुखेन परिशुष्यता
04080642 किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः
0408065 राजोवाच
04080651 सुतो मे बालको ब्रह्मन् स्त्रैणेनाकरुणात्मना
04080652 निर्वासितः पञ्च-वर्षः सह मात्रा महान् कविः
04080661 अप्यनाथं वने ब्रह्मन् मा स्मादन्त्यर्भकं वृकाः
04080662 श्रान्तं शयानं क्षुधितं परिम्लान-मुखाम्बुजम्
04080671 अहो मे बत दौरात्म्यं स्त्री-जितस्योपधारय
04080672 योऽङ्कं प्रेम्णारुरुक्षन्तं नाभ्यनन्दम् असत्तमः
0408068 नारद उवाच
04080681 मा मा शुचः स्व-तनयं देव-गुप्तं विशाम्पते
04080682 तत्-प्रभावम् अविज्ञाय प्रावृङ्क्ते यद्-यशो जगत्

04080691 सुदुष्करं कर्म कृत्वा लोक-पालैरपि प्रभुः
04080692 ऐष्यत्यचिरतो राजन् यशो विपुलयंस्तव
0408070 मैत्रेय उवाच
04080701 इति देवर्षिणा प्रोक्तं विश्रुत्य जगती-पतिः
04080702 राज-लक्ष्मीम् अनादृत्य पुत्रम् एवान्वचिन्तयत्
04080711 तत्राभिषिक्तः प्रयतस्ताम् उपोष्य विभावरीम्
04080712 समाहितः पर्यचरद् ऋष्य्-आदेशेन पूरुषम्
04080721 त्रि-रात्रान्ते त्रि-रात्रान्ते कपित्थ-बदराशनः
04080722 आत्म-वृत्त्य्-अनुसारेण मासं निन्येऽर्चयन् हरिम्
04080731 द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने
04080732 तृण-पर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयन् विभुम्
04080741 तृतीयं चानयन् मासं नवमे नवमेऽहनि
04080742 अब्-भक्ष उत्तमश्लोकम् उपाधावत् समाधिना
04080751 चतुर्थम् अपि वै मासं द्वादशे द्वादशेऽहनि
04080752 वायु-भक्षो जित-श्वासो ध्यायन् देवम् अधारयत्
04080761 पञ्चमे मास्यनुप्राप्ते जित-श्वासो नृपात्मजः
04080762 ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः
04080771 सर्वतो मन आकृष्य हृदि भूतेन्द्रियाशयम्
04080772 ध्यायन् भगवतो रूपं नाद्राक्षीत् किञ्चनापरम्
04080781 आधारं महद्-आदीनां प्रधान-पुरुषेश्वरम्
04080782 ब्रह्म धारयमाणस्य त्रयो लोकाश्चकम्पिरे
04080791 यदैक-पादेन स पार्थिवार्भकस् । तस्थौ तद्-अङ्गुष्ठ-निपीडिता मही
04080792 ननाम तत्रार्धम् इभेन्द्र-धिष्ठिता । तरीव सव्येतरतः पदे पदे
04080801 तस्मिन्न् अभिध्यायति विश्वम् आत्मनो । द्वारं निरुध्यासुम् अनन्यया धिया
04080802 लोका निरुच्छ्वास-निपीडिता भृशं । स-लोक-पालाः शरणं ययुर्हरिम्
0408081 देवा ऊचुः
04080811 नैवं विदामो भगवन् प्राण-रोधं । चराचरस्याखिल-सत्त्व-धाम्नः
04080812 विधेहि तन् नो वृजिनाद् विमोक्षं । प्राप्ता वयं त्वां शरणं शरण्यम्
0408082 श्री-भगवान् उवाच
04080821 मा भैष्ट बालं तपसो दुरत्ययान् । निवर्तयिष्ये प्रतियात स्व-धाम
04080822 यतो हि वः प्राण-निरोध आसीद् । औत्तानपादिर्मयि सङ्गतात्मा

Chapter 9

0409001 मैत्रेय उवाच
04090011 त एवम् उत्सन्न-भया उरुक्रमे । कृतावनामाः प्रययुस्त्रि-विष्टपम्
04090012 सहस्रशीर्षापि ततो गरुत्मता । मधोर्वनं भृत्य-दिदृक्षया गतः
04090021 स वै धिया योग-विपाक-तीव्रया ।हृत्-पद्म-कोशे स्फुरितं तडित्-प्रभम्
04090022 तिरोहितं सहसैवोपलक्ष्य । बहिः-स्थितं तद्-अवस्थं ददर्श
04090031 तद्-दर्शनेनागत-साध्वसः क्षिताव् । अवन्दताङ्गं विनमय्य दण्डवत्
04090032 दृग्भ्यां प्रपश्यन् प्रपिबन्न् इवार्भकश् । चुम्बन्न् इवास्येन भुजैरिवाश्लिषन्
04090041 स तं विवक्षन्तम् अतद्-विदं हरिर् । ज्ञात्वास्य सर्वस्य च हृद्यवस्थितः
04090042 कृताञ्जलिं ब्रह्ममयेन कम्बुना । पस्पर्श बालं कृपया कपोले
04090051 स वै तदैव प्रतिपादितां गिरं । दैवीं परिज्ञात-परात्म-निर्णयः
04090052 तं भक्ति-भावोऽभ्यगृणाद् असत्वरं । परिश्रुतोरु-श्रवसं ध्रुव-क्षितिः
0409006 ध्रुव उवाच
04090061 योऽन्तः प्रविश्य मम वाचम् इमां प्रसुप्तां
04090062 सञ्जीवयत्यखिल-शक्ति-धरः स्व-धाम्ना
04090063 अन्यांश्च हस्त-चरण-श्रवण-त्वग्-आदीन्
04090064 प्राणान् नमो भगवते पुरुषाय तुभ्यम्
04090071 एकस्त्वम् एव भगवन्न् इदम् आत्म-शक्त्या
04090072 मायाख्ययोरु-गुणया महद्-आद्य्-अशेषम्
04090073 सृष्ट्वानुविश्य पुरुषस्तद्-असद्-गुणेषु
04090074 नानेव दारुषु विभावसुवद् विभासि
04090081 त्वद्-दत्तया वयुनयेदम् अचष्ट विश्वं
04090082 सुप्त-प्रबुद्ध इव नाथ भवत्-प्रपन्नः
04090083 तस्यापवर्ग्य-शरणं तव पाद-मूलं
04090084 विस्मर्यते कृत-विदा कथम् आर्त-बन्धो
04090091 नूनं विमुष्ट-मतयस्तव मायया ते
04090092 ये त्वां भवाप्यय-विमोक्षणम् अन्य-हेतोः
04090093 अर्चन्ति कल्पक-तरुं कुणपोपभोग्यम्
04090094 इच्छन्ति यत् स्पर्शजं निरयेऽपि न्-णाम्

04090101 या निर्वृतिस्तनु-भृतां तव पाद-पद्म-
04090102 ध्यानाद् भवज्-जन-कथा-श्रवणेन वा स्यात्
04090103 सा ब्रह्मणि स्व-महिमन्यपि नाथ मा भूत्
04090104 किं त्वन्तकासि-लुलितात् पततां विमानात्
04090111 भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
04090112 भूयाद् अनन्त महताम् अमलाशयानाम्
04090113 येनाञ्जसोल्बणम् उरु-व्यसनं भवाब्धिं
04090114 नेष्ये भवद्-गुण-कथामृत-पान-मत्तः
04090121 ते न स्मरन्त्यतितरां प्रियम् ईश मर्त्यं
04090122 ये चान्वदः सुत-सुहृद्-गृह-वित्त-दाराः
04090123 ये त्वब्ज-नाभ भवदीय-पदारविन्द-
04090124 सौगन्ध्य-लुब्ध-हृदयेषु कृत-प्रसङ्गाः
04090131 तिर्यङ्-नग-द्विज-सरीसृप-देव-दैत्य-
04090132 मर्त्यादिभिः परिचितं सद्-असद्-विशेषम्
04090133 रूपं स्थविष्ठम् अज ते महद्-आद्य्-अनेकं
04090134 नातः परं परम वेद्मि न यत्र वादः
04090141 कल्पान्त एतद् अखिलं जठरेण गृह्णन्
04090142 शेते पुमान् स्व-दृग् अनन्त-सखस्तद्-अङ्के
04090143 यन्-नाभि-सिन्धु-रुह-काञ्चन-लोक-पद्म-
04090144 गर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै
04090151 त्वं नित्य-मुक्त-परिशुद्ध-विबुद्ध आत्मा
04090152 कूट-स्थ आदि-पुरुषो भगवांस्त्र्य्-अधीशः
04090153 यद्-बुद्ध्य्-अवस्थितिम् अखण्डितया स्व-दृष्ट्या
04090154 द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से
04090161 यस्मिन् विरुद्ध-गतयो ह्यनिशं पतन्ति
04090162 विद्यादयो विविध-शक्तय आनुपूर्व्यात्
04090163 तद् ब्रह्म विश्व-भवम् एकम् अनन्तम् आद्यम्
04090164 आनन्द-मात्रम् अविकारम् अहं प्रपद्ये
04090171 सत्याशिषो हि भगवंस्तव पाद-पद्मम्
04090172 आशीस्तथानुभजतः पुरुषार्थ-मूर्तेः
04090173 अप्येवम् अर्य भगवान् परिपाति दीनान्
04090174 वाश्रेव वत्सकम् अनुग्रह-कातरोऽस्मान्
0409018 मैत्रेय उवाच
04090181 अथाभिष्टुत एवं वै सत्-सङ्कल्पेन धीमता
04090182 भृत्यानुरक्तो भगवान् प्रतिनन्द्येदम् अब्रवीत्
0409019 श्री-भगवान् उवाच
04090191 वेदाहं ते व्यवसितं हृदि राजन्य-बालक
04090192 तत् प्रयच्छामि भद्रं ते दुरापम् अपि सुव्रत
04090201 नान्यैरधिष्ठितं भद्र यद् भ्राजिष्णु ध्रुव-क्षिति
04090202 यत्र ग्रहर्क्ष-ताराणां ज्योतिषां चक्रम् आहितम्

04090211 मेढ्यां गो-चक्रवत् स्थास्नु परस्तात् कल्प-वासिनाम्
04090212 धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः
04090213 चरन्ति दक्षिणी-कृत्य भ्रमन्तो यत् सतारकाः
04090221 प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्म-संश्रयः
04090222 षट्-त्रिंशद्-वर्ष-साहस्रं रक्षिताव्याहतेन्द्रियः
04090231 त्वद्-भ्रातर्युत्तमे नष्टे मृगयायां तु तन्-मनाः
04090232 अन्वेषन्ती वनं माता दावाग्निं सा प्रवेक्ष्यति
04090241 इष्ट्वा मां यज्ञ-हृदयं यज्ञैः पुष्कल-दक्षिणैः
04090242 भुक्त्वा चेहाशिषः सत्या अन्ते मां संस्मरिष्यसि
04090251 ततो गन्तासि मत्-स्थानं सर्व-लोक-नमस्कृतम्
04090252 उपरिष्टाद् ऋषिभ्यस्त्वं यतो नावर्तते गतः
0409026 मैत्रेय उवाच
04090261 इत्यर्चितः स भगवान् अतिदिश्यात्मनः पदम्
04090262 बालस्य पश्यतो धाम स्वम् अगाद् गरुड-ध्वजः
04090271 सोऽपि सङ्कल्पजं विष्णोः पाद-सेवोपसादितम्
04090272 प्राप्य सङ्कल्प-निर्वाणं नातिप्रीतोऽभ्यगात् पुरम्
0409028 विदुर उवाच
04090281 सुदुर्लभं यत् परमं पदं हरेर् ।मायाविनस्तच्-चरणार्चनार्जितम्
04090282 लब्ध्वाप्यसिद्धार्थम् इवैक-जन्मना ।कथं स्वम् आत्मानम् अमन्यतार्थ-वित्
0409029 मैत्रेय उवाच
04090291 मातुः सपत्न्या वाग्-बाणैर्हृदि विद्धस्तु तान् स्मरन्
04090292 नैच्छन् मुक्ति-पतेर्मुक्तिं तस्मात् तापम् उपेयिवान्
0409030 ध्रुव उवाच
04090301 समाधिना नैक-भवेन यत् पदं ।विदुः सनन्दादय ऊर्ध्व-रेतसः
04090302 मासैरहं षड्भिरमुष्य पादयोश् ।छायाम् उपेत्यापगतः पृथङ्-मतिः
04090311 अहो बत ममानात्म्यं मन्द-भाग्यस्य पश्यत
04090312 भव-च्छिदः पाद-मूलं गत्वा याचे यद् अन्तवत्
04090321 मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः
04090322 यो नारद-वचस्तथ्यं नाग्राहिषम् असत्तमः
04090331 दैवीं मायाम् उपाश्रित्य प्रसुप्त इव भिन्न-दृक्
04090332 तप्ये द्वितीयेऽप्यसति भ्रातृ-भ्रातृव्य-हृद्-रुजा
04090341 मयैतत् प्रार्थितं व्यर्थं चिकित्सेव गतायुषि
04090342 प्रसाद्य जगद्-आत्मानं तपसा दुष्प्रसादनम्
04090343 भव-च्छिदम् अयाचेऽहं भवं भाग्य-विवर्जितः
04090351 स्वाराज्यं यच्छतो मौढ्यान् मानो मे भिक्षितो बत
04090352 ईश्वरात् क्षीण-पुण्येन फली-कारान् इवाधनः
0409036 मैत्रेय उवाच
04090361 न वै मुकुन्दस्य पदारविन्दयो ।रजो-जुषस्तात भवादृशा जनाः
04090362 वाञ्छन्ति तद्-दास्यम् ऋतेऽर्थम् आत्मनो । यदृच्छया लब्ध-मनः-

समृद्धयः
04090371 आकर्ण्यात्म-जम् आयान्तं सम्परेत्य यथागतम्
04090372 राजा न श्रद्दधे भद्रम् अभद्रस्य कुतो मम
04090381 श्रद्धाय वाक्यं देवर्षेर्हर्ष-वेगेन धर्षितः
04090382 वार्ता-हर्तुरतिप्रीतो हारं प्रादान् महा-धनम्
04090391 सद्-अश्वं रथम् आरुह्य कार्तस्वर-परिष्कृतम्
04090392 ब्राह्मणैः कुल-वृद्धैश्च पर्यस्तोऽमात्य-बन्धुभिः
04090401 शङ्ख-दुन्दुभि-नादेन ब्रह्म-घोषेण वेणुभिः
04090402 निश्चक्राम पुरात् तूर्णम् आत्मजाभीक्षणोत्सुकः
04090411 सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्म-भूषिते
04090412 आरुह्य शिबिकां सार्धम् उत्तमेनाभिजग्मतुः
04090421 तं दृष्ट्वोपवनाभ्याश आयान्तं तरसा रथात्
04090422 अवरुह्य नृपस्तूर्णम् आसाद्य प्रेम-विह्वलः
04090431 परिरेभेऽङ्गजं दोर्भ्यां दीर्घोत्कण्ठ-मनाः श्वसन्
04090432 विष्वक्सेनाङ्घ्रि-संस्पर्श- हताशेषाघ-बन्धनम्
04090441 अथाजिघ्रन् मुहुर्मूर्ध्नि शीतैर्नयन-वारिभिः
04090442 स्नापयाम् आस तनयं जातोद्दाम-मनोरथः
04090451 अभिवन्द्य पितुः पादावाशीर्भिश्चाभिमन्त्रितः
04090452 ननाम मातरौ शीर्ष्णा सत्-कृतः सज्-जनाग्रणीः
04090461 सुरुचिस्तं समुत्थाप्य पादावनतम् अर्भकम्
04090462 परिष्वज्याह जीवेति बाष्प-गद्गदया गिरा
04090471 यस्य प्रसन्नो भगवान्गुणैर्मैत्र्य्-आदिभिर्हरिः
04090472 तस्मै नमन्ति भूतानि निम्नम् आप इव स्वयम्
04090481 उत्तमश्च ध्रुवश्चोभावन्योन्यं प्रेम-विह्वलौ
04090482 अङ्ग-सङ्गाद् उत्पुलकावस्रौघं मुहुरूहतुः
04090491 सुनीतिरस्य जननी प्राणेभ्योऽपि प्रियं सुतम्
04090492 उपगुह्य जहावाधिं तद्-अङ्ग-स्पर्श-निर्वृता
04090501 पयः स्तनाभ्यां सुस्राव नेत्र-जैः सलिलैः शिवैः
04090502 तदाभिषिच्यमानाभ्यां वीर वीर-सुवो मुहुः
04090511 तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्ति-हा
04090512 प्रतिलब्धश्चिरं नष्टो रक्षिता मण्डलं भुवः
04090521 अभ्यर्चितस्त्वया नूनं भगवान् प्रणतार्ति-हा
04090522 यद्-अनुध्यायिनो धीरा मृत्युं जिग्युः सुदुर्जयम्
04090531 लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः
04090532 आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत् पुरम्
04090541 तत्र तत्रोपसङ्कॢप्तैर्लसन्-मकर-तोरणैः
04090542 सवृन्दैः कदली-स्तम्भैः पूग-पोतैश्च तद्-विधैः
04090551 चूत-पल्लव-वासः-स्रङ्- मुक्ता-दाम-विलम्बिभिः
04090552 उपस्कृतं प्रति-द्वारम् अपां कुम्भैः सदीपकैः

04090561 प्राकारैर्गोपुरागारैः शातकुम्भ-परिच्छदैः
04090562 सर्वतोऽलङ्कृतं श्रीमद्- विमान-शिखर-द्युभिः
04090571 मृष्ट-चत्वर-रथ्याट्ट- मार्गं चन्दन-चर्चितम्
04090572 लाजाक्षतैः पुष्प-फलैस्तण्डुलैर्बलिभिर्युतम्
04090581 ध्रुवाय पथि दृष्टाय तत्र तत्र पुर-स्त्रियः
04090582 सिद्धार्थाक्षत-दध्य्-अम्बु- दूर्वा-पुष्प-फलानि च
04090591 उपजह्रुः प्रयुञ्जाना वात्सल्याद् आशिषः सतीः
04090592 शृण्वंस्तद्-वल्गु-गीतानि प्राविशद् भवनं पितुः
04090601 महामणि-व्रातमये स तस्मिन् भवनोत्तमे
04090602 लालितो नितरां पित्रा न्यवसद् दिवि देववत्
04090611 पयः-फेन-निभाः शय्या दान्ता रुक्म-परिच्छदाः
04090612 आसनानि महार्हाणि यत्र रौक्मा उपस्कराः
04090621 यत्र स्फटिक-कुड्येषु महा-मारकतेषु च
04090622 मणि-प्रदीपा आभान्ति ललना-रत्न-संयुताः
04090631 उद्यानानि च रम्याणि विचित्रैरमर-द्रुमैः
04090632 कूजद्-विहङ्ग-मिथुनैर्गायन्-मत्त-मधुव्रतैः
04090641 वाप्यो वैदूर्य-सोपानाः पद्मोत्पल-कुमुद्-वतीः
04090642 हंस-कारण्डव-कुलैर्जुष्टाश्चक्राह्व-सारसैः
04090651 उत्तानपादो राजर्षिः प्रभावं तनयस्य तम्
04090652 श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परम्
04090661 वीक्ष्योढ-वयसं तं च प्रकृतीनां च सम्मतम्
04090662 अनुरक्त-प्रजं राजा ध्रुवं चक्रे भुवः पतिम्
04090671 आत्मानं च प्रवयसम् आकलय्य विशाम्पतिः
04090672 वनं विरक्तः प्रातिष्ठद् विमृशन्न् आत्मनो गतिम्

Chapter 10

0410001 मैत्रेय उवाच
04100011 प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः
04100012 उपयेमे भ्रमिं नाम तत्-सुतौ कल्प-वत्सरौ
04100021 इलायाम् अपि भार्यायां वायोः पुत्र्यां महा-बलः
04100022 पुत्रम् उत्कल-नामानं योषिद्-रत्नम् अजीजनत्
04100031 उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा
04100032 हतः पुण्य-जनेनाद्रौ तन्-मातास्य गतिं गता
04100041 ध्रुवो भ्रातृ-वधं श्रुत्वा कोपामर्ष-शुचार्पितः
04100042 जैत्रं स्यन्दनम् आस्थाय गतः पुण्य-जनालयम्
04100051 गत्वोदीचीं दिशं राजा रुद्रानुचर-सेविताम्
04100052 ददर्श हिमवद्-द्रोण्यां पुरीं गुह्यक-सङ्कुलाम्
04100061 दध्मौ शङ्खं बृहद्-बाहुः खं दिशश्चानुनादयन्
04100062 येनोद्विग्न-दृशः क्षत्तरुपदेव्योऽत्रसन् भृशम्
04100071 ततो निष्क्रम्य बलिन उपदेव-महा-भटाः
04100072 असहन्तस्तन्-निनादम् अभिपेतुरुदायुधाः
04100081 स तान् आपततो वीर उग्र-धन्वा महा-रथः
04100082 एकैकं युगपत् सर्वान् अहन् बाणैस्त्रिभिस्त्रिभिः
04100091 ते वै ललाट-लग्नैस्तैरिषुभिः सर्व एव हि
04100092 मत्वा निरस्तम् आत्मानम् आशंसन् कर्म तस्य तत्
04100101 तेऽपि चामुम् अमृष्यन्तः पाद-स्पर्शम् इवोरगाः
04100102 शरैरविध्यन् युगपद् द्वि-गुणं प्रचिकीर्षवः
04100111 ततः परिघ-निस्त्रिंशैः प्रासशूल-परश्वधैः
04100112 शक्त्य्-ऋष्टिभिर्भुशुण्डीभिश्चित्र-वाजैः शरैरपि
04100121 अभ्यवर्षन् प्रकुपिताः सरथं सह-सारथिम्
04100122 इच्छन्तस्तत् प्रतीकर्तुम् अयुतानां त्रयोदश
04100131 औत्तानपादिः स तदा शस्त्र-वर्षेण भूरिणा
04100132 न एवादृश्यताच्छन्न आसारेण यथा गिरिः
04100141 हाहा-कारस्तदैवासीत् सिद्धानां दिवि पश्यताम्

04100142 हतोऽयं मानवः सूर्यो मग्नः पुण्य-जनार्णवे
04100151 नदत्सु यातुधानेषु जय-काशिष्वथो मृधे
04100152 उदतिष्ठद् रथस्तस्य नीहाराद् इव भास्करः
04100161 धनुर्विस्फूर्जयन् दिव्यं द्विषतां खेदम् उद्वहन्
04100162 अस्त्रौघं व्यधमद् बाणैर्घनानीकम् इवानिलः
04100171 तस्य ते चाप-निर्मुक्ता भित्त्वा वर्माणि रक्षसाम्
04100172 कायान् आविविशुस्तिग्मा गिरीन् अशनयो यथा
04100181 भल्लैः सञ्छिद्यमानानां शिरोभिश्चारु-कुण्डलैः
04100182 ऊरुभिर्हेम-तालाभैर्दोर्भिर्वलय-वल्गुभिः
04100191 हार-केयूर-मुकुटैरुष्णीषैश्च महा-धनैः
04100192 आस्तृतास्ता रण-भुवो रेजुर्वीर-मनो-हराः
04100201 हतावशिष्टा इतरे रणाजिराद् । रक्षो-गणाः क्षत्रिय-वर्य-सायकैः
04100202 प्रायो विवृक्णावयवा विदुद्रुवुर् । मृगेन्द्र-विक्रीडित-यूथपा इव
04100211 अपश्यमानः स तदाततायिनं । महा-मृधे कञ्चन मानवोत्तमः
04100212 पुरीं दिदृक्षन्न् अपि नाविशद् द्विषां । न मायिनां वेद चिकीर्षितं जनः
04100221 इति ब्रुवंश्चित्र-रथः स्व-सारथिं । यत्तः परेषां प्रतियोग-शङ्कितः
04100222 शुश्राव शब्दं जलधेरिवेरितं । नभस्वतो दिक्षु रजोऽन्वदृश्यत
04100231 क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः
04100232 विस्फुरत्-तडिता दिक्षु त्रासयत्-स्तनयित्नुना
04100241 ववृषू रुधिरौघासृक्- पूय-विण्-मूत्र-मेदसः
04100242 निपेतुर्गगनाद् अस्य कबन्धान्यग्रतोऽनघ
04100251 ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतो-दिशम्
04100252 गदा-परिघ-निस्त्रिंश- मुसलाः साश्म-वर्षिणः
04100261 अहयोऽशनि-निःश्वासा वमन्तोऽग्निं रुषाक्षिभिः
04100262 अभ्यधावन् गजा मत्ताः सिंह-व्याघ्राश्च यूथशः
04100271 समुद्र ऊर्मिभिर्भीमः प्लावयन् सर्वतो भुवम्
04100272 आससाद महा-ह्रादः कल्पान्त इव भीषणः
04100281 एवं-विधान्यनेकानि त्रासनान्यमनस्विनाम्
04100282 ससृजुस्तिग्म-गतय आसुर्या माययासुराः
04100291 ध्रुवे प्रयुक्ताम् असुरैस्तां मायाम् अतिदुस्तराम्
04100292 निशम्य तस्य मुनयः शम् आशंसन् समागताः
0410030 मुनय ऊचुः
04100301 औत्तानपाद भगवांस्तव शार्ङ्गधन्वा
04100302 देवः क्षिणोत्ववनतार्ति-हरो विपक्षान्
04100303 यन्-नामधेयम् अभिधाय निशम्य चाद्धा
04100304 लोकोऽञ्जसा तरति दुस्तरम् अङ्ग मृत्युम्

Chapter 11

0411001 मैत्रेय उवाच
04110011 निशम्य गदताम् एवम् ऋषीणां धनुषि ध्रुवः
04110012 सन्दधेऽस्त्रम् उपस्पृश्य यन् नारायण-निर्मितम्
04110011 सन्धीयमान एतस्मिन् माया गुह्यक-निर्मिताः
04110011 क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा
04110011 तस्यार्षास्त्रं धनुषि प्रयुञ्जतः ।सुवर्ण-पुङ्खाः कलहंस-वाससः
04110011 विनिःसृता आविविशुर्द्विषद्-बलं ।यथा वनं भीम-रवाः शिखण्डिनः
04110011 तैस्तिग्म-धारैः प्रधने शिली-मुखैर् ।इतस्ततः पुण्य-जना उपद्रुताः
04110011 तम् अभ्यधावन् कुपिता उदायुधाः ।सुपर्णम् उन्नद्ध-फणा इवाहयः
04110011 स तान् पृषत्कैरभिधावतो मृधे ।निकृत्त-बाहूरु-शिरोधरोदरान्
04110011 निनाय लोकं परम् अर्क-मण्डलं ।व्रजन्ति निर्भिद्य यम् ऊर्ध्व-रेतसः
04110011 तान् हन्यमानान् अभिवीक्ष्य गुह्यकान् ।अनागसश्चित्र-रथेन भूरिशः
04110011 औत्तानपादिं कृपया पितामहो ।मनुर्जगादोपगतः सहर्षिभिः
04110011 मनुरुवाच
04110011 अलं वत्सातिरोषेण तमो-द्वारेण पाप्मना
04110011 येन पुण्य-जनान् एतान् अवधीस्त्वम् अनागसः
04110011 नास्मत्-कुलोचितं तात कर्मैतत् सद्-विगर्हितम्
04110011 वधो यद् उपदेवानाम् आरब्धस्तेऽकृतैनसाम्
04110011 नन्वेकस्यापराधेन प्रसङ्गाद् बहवो हताः
04110011 भ्रातुर्वधाभितप्तेन त्वयाङ्ग भ्रातृ-वत्सल
04110011 नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनाम्
04110011 यद् आत्मानं पराग् गृह्य पशुवद् भूत-वैशसम्
04110011 सर्व-भूतात्म-भावेन भूतावासं हरिं भवान्
04110011 आराध्याप दुराराध्यं विष्णोस्तत् परमं पदम्
04110011 स त्वं हरेरनुध्यातस्तत्-पुंसाम् अपि सम्मतः
04110011 कथं त्ववद्यं कृतवान् अनुशिक्षन् सतां व्रतम्
04110011 तितिक्षया करुणया मैत्र्या चाखिल-जन्तुषु
04110011 समत्वेन च सर्वात्मा भगवान् सम्प्रसीदति

04110011 सम्प्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः
04110011 विमुक्तो जीव-निर्मुक्तो ब्रह्म निर्वाणम् ऋच्छति
04110011 भूतैः पञ्चभिरारब्धैर्योषित् पुरुष एव हि
04110011 तयोर्व्यवायात् सम्भूतिर्योषित्-पुरुषयोरिह
04110011 एवं प्रवर्तते सर्गः स्थितिः संयम एव च
04110011 गुण-व्यतिकराद् राजन् मायया परमात्मनः
04110011 निमित्त-मात्रं तत्रासीन् निर्गुणः पुरुषर्षभः
04110011 व्यक्ताव्यक्तम् इदं विश्वं यत्र भ्रमति लोहवत्
04110011 स खल्विदं भगवान् काल-शक्त्या ।गुण-प्रवाहेण विभक्त-वीर्यः
04110011 करोत्यकर्तैव निहन्त्यहन्ता ।चेष्टा विभूम्नः खलु दुर्विभाव्या
04110011 सोऽनन्तोऽन्त-करः कालोऽनादिरादि-कृद् अव्ययः
04110011 जनं जनेन जनयन् मारयन् मृत्युनान्तकम्
04110011 न वै स्व-पक्षोऽस्य विपक्ष एव वा ।परस्य मृत्योर्विशतः समं प्रजाः
04110011 तं धावमानम् अनुधावन्त्यनीशा ।यथा रजांस्यनिलं भूत-सङ्घाः
04110011 आयुषोऽपचयं जन्तोस्तथैवोपचयं विभुः
04110011 उभाभ्यां रहितः स्व-स्थो दुःस्थस्य विदधात्यसौ
04110011 केचित् कर्म वदन्त्येनं स्वभावम् अपरे नृप
04110011 एके कालं परे दैवं पुंसः कामम् उतापरे
04110011 अव्यक्तस्याप्रमेयस्य नाना-शक्त्य्-उदयस्य च
04110011 न वै चिकीर्षितं तात को वेदाथ स्व-सम्भवम्
04110011 न चैते पुत्रक भ्रातुर्हन्तारो धनदानुगाः
04110011 विसर्गादानयोस्तात पुंसो दैवं हि कारणम्
04110011 स एव विश्वं सृजति स एवावति हन्ति च
04110011 अथापि ह्यनहङ्कारान् नाज्यते गुण-कर्मभिः
04110011 एष भूतानि भूतात्मा भूतेशो भूत-भावनः
04110011 स्व-शक्त्या मायया युक्तः सृजत्यत्ति च पाति च
04110011 तम् एव मृत्युम् अमृतं तात दैवं ।सर्वात्मनोपेहि जगत्-परायणम्
04110011 यस्मै बलिं विश्व-सृजो हरन्ति ।गावो यथा वै नसि दाम-यन्त्रिताः
04110011 यः पञ्च-वर्षो जननीं त्वं विहाय ।मातुः सपत्न्या वचसा भिन्न-मर्मा
04110011 वनं गतस्तपसा प्रत्यग्-अक्षम् ।आराध्य लेभे मूर्ध्नि पदं त्रि-लोक्याः
04110011 तम् एनम् अङ्गात्मनि मुक्त-विग्रहे ।व्यपाश्रितं निर्गुणम् एकम् अक्षरम्
04110011 आत्मानम् अन्विच्छ विमुक्तम् आत्म-दृग् । यस्मिन्न् इदं भेदम् असत् प्रतीयते
04110011 त्वं प्रत्यग्-आत्मनि तदा भगवत्यनन्त ।आनन्द-मात्र उपपन्न-समस्त-शक्तौ
04110011 भक्तिं विधाय परमां शनकैरविद्या- ।ग्रन्थिं विभेत्स्यसि ममाहम् इति प्ररूढम्
04110011 संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परम्
04110011 श्रुतेन भूयसा राजन्न् अगदेन यथामयम्
04110011 येनोपसृष्टात् पुरुषाल् लोक उद्विजते भृशम्

04110011 न बुधस्तद्-वशं गच्छेद् इच्छन्न् अभयम् आत्मनः
04110011 हेलनं गिरिश-भ्रातुर्धनदस्य त्वया कृतम्
04110011 यज् जघ्निवान् पुण्य-जनान् भ्रातृ-घ्नान् इत्यमर्षितः
04110011 तं प्रसादय वत्साशु सन्नत्या प्रश्रयोक्तिभिः
04110011 न यावन् महतां तेजः कुलं नोऽभिभविष्यति
04110011 एवं स्वायम्भुवः पौत्रम् अनुशास्य मनुर्ध्रुवम्
04110011 तेनाभिवन्दितः साकम् ऋषिभिः स्व-पुरं ययौ

Chapter 12

0412001 मैत्रेय उवाच
04120011 ध्रुवं निवृत्तं प्रतिबुद्ध्य वैशसाद् ।अपेत-मन्युं भगवान् धनेश्वरः
04120012 तत्रागतश्चारण-यक्ष-किन्नरैः ।संस्तूयमानो न्यवदत् कृताञ्जलिम्
0412002 धनद उवाच
04120021 भो भोः क्षत्रिय-दायाद परितुष्टोऽस्मि तेऽनघ
04120022 यत् त्वं पितामहादेशाद् वैरं दुस्त्यजम् अत्यजः
04120031 न भवान् अवधीद् यक्षान् न यक्षा भ्रातरं तव
04120032 काल एव हि भूतानां प्रभुरप्यय-भावयोः
04120041 अहं त्वम् इत्यपार्था धीरज्ञानात् पुरुषस्य हि
04120042 स्वाप्नीवाभात्यतद्-ध्यानाद् यया बन्ध-विपर्ययौ
04120051 तद् गच्छ ध्रुव भद्रं ते भगवन्तम् अधोक्षजम्
04120052 सर्व-भूतात्म-भावेन सर्व-भूतात्म-विग्रहम्
04120061 भजस्व भजनीयाङ्घ्रिम् अभवाय भव-च्छिदम्
04120062 युक्तं विरहितं शक्त्या गुण-मय्यात्म-मायया
04120071 वृणीहि कामं नृप यन् मनो-गतं ।मत्तस्त्वम् औत्तानपदेऽविशङ्कितः
04120072 वरं वरार्होऽम्बुज-नाभ-पादयोर् ।अनन्तरं त्वां वयम् अङ्ग शुश्रुम
0412008 मैत्रेय उवाच
04120081 स राज-राजेन वराय चोदितो ।ध्रुवो महा-भागवतो महा-मतिः
04120082 हरौ स वव्रे ऽचलितां स्मृतिं यया ।तरत्ययत्नेन दुरत्ययं तमः
04120091 तस्य प्रीतेन मनसा तां दत्त्वैडविडस्ततः
04120092 पश्यतोऽन्तर्दधे सोऽपि स्व-पुरं प्रत्यपद्यत
04120101 अथायजत यज्ञेशं क्रतुभिर्भूरि-दक्षिणैः
04120102 द्रव्य-क्रिया-देवतानां कर्म कर्म-फल-प्रदम्
04120111 सर्वात्मन्यच्युतेऽसर्वे तीव्रौघां भक्तिम् उद्वहन्
04120112 ददर्शात्मनि भूतेषु तम् एवावस्थितं विभुम्
04120121 तम् एवं शील-सम्पन्नं ब्रह्मण्यं दीन-वत्सलम्
04120122 गोप्तारं धर्म-सेतूनां मेनिरे पितरं प्रजाः
04120131 षट्-त्रिंशद्-वर्ष-साहस्रं शशास क्षिति-मण्डलम्

04120132 भोगैः पुण्य-क्षयं कुर्वन्न् अभोगैरशुभ-क्षयम्
04120141 एवं बहु-सवं कालं महात्माविचलेन्द्रियः
04120142 त्रि-वर्गौपयिकं नीत्वा पुत्रायादान् नृपासनम्
04120151 मन्यमान इदं विश्वं माया-रचितम् आत्मनि
04120152 अविद्या-रचित-स्वप्न-गन्धर्व-नगरोपमम्
04120161 आत्म-स्त्र्य्-अपत्य-सुहृदो बलम् ऋद्ध-कोशम्
04120162 अन्तः-पुरं परिविहार-भुवश्च रम्याः
04120163 भू-मण्डलं जलधि-मेखलम् आकलय्य
04120164 कालोपसृष्टम् इति स प्रययौ विशालाम्
04120171 तस्यां विशुद्ध-करणः शिव-वार्विगाह्य
04120172 बद्धासनं जित-मरुन् मनसाहृताक्षः
04120173 स्थूले दधार भगवत्-प्रतिरूप एतद्
04120174 ध्यायंस्तद् अव्यवहितो व्यसृजत् समाधौ
04120181 भक्तिं हरौ भगवति प्रवहन्न् अजस्रम्
04120182 आनन्द-बाष्प-कलया मुहुरर्द्यमानः
04120183 विक्लिद्यमान-हृदयः पुलकाचिताङ्गो
04120184 नात्मानम् अस्मरद् असाविति मुक्त-लिङ्गः
04120191 स ददर्श विमानाग्र्यं नभसोऽवतरद् ध्रुवः
04120192 विभ्राजयद् दश दिशो राकापतिम् इवोदितम्
04120201 तत्रानु देव-प्रवरौ चतुर्-भुजौ
04120202 श्यामौ किशोरावरुणाम्बुजेक्षणौ
04120203 स्थिताववष्टभ्य गदां सुवाससौ
04120204 किरीट-हाराङ्गद-चारु-कुण्डलौ
04120211 विज्ञाय तावुत्तमगाय-किङ्कराव्
04120212 अभ्युत्थितः साध्वस-विस्मृत-क्रमः
04120213 ननाम नामानि गृणन् मधुद्विषः
04120214 पार्षत्-प्रधानाविति संहताञ्जलिः
04120221 तं कृष्ण-पादाभिनिविष्ट-चेतसं
04120222 बद्धाञ्जलिं प्रश्रय-नम्र-कन्धरम्
04120223 सुनन्द-नन्दावुपसृत्य सस्मितं
04120224 प्रत्यूचतुः पुष्करनाभ-सम्मतौ
0412023 सुनन्द-नन्दावूचतुः
04120231 भो भो राजन् सुभद्रं ते वाचं नोऽवहितः शृणु
04120232 यः पञ्च-वर्षस्तपसा भवान् देवम् अतीतृपत्
04120241 तस्याखिल-जगद्-धातुरावां देवस्य शार्ङ्गिणः
04120242 पार्षदाविह सम्प्राप्तौ नेतुं त्वां भगवत्-पदम्
04120251 सुदुर्जयं विष्णु-पदं जितं त्वया । यत् सूरयोऽप्राप्य विचक्षते परम्
04120252 आतिष्ठ तच् चन्द्र-दिवाकरादयो । ग्रहर्क्ष-ताराः परियन्ति दक्षिणम्
04120261 अनास्थितं ते पितृभिरन्यैरप्यङ्ग कर्हिचित्
04120262 आतिष्ठ जगतां वन्द्यं तद् विष्णोः परमं पदम्

04120271 एतद् विमान-प्रवरम् उत्तमश्लोक-मौलिना
04120272 उपस्थापितम् आयुष्मन्न् अधिरोढुं त्वम् अर्हसि
0412028 मैत्रेय उवाच
04120281 निशम्य वैकुण्ठ-नियोज्य-मुख्ययोर् । मधु-च्युतं वाचम् उरुक्रम-प्रियः
04120282 कृताभिषेकः कृत-नित्य-मङ्गलो । मुनीन् प्रणम्याशिषम् अभ्यवादयत्
04120291 परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवन्द्य च
04120292 इयेष तद् अधिष्ठातुं बिभ्रद् रूपं हिरण्मयम्
04120301 तदोत्तानपदः पुत्रो ददर्शान्तकम् आगतम्
04120302 मृत्योर्मूर्ध्नि पदं दत्त्वा आरुरोहाद्भुतं गृहम्
04120311 तदा दुन्दुभयो नेदुर्मृदङ्ग-पणवादयः
04120312 गन्धर्व-मुख्याः प्रजगुः पेतुः कुसुम-वृष्टयः
04120321 स च स्वर्लोकम् आरोक्ष्यन् सुनीतिं जननीं ध्रुवः
04120322 अन्वस्मरद् अगं हित्वा दीनां यास्ये त्रि-विष्टपम्
04120331 इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ
04120332 दर्शयाम् आसतुर्देवीं पुरो यानेन गच्छतीम्
04120341 तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः
04120342 अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान्
04120351 त्रि-लोकीं देव-यानेन सोऽतिव्रज्य मुनीन् अपि
04120352 परस्ताद् यद् ध्रुव-गतिर्विष्णोः पदम् अथाभ्यगात्
04120361 यद् भ्राजमानं स्व-रुचैव सर्वतो । लोकास्त्रयो ह्यनु विभ्राजन्त एते
04120362 यन् नाव्रजन् जन्तुषु येऽननुग्रहा । व्रजन्ति भद्राणि चरन्ति येऽनिशम्
04120371 शान्ताः सम-दृशः शुद्धाः । सर्व-भूतानुरञ्जनाः
04120372 यान्त्यञ्जसाच्युत-पदम् । अच्युत-प्रिय-बान्धवाः
04120381 इत्युत्तानपदः पुत्रो । ध्रुवः कृष्ण-परायणः
04120382 अभूत् त्रयाणां लोकानां । चूडा-मणिरिवामलः
04120391 गम्भीर-वेगोऽनिमिषं । ज्योतिषां चक्रम् आहितम्
04120392 यस्मिन् भ्रमति कौरव्य । मेढ्याम् इव गवां गणः
04120401 महिमानं विलोक्यास्य । नारदो भगवान् ऋषिः
04120402 आतोद्यं वितुद' श्लोकान् । सत्रेऽगायत् प्रचेतसाम्
0412041 नारद उवाच
04120411 नूनं सुनीतेः पति-देवतायास् । तपः-प्रभावस्य सुतस्य तां गतिम्
04120412 दृष्ट्वाभ्युपायान् अपि वेद-वादिनो । नैवाधिगन्तुं प्रभवन्ति किं नृपाः
04120421 यः पञ्च-वर्षो गुरु-दार-वाक्-शरैर् । भिन्नेन यातो हृदयेन दूयता
04120422 वनं मद्-आदेश-करो ज्ञितं प्रभुं । जिगाय तद्-भक्त-गुणैः पराजितम्
04120431 यः क्षत्र-बन्धुर्भुवि तस्याधिरूढम् । अन्वारुरुक्षेद् अपि वर्ष-पूगैः
04120432 षट्-पञ्च-वर्षो यद् अहोभिरल्पैः । प्रसाद्य वैकुण्ठम् अवाप तत्-पदम्
0412044 मैत्रेय उवाच
04120441 एतत् तेऽभिहितं सर्वं यत् पृष्टोऽहम् इह त्वया
04120442 ध्रुवस्योद्दाम-यशसश्चरितं सम्मतं सताम्
04120451 धन्यं यशस्यम् आयुष्यं पुण्यं स्वस्त्य्-अयनं महत्

04120452 स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यम् अघ-मर्षणम्
04120461 श्रुत्वैतच् छ्रद्धयाभीक्ष्णम् अच्युत-प्रिय-चेष्टितम्
04120462 भवेद् भक्तिर्भगवति यया स्यात् क्लेश-सङ्क्षयः
04120471 महत्त्वम् इच्छतां तीर्थं श्रोतुः शीलादयो गुणाः
04120472 यत्र तेजस्तद् इच्छूनां मानो यत्र मनस्विनाम्
04120481 प्रयतः कीर्तयेत् प्रातः समवाये द्वि-जन्मनाम्
04120482 सायं च पुण्य-श्लोकस्य ध्रुवस्य चरितं महत्
04120491 पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा
04120492 दिन-क्षये व्यतीपाते सङ्क्रमेऽर्कदिनेऽपि वा
04120501 श्रावयेच् छ्रद्दधानानां तीर्थ-पाद-पदाश्रयः
04120502 नेच्छंस्तत्रात्मनात्मानं सन्तुष्ट इति सिध्यति
04120511 ज्ञानम् अज्ञात-तत्त्वाय यो दद्यात् सत्-पथेऽमृतम्
04120512 कृपालोर्दीन-नाथस्य देवास्तस्यानुगृह्णते
04120521 इदं मया तेऽभिहितं कुरूद्वह । ध्रुवस्य विख्यात-विशुद्ध-कर्मणः
04120522 हित्वार्भकः क्रीडनकानि मातुर् । गृहं च विष्णुं शरणं यो जगाम

Chapter 13

0413001 सूत उवाच
04130011 निशम्य कौषारविणोपवर्णितं ।ध्रुवस्य वैकुण्ठ-पदाधिरोहणम्
04130012 प्ररूढ-भावो भगवत्यधोक्षजे ।प्रष्टुं पुनस्तं विदुरः प्रचक्रमे
0413002 विदुर उवाच
04130021 के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत
04130022 कस्यान्ववाये प्रख्याताः कुत्र वा सत्रम् आसत
04130031 मन्ये महा-भागवतं नारदं देव-दर्शनम्
04130032 येन प्रोक्तः क्रिया-योगः परिचर्या-विधिर्हरेः
04130041 स्व-धर्म-शीलैः पुरुषैर्भगवान् यज्ञ-पूरुषः
04130042 इज्यमानो भक्तिमता नारदेनेरितः किल
04130051 यास्ता देवर्षिणा तत्र वर्णिता भगवत्-कथाः
04130052 मह्यं शुश्रूषवे ब्रह्मन् कार्त्स्न्येनाचष्टुम् अर्हसि
0413006 मैत्रेय उवाच
04130061 ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनम्
04130062 सार्वभौम-श्रियं नैच्छद् अधिराजासनं पितुः
04130071 स जन्मनोपशान्तात्मा निःसङ्गः सम-दर्शनः
04130072 ददर्श लोके विततम् आत्मानं लोकम् आत्मनि
04130081 आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमित-विग्रहम्
04130082 अवबोध-रसैकात्म्यम् आनन्दम् अनुसन्ततम्
04130091 अव्यवच्छिन्न-योगाग्नि- दग्ध-कर्म-मलाशयः
04130092 स्वरूपम् अवरुन्धानो नात्मनोऽन्यं तदैक्षत
04130101 जडान्ध-बधिरोन्मत्त- मूकाकृतिरतन्-मतिः
04130102 लक्षितः पथि बालानां प्रशान्तार्चिरिवानलः
04130111 मत्वा तं जडम् उन्मत्तं कुल-वृद्धाः समन्त्रिणः
04130112 वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम्
04130121 स्ववीर्थिर्वत्सरस्येष्टा भार्यासूत षड्-आत्मजान्
04130122 पुष्पार्णं तिग्मकेतुं च इषम् ऊर्जं वसुं जयम्
04130131 पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः

04130132 प्रातर्मध्यन्दिनं सायम् इति ह्यासन् प्रभा-सुताः
04130141 प्रदोषो निशिथो व्युष्ट इति दोषा-सुतास्त्रयः
04130142 व्युष्टः सुतं पुष्करिण्यां सर्वतेजसम् आदधे
04130151 स चक्षुः सुतम् आकूत्यां पत्न्यां मनुम् अवाप ह
04130152 मनोरसूत महिषी विरजान् नड्वला सुतान्
04130161 पुरुं कुत्सं त्रितं द्युम्नं सत्यवन्तम् ऋतं व्रतम्
04130162 अग्निष्टोमम् अतीरात्रं प्रद्युम्नं शिबिम् उल्मुकम्
04130171 उल्मुको ऽजनयत् पुत्रान् पुष्करिण्यां षड् उत्तमान्
04130172 अङ्गं सुमनसं ख्यातिं क्रतुम् अङ्गिरसं गयम्
04130181 सुनीथाङ्गस्य या पत्नी सुषुवे वेनम् उल्बणम्
04130182 यद्-दौःशील्यात् स राजर्षिर्निर्विण्णो निरगात् पुरात्
04130191 यम् अङ्ग शेपुः कुपिता वाग्-वज्रा मुनयः किल
04130192 गतासोस्तस्य भूयस्ते ममन्थुर्दक्षिणं करम्
04130201 अराजके तदा लोके दस्युभिः पीडिताः प्रजाः
04130202 जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः
0413021 विदुर उवाच
04130211 तस्य शील-निधेः साधोर्ब्रह्मण्यस्य महात्मनः
04130212 राज्ञः कथम् अभूद् दुष्टा प्रजा यद् विमना ययौ
04130221 किं वांहो वेन उद्दिश्य ब्रह्म-दण्डम् अयूयुजन्
04130222 दण्ड-व्रत-धरे राज्ञि मुनयो धर्म-कोविदाः
04130231 नावध्येयः प्रजा-पालः प्रजाभिरघवान् अपि
04130232 यद् असौ लोक-पालानां बिभर्त्योजः स्व-तेजसा
04130241 एतद् आख्याहि मे ब्रह्मन् सुनीथात्मज-चेष्टितम्
04130242 श्रद्दधानाय भक्ताय त्वं परावर-वित्तमः
0413025 मैत्रेय उवाच
04130251 अङ्गोऽश्वमेधं राजर्षिराजहार महा-क्रतुम्
04130252 नाजग्मुर्देवतास्तस्मिन्न् आहूता ब्रह्म-वादिभिः
04130261 तम् ऊचुर्विस्मितास्तत्र यजमानम् अथर्त्विजः
04130262 हवींषि हूयमानानि न ते गृह्णन्ति देवताः
04130271 राजन् हवींष्यदुष्टानि श्रद्धयासादितानि ते
04130272 छन्दांस्ययात-यामानि योजितानि धृत-व्रतैः
04130281 न विदामेह देवानां हेलनं वयम् अण्वपि
04130282 यन् न गृह्णन्ति भागान् स्वान् ये देवाः कर्म-साक्षिणः
0413029 मैत्रेय उवाच
04130291 अङ्गो द्विज-वचः श्रुत्वा यजमानः सुदुर्मनाः
04130292 तत् प्रष्टुं व्यसृजद् वाचं सदस्यांस्तद्-अनुज्ञया
04130301 नागच्छन्त्याहुता देवा न गृह्णन्ति ग्रहान् इह
04130302 सदसस्-पतयो ब्रूत किम् अवद्यं मया कृतम्
0413031 सदसस्-पतय ऊचुः
04130311 नर-देवेह भवतो नाघं तावन् मनाक् स्थितम्

04130312 अस्त्येकं प्राक्तनम् अघं यद् इहेदृक् त्वम् अप्रजः
04130321 तथा साधय भद्रं ते आत्मानं सुप्रजं नृप
04130322 इष्टस्ते पुत्र-कामस्य पुत्रं दास्यति यज्ञ-भुक्
04130331 तथा स्व-भागधेयानि ग्रहीष्यन्ति दिवौकसः
04130332 यद् यज्ञ-पुरुषः साक्षाद् अपत्याय हरिर्वृतः
04130341 तांस्तान् कामान् हरिर्दद्याद् यान् यान् कामयते जनः
04130342 आराधितो यथैवैष तथा पुंसां फलोदयः
04130351 इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये
04130352 पुरोडाशं निरवपन् शिपि-विष्टाय विष्णवे
04130361 तस्मात् पुरुष उत्तस्थौ हेम-माल्यमलाम्बरः
04130362 हिरण्मयेन पात्रेण सिद्धम् आदाय पायसम्
04130371 स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम्
04130372 अवघ्राय मुदा युक्तः प्रादात् पत्न्या उदार-धीः
04130381 सा तत् पुं-सवनं राज्ञी प्राश्य वै पत्युरादधे
04130382 गर्भं काल उपावृत्ते कुमारं सुषुवेऽप्रजा
04130391 स बाल एव पुरुषो मातामहम् अनुव्रतः
04130392 अधर्मांशोद्भवं मृत्युं तेनाभवद् अधार्मिकः
04130401 स शरासनम् उद्यम्य मृगयुर्वन-गोचरः
04130402 हन्त्यसाधुर्मृगान् दीनान् वेनोऽसावित्यरौज् जनः
04130411 आक्रीडे क्रीडतो बालान् वयस्यान् अतिदारुणः
04130412 प्रसह्य निरनुक्रोशः पशु-मारम् अमारयत्
04130421 तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः
04130422 यदा न शासितुं कल्पो भृशम् आसीत् सुदुर्मनाः
04130431 प्रायेणाभ्यर्चितो देवो येऽप्रजा गृह-मेधिनः
04130432 कद्-अपत्य-भृतं दुःखं ये न विन्दन्ति दुर्भरम्
04130441 यतः पापीयसी कीर्तिरधर्मश्च महान् नृणाम्
04130442 यतो विरोधः सर्वेषां यत आधिरनन्तकः
04130451 कस्तं प्रजापदेशं वै मोह-बन्धनम् आत्मनः
04130452 पण्डितो बहु मन्येत यद्-अर्थाः क्लेशदा गृहाः
04130461 कद्-अपत्यं वरं मन्ये सद्-अपत्याच् छुचां पदात्
04130462 निर्विद्येत गृहान् मर्त्यो यत्-क्लेश-निवहा गृहाः
04130471 एवं स निर्विण्ण-मना नृपो गृहान् । निशीथ उत्थाय महोदयोदयात्
04130472 अलब्ध-निद्रोऽनुपलक्षितो नृभिर् । हित्वा गतो वेन-सुवं प्रसुप्ताम्
04130481 विज्ञाय निर्विद्य गतं पतिं प्रजाः । पुरोहितामात्य-सुहृद्-गणादयः
04130482 विचिक्युरुर्व्याम् अतिशोक-कातरा । यथा निगूढं पुरुषं कुयोगिनः
04130491 अलक्षयन्तः पदवीं प्रजापतेर् । हतोद्यमाः प्रत्युपसृत्य ते पुरीम्
04130492 ऋषीन् समेतान् अभिवन्द्य साश्रवो । न्यवेदयन् पौरव भर्तृ-विप्लवम्

Chapter 14

0414001 मैत्रेय उवाच
04140011 भृग्व्-आदयस्ते मुनयो लोकानां क्षेम-दर्शिनः
04140012 गोप्तर्यसति वै नॄणां पश्यन्तः पशु-साम्यताम्
04140021 वीर-मातरम् आहूय सुनीथां ब्रह्म-वादिनः
04140022 प्रकृत्य्-असम्मतं वेनम् अभ्यषिञ्चन् पतिं भुवः
04140031 श्रुत्वा नृपासन-गतं वेनम् अत्युग्र-शासनम्
04140032 निलिल्युर्दस्यवः सद्यः सर्प-त्रस्ता इवाखवः
04140041 स आरूढ-नृप-स्थान उन्नद्धोऽष्ट-विभूतिभिः
04140042 अवमेने महा-भागान् स्तब्धः सम्भावितः स्वतः
04140051 एवं मदान्ध उत्सिक्तो निरङ्कुश इव द्विपः
04140052 पर्यटन् रथम् आस्थाय कम्पयन्न् इव रोदसी
04140061 न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित्
04140062 इति न्यवारयद् धर्मं भेरी-घोषेण सर्वशः
04140071 वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितम्
04140072 विमृश्य लोक-व्यसनं कृपयोचुः स्म सत्रिणः
04140081 अहो उभयतः प्राप्तं लोकस्य व्यसनं महत्
04140082 दारुण्युभयतो दीप्ते इव तस्कर-पालयोः
04140091 अराजक-भयाद् एष कृतो राजातद्-अर्हणः
04140092 ततोऽप्यासीद् भयं त्वद्य कथं स्यात् स्वस्ति देहिनाम्
04140101 अहेरिव पयः-पोषः पोषकस्याप्यनर्थ-भृत्
04140102 वेनः प्रकृत्यैव खलः सुनीथा-गर्भ-सम्भवः
04140111 निरूपितः प्रजा-पालः स जिघांसति वै प्रजाः
04140112 तथापि सान्त्वयेमामुं नास्मांस्तत्-पातकं स्पृशेत्
04140121 तद्-विद्वद्भिरसद्-वृत्तो वेनोऽस्माभिः कृतो नृपः
04140122 सान्त्वितो यदि नो वाचं न ग्रहीष्यत्यधर्म-कृत्
04140131 लोक-धिक्कार-सन्दग्धं दहिष्यामः स्व-तेजसा
04140132 एवम् अध्यवसायैनं मुनयो गूढ-मन्यवः
04140133 उपव्रज्याब्रुवन् वेनं सान्त्वयित्वा च सामभिः

0414014 मुनय ऊचुः
04140141 नृप-वर्य निबोधैतद् यत् ते विज्ञापयाम भोः
04140142 आयुः-श्री-बल-कीर्तीनां तव तात विवर्धनम्
04140151 धर्म आचरितः पुंसां वाङ्-मनः-काय-बुद्धिभिः
04140152 लोकान् विशोकान् वितरत्यथानन्त्यम् असङ्गिनाम्
04140161 स ते मा विनशेद् वीर प्रजानां क्षेम-लक्षणः
04140162 यस्मिन् विनष्टे नृपतिरैश्वर्याद् अवरोहति
04140171 राजन्न् असाध्व्-अमात्येभ्यश्चोरादिभ्यः प्रजा नृपः
04140172 रक्षन् यथा बलिं गृह्णन्न् इह प्रेत्य च मोदते
04140181 यस्य राष्ट्रे पुरे चैव भगवान् यज्ञ-पूरुषः
04140182 इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः
04140191 तस्य राज्ञो महा-भाग भगवान् भूत-भावनः
04140192 परितुष्यति विश्वात्मा तिष्ठतो निज-शासने
04140201 तस्मिंस्तुष्टे किम् अप्राप्यंजगताम् ईश्वरेश्वरे
04140202 लोकाः सपाला ह्येतस्मै हरन्ति बलिम् आदृताः
04140211 तं सर्व-लोकामर-यज्ञ-सङ्गृहं । त्रयीमयं द्रव्यमयं तपोमयम्
04140212 यज्ञैर्विचित्रैर्यजतो भवाय ते । राजन् स्व-देशान् अनुरोद्धुम् अर्हसि
04140221 यज्ञेन युष्मद्-विषये द्विजातिभिर् । वितायमानेन सुराः कला हरेः
04140222 स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं । तद्-धेलनं नार्हसि वीर चेष्टितुम्
0414023 वेन उवाच
04140231 बालिशा बत यूयं वा अधर्मे धर्म-मानिनः
04140232 ये वृत्तिदं पतिं हित्वा जारं पतिम् उपासते
04140241 अवजानन्त्यमी मूढा नृप-रूपिणम् ईश्वरम्
04140242 नानुविन्दन्ति ते भद्रम् इह लोके परत्र च
04140251 को यज्ञ-पुरुषो नाम यत्र वो भक्तिरीदृशी
04140252 भर्तृ-स्नेह-विदूराणां यथा जारे कुयोषिताम्
04140261 विष्णुर्विरिञ्चो गिरिश इन्द्रो वायुर्यमो रविः
04140262 पर्जन्यो धनदः सोमः क्षितिरग्निरपाम्पतिः
04140271 एते चान्ये च विबुधाः प्रभवो वर-शापयोः
04140272 देहे भवन्ति नृपतेः सर्व-देवमयो नृपः
04140281 तस्मान् मां कर्मभिर्विप्रा यजध्वं गत-मत्सराः
04140282 बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्र-भुक् पुमान्
0414029 मैत्रेय उवाच
04140291 इत्थं विपर्यय-मतिः पापीयान् उत्पथं गतः
04140292 अनुनीयमानस्तद्-याच्'आं न चक्रे भ्रष्ट-मङ्गलः
04140301 इति तेऽसत्-कृतास्तेन द्विजाः पण्डित-मानिना
04140302 भग्नायां भव्य-याच्'आयां तस्मै विदुर चुक्रुधुः
04140311 हन्यतां हन्यताम् एष पापः प्रकृति-दारुणः
04140312 जीवन् जगद् असावाशु कुरुते भस्मसाद् ध्रुवम्

04140321 नायम् अर्हत्यसद्-वृत्तो नरदेव-वरासनम्
04140322 योऽधियज्ञ-पतिं विष्णुं विनिन्दत्यनपत्रपः
04140331 को वैनं परिचक्षीत वेनम् एकम् ऋतेऽशुभम्
04140332 प्राप्त ईदृशम् ऐश्वर्यं यद्-अनुग्रह-भाजनः
04140341 इत्थं व्यवसिता हन्तुम् ऋषयो रूढ-मन्यवः
04140342 निजघ्नुर्हुङ्कृतैर्वेनं हतम् अच्युत-निन्दया
04140351 ऋषिभिः स्वाश्रम-पदं गते पुत्र-कलेवरम्
04140352 सुनीथा पालयाम् आस विद्या-योगेन शोचती
04140361 एकदा मुनयस्ते तु सरस्वत्-सलिलाप्लुताः
04140362 हुत्वाग्नीन् सत्-कथाश्चक्रुरुपविष्टाः सरित्-तटे
04140371 वीक्ष्योत्थितांस्तदोत्पातान् आहुर्लोक-भयङ्करान्
04140372 अप्यभद्रम् अनाथाया दस्युभ्यो न भवेद् भुवः
04140381 एवं मृशन्त ऋषयो धावतां सर्वतो-दिशम्
04140382 पांसुः समुत्थितो भूरिश्चोराणाम् अभिलुम्पताम्
04140391 तद् उपद्रवम् आज्ञाय लोकस्य वसु लुम्पताम्
04140392 भर्तर्युपरते तस्मिन्न् अन्योन्यं च जिघांसताम्
04140401 चोर-प्रायं जन-पदं हीन-सत्त्वम् अराजकम्
04140402 लोकान् नावारय' छक्ता अपि तद्-दोष-दर्शिनः
04140411 ब्राह्मणः सम-दृक् शान्तो दीनानां समुपेक्षकः
04140412 स्रवते ब्रह्म तस्यापि भिन्न-भाण्डात् पयो यथा
04140421 नाङ्गस्य वंशो राजर्षेरेष संस्थातुम् अर्हति
04140422 अमोघ-वीर्या हि नृपा वंशेऽस्मिन् केशवाश्रयाः
04140431 विनिश्चित्यैवम् ऋषयो विपन्नस्य महीपतेः
04140432 ममन्थुरूरुं तरसा तत्रासीद् बाहुको नरः
04140441 काक-कृष्णोऽतिह्रस्वाङ्गो ह्रस्व-बाहुर्महा-हनुः
04140442 ह्रस्व-पान् निम्न-नासाग्रो रक्ताक्षस्ताम्र-मूर्धजः
04140451 तं तु तेऽवनतं दीनं किं करोमीति वादिनम्
04140452 निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत्
04140461 तस्य वंश्यास्तु नैषादा गिरि-कानन-गोचराः
04140462 येनाहरज् जायमानो वेन-कल्मषम् उल्बणम्

Chapter 15

0415001 मैत्रेय उवाच
04150011 अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः
04150012 बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत
04150021 तद् दृष्ट्वा मिथुनं जातम् ऋषयो ब्रह्म-वादिनः
04150022 ऊचुः परम-सन्तुष्टा विदित्वा भगवत्-कलाम्
0415003 ऋषय ऊचुः
04150031 एष विष्णोर्भगवतः कला भुवन-पालिनी
04150032 इयं च लक्ष्म्याः सम्भूतिः पुरुषस्यानपायिनी
04150041 अयं तु प्रथमो राज्ञां पुमान् प्रथयिता यशः
04150042 पृथुर्नाम महाराजो भविष्यति पृथु-श्रवाः
04150051 इयं च सुदती देवी गुण-भूषण-भूषणा
04150052 अर्चिर्नाम वरारोहा पृथुम् एवावरुन्धती
04150061 एष साक्षाद् धरेरंशोजातो लोक-रिरक्षया
04150062 इयं च तत्-परा हि श्रीरनुजज्ञेऽनपायिनी
0415007 मैत्रेय उवाच
04150071 प्रशंसन्ति स्म तं विप्रा गन्धर्व-प्रवरा जगुः
04150072 मुमुचुः सुमनो-धाराः सिद्धा नृत्यन्ति स्वः-स्त्रियः
04150081 शङ्ख-तूर्य-मृदङ्गाद्या नेदुर्दुन्दुभयो दिवि
04150082 तत्र सर्व उपाजग्मुर्देवर्षि-पितॄणां गणाः
04150091 ब्रह्मा जगद्-गुरुर्देवैः सहासृत्य सुरेश्वरैः
04150092 वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः
04150101 पादयोररविन्दं च तं वै मेने हरेः कलाम्
04150102 यस्याप्रतिहतं चक्रम् अंशः स परमेष्ठिनः
04150111 तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्म-वादिभिः
04150112 आभिषेचनिकान्यस्मै आजह्रुः सर्वतो जनाः
04150121 सरित्-समुद्रा गिरयो नागा गावः खगा मृगाः
04150122 द्यौः क्षितिः सर्व-भूतानि समाजह्रुरुपायनम्
04150131 सोऽभिषिक्तो महाराजः सुवासाः साध्व्-अलङ्कृतः

04150132 पत्न्यार्चिषालङ्कृतया विरेजेऽग्निरिवापरः
04150141 तस्मै जहार धनदो हैमं वीर वरासनम्
04150142 वरुणः सलिल-स्रावम् आतपत्रं शशि-प्रभम्
04150151 वायुश्च वाल-व्यजने धर्मः कीर्तिमयीं स्रजम्
04150152 इन्द्रः किरीटम् उत्कृष्टं दण्डं संयमनं यमः
04150161 ब्रह्मा ब्रह्ममयं वर्म भारती हारम् उत्तमम्
04150162 हरिः सुदर्शनं चक्रं तत्-पत्न्यव्याहतां श्रियम्
04150171 दश-चन्द्रम् असिं रुद्रः शत-चन्द्रं तथाम्बिका
04150172 सोमोऽमृतमयान् अश्वांस्त्वष्टा रूपाश्रयं रथम्
04150181 अग्निराज-गवं चापं सूर्यो रश्मिमयान् इषून्
04150182 भूः पादुके योगमय्यौ द्यौः पुष्पावलिम् अन्वहम्
04150191 नाट्यं सुगीतं वादित्रम् अन्तर्धानं च खेचराः
04150192 ऋषयश्चाशिषः सत्याः समुद्रः शङ्खम् आत्मजम्
04150201 सिन्धवः पर्वता नद्यो रथ-वीथीर्महात्मनः
04150202 सूतोऽथ मागधो वन्दी तं स्तोतुम् उपतस्थिरे
04150211 स्तावकांस्तान् अभिप्रेत्य पृथुर्वैन्यः प्रतापवान्
04150212 मेघ-निर्ह्रादया वाचा प्रहसन् इदम् अब्रवीत्
0415022 पृथुरुवाच
04150221 भोः सूत हे मागध सौम्य वन्दिन् ।लोकेऽधुनास्पष्ट-गुणस्य मे स्यात्
04150222 किम् आश्रयो मे स्तव एष योज्यतां ।मा मय्यभूवन् वितथा गिरो वः
04150231 तस्मात् परोक्षेऽस्मद्-उपश्रुतान्यलं ।करिष्यथ स्तोत्रम् अपीच्य-वाचः
04150232 सत्युत्तमश्लोक-गुणानुवादे ।जुगुप्सितं न स्तवयन्ति सभ्याः
04150241 महद्-गुणान् आत्मनि कर्तुम् ईशः ।कः स्तावकैः स्तावयतेऽसतोऽपि
04150242 तेऽस्याभविष्यन् इति विप्रलब्धो जनावहासं कुमतिर्न वेद
04150251 प्रभवो ह्यात्मनः स्तोत्रंजुगुप्सन्त्यपि विश्रुताः
04150252 ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हितम्
04150261 वयं त्वविदिता लोके सूताद्यापि वरीमभिः
04150262 कर्मभिः कथम् आत्मानं गापयिष्याम बालवत्

Chapter 16

0416001 मैत्रेय उवाच
04160011 इति ब्रुवाणं नृपतिं गायका मुनि-चोदिताः
04160012 तुष्टुवुस्तुष्ट-मनसस्तद्-वाग्-अमृत-सेवया
04160021 नालं वयं ते महिमानुवर्णने । यो देव-वर्योऽवततार मायया
04160022 वेनाङ्ग-जातस्य च पौरुषाणि ते । वाचस्-पतीनाम् अपि बभ्रमुर्धियः
04160031 अथाप्युदार-श्रवसः पृथोर्हरेः । कलावतारस्य कथामृतादृताः
04160032 यथोपदेशं मुनिभिः प्रचोदिताः । श्लाघ्यानि कर्माणि वयं वितन्महि
04160041 एष धर्म-भृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन्
04160042 गोप्ता च धर्म-सेतूनां शास्ता तत्-परिपन्थिनाम्
04160051 एष वै लोक-पालानां बिभर्त्येकस्तनौ तनूः
04160052 काले काले यथा-भागं लोकयोरुभयोर्हितम्
04160061 वसु काल उपादत्ते काले चायं विमुञ्चति
04160062 समः सर्वेषु भूतेषु प्रतपन् सूर्यवद् विभुः
04160071 तितिक्षत्यक्रमं वैन्य उपर्याक्रमताम् अपि
04160072 भूतानां करुणः शश्वद् आर्तानां क्षिति-वृत्तिमान्
04160081 देवेऽवर्षत्यसौ देवो नरदेव-वपुर्हरिः
04160082 कृच्छ्र-प्राणाः प्रजा ह्येष रक्षिष्यत्यञ्जसेन्द्रवत्
04160091 आप्याययत्यसौ लोकं वदनामृत-मूर्तिना
04160092 सानुरागावलोकेन विशद-स्मित-चारुणा
04160101 अव्यक्त-वर्त्मैष निगूढ-कार्यो । गम्भीर-वेधा उपगुप्त-वित्तः
04160102 अनन्त-माहात्म्य-गुणैक-धामा । पृथुः प्रचेता इव संवृतात्मा
04160111 दुरासदो दुर्विषह आसन्नोऽपि विदूरवत्
04160112 नैवाभिभवितुं शक्यो वेनारण्य-उत्थितोऽनलः
04160121 अन्तर्बहिश्च भूतानां पश्यन् कर्माणि चारणैः
04160122 उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम्
04160131 नादण्ड्यं दण्डयत्येष सुतम् आत्म-द्विषाम् अपि
04160132 दण्डयत्यात्मजम् अपि दण्ड्यं धर्म-पथे स्थितः
04160141 अस्याप्रतिहतं चक्रं पृथोरामानसाचलात्

04160142 वर्तते भगवान् अर्को यावत् तपति गो-गणैः
04160151 रञ्जयिष्यति यल् लोकम् अयम् आत्म-विचेष्टितैः
04160152 अथामुम् आहू राजानं मनो-रञ्जनकैः प्रजाः
04160161 दृढ-व्रतः सत्य-सन्धो ब्रह्मण्यो वृद्ध-सेवकः
04160162 शरण्यः सर्व-भूतानां मानदो दीन-वत्सलः
04160171 मातृ-भक्तिः पर-स्त्रीषु पत्न्याम् अर्ध इवात्मनः
04160172 प्रजासु पितृवत् स्निग्धः किङ्करो ब्रह्म-वादिनाम्
04160181 देहिनाम् आत्मवत्-प्रेष्ठः सुहृदां नन्दि-वर्धनः
04160182 मुक्त-सङ्ग-प्रसङ्गोऽयं दण्ड-पाणिरसाधुषु
04160191 अयं तु साक्षाद् भगवांस्त्र्य्-अधीशः ।कूट-स्थ आत्मा कलयावतीर्णः
04160192 यस्मिन्न् अविद्या-रचितं निरर्थकं ।पश्यन्ति नानात्वम् अपि प्रतीतम्
04160201 अयं भुवो मण्डलम् ओदयाद्रेर् ।गोप्तैक-वीरो नरदेव-नाथः
04160202 आस्थाय जैत्रं रथम् आत्त-चापः ।पर्यस्यते दक्षिणतो यथार्कः
04160211 अस्मै नृ-पालाः किल तत्र तत्र ।बलिं हरिष्यन्ति सलोक-पालाः
04160212 मंस्यन्त एषां स्त्रिय आदि-राजं ।चक्रायुधं तद्-यश उद्धरन्त्यः
04160221 अयं महीं गां दुदुहेऽधिराजः ।प्रजापतिर्वृत्ति-करः प्रजानाम्
04160222 यो लीलयाद्रीन् स्व-शरास-कोट्या ।भिन्दन् समां गाम् अकरोद् यथेन्द्रः
04160231 विस्फूर्जयन्न् आज-गवं धनुः स्वयं ।यदाचरत् क्ष्माम् अविषह्यम् आजौ
04160232 तदा निलिल्युर्दिशि दिश्यसन्तो ।लाङ्गूलम् उद्यम्य यथा मृगेन्द्रः
04160241 एषोऽश्वमेधा' शतम् आजहार ।सरस्वती प्रादुरभावि यत्र
04160242 अहार्षीद् यस्य हयं पुरन्दरः ।शत-क्रतुश्चरमे वर्तमाने
04160251 एष स्व-सद्मोपवने समेत्य ।सनत्-कुमारं भगवन्तम् एकम्
04160252 आराध्य भक्त्यालभतामलं तज् ।ज्ञानं यतो ब्रह्म परं विदन्ति
04160261 तत्र तत्र गिरस्तास्ता इति विश्रुत-विक्रमः
04160262 श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथु-पराक्रमः
04160271 दिशो विजित्याप्रतिरुद्ध-चक्रः ।स्व-तेजसोत्पाटित-लोक-शल्यः
04160272 सुरासुरेन्द्रैरुपगीयमान- ।महानुभावो भविता पतिर्भुवः

Chapter 17

0417001 मैत्रेय उवाच
04170011 एवं स भगवान् वैन्यः ख्यापितो गुण-कर्मभिः
04170012 छन्दयाम् आस तान् कामैः प्रतिपूज्याभिनन्द्य च
04170021 ब्राह्मण-प्रमुखान् वर्णान् भृत्यामात्य-पुरोधसः
04170022 पौरान् जान-पदान् श्रेणीः प्रकृतीः समपूजयत्
0417003 विदुर उवाच
04170031 कस्माद् दधार गो-रूपं धरित्री बहु-रूपिणी
04170032 यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किम्
04170041 प्रकृत्या विषमा देवी कृता तेन समा कथम्
04170042 तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत्
04170051 सनत्-कुमाराद् भगवतो ब्रह्मन् ब्रह्म-विद्-उत्तमात्
04170052 लब्ध्वा ज्ञानं स-विज्ञानं राजर्षिः कां गतिं गतः
04170061 यच् चान्यद् अपि कृष्णस्य भवान् भगवतः प्रभोः
04170062 श्रवः सुश्रवसः पुण्यं पूर्व-देह-कथाश्रयम्
04170071 भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च
04170072 वक्तुम् अर्हसि योऽदुह्यद् वैन्य-रूपेण गाम् इमाम्
0417008 सूत उवाच
04170081 चोदितो विदुरेणैवं वासुदेव-कथां प्रति
04170082 प्रशस्य तं प्रीत-मना मैत्रेयः प्रत्यभाषत
0417009 मैत्रेय उवाच
04170091 यदाभिषिक्तः पृथुरङ्ग विप्रैर् ।आमन्त्रितो जनतायाश्च पालः
04170092 प्रजा निरन्ने क्षिति-पृष्ठ एत्य ।क्षुत्-क्षाम-देहाः पतिम् अभ्यवोचन्
04170101 वयं राज' जाठरेणाभितप्ता ।यथाग्निना कोटर-स्थेन वृक्षाः
04170102 त्वाम् अद्य याताः शरणं शरण्यं ।यः साधितो वृत्ति-करः पतिर्नः
04170111 तन् नो भवान् ईहतु रातवेऽन्नं ।क्षुधार्दितानां नरदेव-देव
04170112 यावन् न नङ्क्ष्यामह उज्झितोर्जा ।वार्ता-पतिस्त्वं किल लोक-पालः
0417012 मैत्रेय उवाच
04170121 पृथुः प्रजानां करुणं निशम्य परिदेवितम्

04170122 दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत
04170131 इति व्यवसितो बुद्ध्या प्रगृहीत-शरासनः
04170132 सन्दधे विशिखं भूमेः क्रुद्धस्त्रिपुर-हा यथा
04170141 प्रवेपमाना धरणी निशाम्योदायुधं च तम्
04170142 गौः सत्यपाद्रवद् भीता मृगीव मृगयु-द्रुता
04170151 ताम् अन्वधावत् तद् वैन्यः कुपितोऽत्यरुणेक्षणः
04170152 शरं धनुषि सन्धाय यत्र यत्र पलायते
04170161 सा दिशो विदिशो देवी रोदसी चान्तरं तयोः
04170162 धावन्ती तत्र तत्रैनं ददर्शानूद्यतायुधम्
04170171 लोके नाविन्दत त्राणं वैन्यान् मृत्योरिव प्रजाः
04170172 त्रस्ता तदा निववृते हृदयेन विदूयता
04170181 उवाच च महा-भागं धर्म-ज्ञापन्न-वत्सल
04170182 त्राहि माम् अपि भूतानां पालनेऽवस्थितो भवान्
04170191 स त्वं जिघांससे कस्माद् दीनाम् अकृत-किल्बिषाम्
04170192 अहनिष्यत् कथं योषां धर्म-ज्ञ इति यो मतः
04170201 प्रहरन्ति न वै स्त्रीषु कृतागःस्वपि जन्तवः
04170202 किम् उत त्वद्-विधा राजन् करुणा दीन-वत्सलाः
04170211 मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितम्
04170212 आत्मानं च प्रजाश्चेमाः कथम् अम्भसि धास्यसि
0417022 पृथुरुवाच
04170221 वसुधे त्वां वधिष्यामि मच्-छासन-पराङ्-मुखीम्
04170222 भागं बर्हिषि या वृङ्क्ते न तनोति च नो वसु
04170231 यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः
04170232 तस्याम् एवं हि दुष्टायां दण्डो नात्र न शस्यते
04170241 त्वं खल्वोषधि-बीजानि प्राक् सृष्टानि स्वयम्भुवा
04170242 न मुञ्चस्यात्म-रुद्धानि माम् अवज्ञाय मन्द-धीः
04170251 अमूषां क्षुत्-परीतानाम् आर्तानां परिदेवितम्
04170252 शमयिष्यामि मद्-बाणैर्भिन्नायास्तव मेदसा
04170261 पुमान् योषिद् उत क्लीब आत्म-सम्भावनोऽधमः
04170262 भूतेषु निरनुक्रोशो नृपाणां तद्-वधोऽवधः
04170271 त्वां स्तब्धां दुर्मदां नीत्वा माया-गां तिलशः शरैः
04170272 आत्म-योग-बलेनेमा धारयिष्याम्यहं प्रजाः
04170281 एवं मन्युमयीं मूर्तिं कृतान्तम् इव बिभ्रतम्
04170282 प्रणता प्राञ्जलिः प्राह मही सञ्जात-वेपथुः
0417029 धरोवाच
04170291 नमः परस्मै पुरुषाय मायया । विन्यस्त-नाना-तनवे गुणात्मने
04170292 नमः स्वरूपानुभवेन निर्धुत- । द्रव्य-क्रिया-कारक-विभ्रमोर्मये
04170301 येनाहम् आत्मायतनं विनिर्मिता । धात्रा यतोऽयं गुण-सर्ग-सङ्ग्रहः
04170302 स एव मां हन्तुम् उदायुधः स्वराड् । उपस्थितोऽन्यं शरणं कम् आश्रये

04170311 य एतद् आदावसृजच् चराचरं ।स्व-माययात्माश्रययावितर्क्यया
04170312 तयैव सोऽयं किल गोप्तुम् उद्यतः ।कथं नु मां धर्म-परो जिघांसति
04170321 नूनं बतेशस्य समीहितं जनैस् ।तन्-मायया दुर्जययाकृतात्मभिः
04170322 न लक्ष्यते यस्त्वकरोद् अकारयद् ।योऽनेक एकः परतश्च ईश्वरः
04170331 सर्गादि योऽस्यानुरुणद्धि शक्तिभिर् ।द्रव्य-क्रिया-कारक-चेतनात्मभिः
04170332 तस्मै समुन्नद्ध-निरुद्ध-शक्तये ।नमः परस्मै पुरुषाय वेधसे
04170341 स वै भवान् आत्म-विनिर्मितं जगद् ।भूतेन्द्रियान्तः-करणात्मकं विभो
04170342 संस्थापयिष्यन्न् अज मां रसातलाद् ।अभ्युज्जहाराम्भस आदि-सूकरः
04170351 अपाम् उपस्थे मयि नाव्यवस्थिताः ।प्रजा भवान् अद्य रिरक्षिषुः किल
04170352 स वीर-मूर्तिः समभूद् धरा-धरो ।यो मां पयस्युग्र-शरो जिघांससि
04170361 नूनं जनैरीहितम् ईश्वराणाम् ।अस्मद्-विधैस्तद्-गुण-सर्ग-मायया
04170362 न ज्ञायते मोहित-चित्त-वर्त्मभिस् ।तेभ्यो नमो वीर-यशस्-करेभ्यः

Chapter 18

0418001 मैत्रेय उवाच
04180011 इत्थं पृथुम् अभिष्टूय रुषा प्रस्फुरिताधरम्
04180012 पुनराहावनिर्भीता संस्तभ्यात्मानम् आत्मना
04180021 सन्नियच्छाभिभो मन्युं निबोध श्रावितं च मे
04180022 सर्वतः सारम् आदत्ते यथा मधु-करो बुधः
04180031 अस्मिन् लोकेऽथवामुष्मिन् मुनिभिस्तत्त्व-दर्शिभिः
04180032 दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः-प्रसिद्धये
04180041 तान् आतिष्ठति यः सम्यग् उपायान् पूर्व-दर्शितान्
04180042 अवरः श्रद्धयोपेत उपेयान् विन्दतेऽञ्जसा
04180051 तान् अनादृत्य योऽविद्वान् अर्थान् आरभते स्वयम्
04180052 तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः
04180061 पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशाम्पते
04180062 भुज्यमाना मया दृष्टा असद्भिरधृत-व्रतैः
04180071 अपालितानादृता च भवद्भिर्लोक-पालकैः
04180072 चोरी-भूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसम् ओषधीः
04180081 नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा
04180082 तत्र योगेन दृष्टेन भवान् आदातुम् अर्हति
04180091 वत्सं कल्पय मे वीर येनाहं वत्सला तव
04180092 धोक्ष्ये क्षीरमयान् कामान् अनुरूपं च दोहनम्
04180101 दोग्धारं च महा-बाहो भूतानां भूत-भावन
04180102 अन्नम् ईप्सितम् ऊर्जस्वद् भगवान् वाञ्छते यदि
04180111 समां च कुरु मां राजन् देव-वृष्टं यथा पयः
04180112 अपर्तावपि भद्रं ते उपावर्तेत मे विभो
04180121 इति प्रियं हितं वाक्यं भुव आदाय भूपतिः
04180122 वत्सं कृत्वा मनुं पाणावदुहत् सकलौषधीः
04180131 तथापरे च सर्वत्र सारम् आददते बुधाः
04180132 ततोऽन्ये च यथा-कामं दुदुहुः पृथु-भाविताम्
04180141 ऋषयो दुदुहुर्देवीम् इन्द्रियेष्वथ सत्तम

04180142 वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि
04180151 कृत्वा वत्सं सुर-गणा इन्द्रं सोमम् अदूदुहन्
04180152 हिरण्मयेन पात्रेण वीर्यम् ओजो बलं पयः
04180161 दैतेया दानवा वत्सं प्रह्लादम् असुरर्षभम्
04180162 विधायादूदुहन् क्षीरम् अयः-पात्रे सुरासवम्
04180171 गन्धर्वाप्सरसोऽधुक्षन् पात्रे पद्ममये पयः
04180172 वत्सं विश्वावसुं कृत्वा गान्धर्वं मधु सौभगम्
04180181 वत्सेन पितरोऽर्यम्णा कव्यं क्षीरम् अधुक्षत
04180182 आम-पात्रे महा-भागाः श्रद्धया श्राद्ध-देवताः
04180191 प्रकल्प्य वत्सं कपिलं सिद्धाः सङ्कल्पनामयीम्
04180192 सिद्धिं नभसि विद्यां च ये च विद्याधरादयः
04180201 अन्ये च मायिनो मायाम् अन्तर्धानाद्भुतात्मनाम्
04180202 मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम्
04180211 यक्ष-रक्षांसि भूतानि पिशाचाः पिशिताशनाः
04180212 भूतेश-वत्सा दुदुहुः कपाले क्षतजासवम्
04180221 तथाहयो दन्दशूकाः सर्पा नागाश्च तक्षकम्
04180222 विधाय वत्सं दुदुहुर्बिल-पात्रे विषं पयः
04180231 पशवो यवसं क्षीरं वत्सं कृत्वा च गो-वृषम्
04180232 अरण्य-पात्रे चाधुक्षन् मृगेन्द्रेण च दंष्ट्रिणः
04180241 क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे
04180242 सुपर्ण-वत्सा विहगाश्चरं चाचरम् एव च
04180251 वट-वत्सा वनस्पतयः पृथग् रसमयं पयः
04180252 गिरयो हिमवद्-वत्सा नाना-धातून् स्व-सानुषु
04180261 सर्वे स्व-मुख्य-वत्सेन स्वे स्वे पात्रे पृथक् पयः
04180262 सर्व-काम-दुघां पृथ्वीं दुदुहुः पृथु-भाविताम्
04180271 एवं पृथ्व्-आदयः पृथ्वीम् अन्नादाः स्वन्नम् आत्मनः
04180272 दोह-वत्सादि-भेदेन क्षीर-भेदं कुरूद्वह
04180281 ततो महीपतिः प्रीतः सर्व-काम-दुघां पृथुः
04180282 दुहितृत्वे चकारेमां प्रेम्णा दुहितृ-वत्सलः
04180291 चूर्णयन् स्व-धनुष्-कोट्या गिरि-कूटानि राज-राट्
04180292 भू-मण्डलम् इदं वैन्यः प्रायश्चक्रे समं विभुः
04180301 अथास्मिन् भगवान् वैन्यः प्रजानां वृत्तिदः पिता
04180302 निवासान् कल्पयां चक्रे तत्र तत्र यथार्हतः
04180311 ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च
04180312 घोषान् व्रजान् स-शिबिरान् आकरान् खेट-खर्वटान्
04180321 प्राक् पृथोरिह नैवैषा पुर-ग्रामादि-कल्पना
04180322 यथा-सुखं वसन्ति स्म तत्र तत्राकुतोभयाः

Chapter 19

0419001 मैत्रेय उवाच
04190011 अथादीक्षत राजा तु हयमेध-शतेन सः
04190012 ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती
04190021 तद् अभिप्रेत्य भगवान् कर्मातिशयम् आत्मनः
04190022 शत-क्रतुर्न ममृषे पृथोर्यज्ञ-महोत्सवम्
04190031 यत्र यज्ञ-पतिः साक्षाद् भगवान् हरिरीश्वरः
04190032 अन्वभूयत सर्वात्मा सर्व-लोक-गुरुः प्रभुः
04190041 अन्वितो ब्रह्म-शर्वाभ्यां लोक-पालैः सहानुगैः
04190042 उपगीयमानो गन्धर्वैर्मुनिभिश्चाप्सरो-गणैः
04190051 सिद्धा विद्याधरा दैत्या दानवा गुह्यकादयः
04190052 सुनन्द-नन्द-प्रमुखाः पार्षद-प्रवरा हरेः
04190061 कपिलो नारदो दत्तो योगेशाः सनकादयः
04190062 तम् अन्वीयुर्भागवता ये च तत्-सेवनोत्सुकाः
04190071 यत्र धर्म-दुघा भूमिः सर्व-काम-दुघा सती
04190072 दोग्धि स्माभीप्सितान् अर्थान् यजमानस्य भारत
04190081 ऊहुः सर्व-रसान् नद्यः क्षीर-दध्य्-अन्न-गो-रसान्
04190082 तरवो भूरि-वर्ष्माणः प्रासूयन्त मधु-च्युतः
04190091 सिन्धवो रत्न-निकरान् गिरयोऽन्नं चतुर्-विधम्
04190092 उपायनम् उपाजह्रुः सर्वे लोकाः स-पालकाः
04190101 इति चाधोक्षजेशस्य पृथोस्तु परमोदयम्
04190102 असूयन् भगवान् इन्द्रः प्रतिघातम् अचीकरत्
04190111 चरमेणाश्वमेधेन यजमाने यजुष्-पतिम्
04190112 वैन्ये यज्ञ-पशुं स्पर्धन्न् अपोवाह तिरोहितः
04190121 तम् अत्रिर्भगवान् ऐक्षत् त्वरमाणं विहायसा
04190122 आमुक्तम् इव पाखण्डं योऽधर्मे धर्म-विभ्रमः
04190131 अत्रिणा चोदितो हन्तुं पृथु-पुत्रो महा-रथः
04190132 अन्वधावत सङ्क्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत्
04190141 तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणम्

04190142 जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुञ्चति
04190151 वधान् निवृत्तं तं भूयो हन्तवेऽत्रिरचोदयत्
04190152 जहि यज्ञ-हनं तात महेन्द्रं विबुधाधमम्
04190161 एवं वैन्य-सुतः प्रोक्तस्त्वरमाणं विहायसा
04190162 अन्वद्रवद् अभिक्रुद्धो रावणं गृध्र-राड् इव
04190171 सोऽश्वं रूपं च तद् धित्वा तस्मा अन्तर्हितः स्वराट्
04190172 वीरः स्व-पशुम् आदाय पितुर्यज्ञम् उपेयिवान्
04190181 तत् तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः
04190182 नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो
04190191 उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः
04190192 चषाल-यूपतश्छन्नो हिरण्य-रशनं विभुः
04190201 अत्रिः सन्दर्शयाम् आस त्वरमाणं विहायसा
04190202 कपाल-खट्वाङ्ग-धरं वीरो नैनम् अबाधत
04190211 अत्रिणा चोदितस्तस्मै सन्दधे विशिखं रुषा
04190212 सोऽश्वं रूपं च तद् धित्वा तस्थावन्तर्हितः स्वराट्
04190221 वीरश्चाश्वम् उपादाय पितृ-यज्ञम् अथाव्रजत्
04190222 तद् अवद्यं हरे रूपं जगृहुर्ज्ञान-दुर्बलाः
04190231 यानि रूपाणि जगृहे इन्द्रो हय-जिहीर्षया
04190232 तानि पापस्य खण्डानि लिङ्गं खण्डम् इहोच्यते
04190241 एवम् इन्द्रे हरत्यश्वं वैन्य-यज्ञ-जिघांसया
04190242 तद्-गृहीत-विसृष्टेषु पाखण्डेषु मतिर्नृणाम्
04190251 धर्म इत्युपधर्मेषु नग्न-रक्त-पटादिषु
04190252 प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु
04190261 तद् अभिज्ञाय भगवान् पृथुः पृथु-पराक्रमः
04190262 इन्द्राय कुपितो बाणम् आदत्तोद्यत-कार्मुकः
04190271 तम् ऋत्विजः शक्र-वधाभिसन्धितं ।विचक्ष्य दुष्प्रेक्ष्यम् असह्य-रंहसम्
04190272 निवारयाम् आसुरहो महा-मते ।न युज्यतेऽत्रान्य-वधः प्रचोदितात्
04190281 वयं मरुत्वन्तम् इहार्थ-नाशनं ।ह्वयामहे त्वच्-छ्रवसा हत-त्विषम्
04190282 अयातयामोपहवैरनन्तरं ।प्रसह्य राजन् जुहवाम तेऽहितम्
04190291 इत्यामन्त्र्य क्रतु-पतिं विदुरास्यर्त्विजो रुषा
04190292 स्रुग्-घस्तान् जुह्वतोऽभ्येत्य स्वयम्भूः प्रत्यषेधत
04190301 न वध्यो भवताम् इन्द्रो यद् यज्ञो भगवत्-तनुः
04190302 यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः
04190311 तद् इदं पश्यत महद्- धर्म-व्यतिकरं द्विजाः
04190312 इन्द्रेणानुष्ठितं राज्ञः कर्मैतद् विजिघांसता
04190321 पृथु-कीर्तेः पृथोर्भूयात् तर्ह्येकोन-शत-क्रतुः
04190322 अलं ते क्रतुभिः स्विष्टैर्यद् भवान् मोक्ष-धर्म-वित्
04190331 नैवात्मने महेन्द्राय रोषम् आहर्तुम् अर्हसि
04190332 उभावपि हि भद्रं ते उत्तमश्लोक-विग्रहौ
04190341 मास्मिन् महाराज कृथाः स्म चिन्तां ।निशामयास्मद्-वच आदृतात्मा

04190342 यद् ध्यायतो दैव-हतं नु कर्तुं ।मनोऽतिरुष्टं विशते तमोऽन्धम्
04190351 क्रतुर्विरमताम् एष देवेषु दुरवग्रहः
04190352 धर्म-व्यतिकरो यत्र पाखण्डैरिन्द्र-निर्मितैः
04190361 एभिरिन्द्रोपसंसृष्टैः पाखण्डैर्हारिभिर्जनम्
04190362 ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञ-ध्रुग् अश्व-मुट्
04190371 भवान् परित्रातुम् इहावतीर्णो ।धर्मं जनानां समयानुरूपम्
04190372 वेनापचाराद् अवलुप्तम् अद्य ।तद्-देहतो विष्णु-कलासि वैन्य
04190381 स त्वं विमृश्यास्य भवं प्रजापते ।सङ्कल्पनं विश्व-सृजां पिपीपृहि
04190382 ऐन्द्रीं च मायाम् उपधर्म-मातरं ।प्रचण्ड-पाखण्ड-पथं प्रभो जहि
0419039 मैत्रेय उवाच
04190391 इत्थं स लोक-गुरुणा समादिष्टो विशाम्पतिः
04190392 तथा च कृत्वा वात्सल्यं मघोनापि च सन्दधे
04190401 कृतावभृथ-स्नानाय पृथवे भूरि-कर्मणे
04190402 वरान् ददुस्ते वरदा ये तद्-बर्हिषि तर्पिताः
04190411 विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्ध-दक्षिणाः
04190412 आशिषो युयुजुः क्षत्तरादि-राजाय सत्-कृताः
04190421 त्वयाहूता महा-बाहो सर्व एव समागताः
04190422 पूजिता दान-मानाभ्यां पितृ-देवर्षि-मानवाः

Chapter 20

0420001 मैत्रेय उवाच
04200011 भगवान् अपि वैकुण्ठः साकं मघवता विभुः
04200012 यज्ञैर्यज्ञ-पतिस्तुष्टो यज्ञ-भुक् तम् अभाषत
0420002 श्री-भगवान् उवाच
04200021 एष तेऽकार्षीद् भङ्गं हय-मेध-शतस्य ह
04200022 क्षमापयत आत्मानम् अमुष्य क्षन्तुम् अर्हसि
04200031 सुधियः साधवो लोके नरदेव नरोत्तमाः
04200032 नाभिद्रुह्यन्ति भूतेभ्यो यर्हि नात्मा कलेवरम्
04200041 पुरुषा यदि मुह्यन्ति त्वादृशा देव-मायया
04200042 श्रम एव परं जातो दीर्घया वृद्ध-सेवया
04200051 अतः कायम् इमं विद्वान् अविद्या-काम-कर्मभिः
04200052 आरब्ध इति नैवास्मिन् प्रतिबुद्धोऽनुषज्जते
04200061 असंसक्तः शरीरेऽस्मिन्न् अमुनोत्पादिते गृहे
04200062 अपत्ये द्रविणे वापि कः कुर्यान् ममतां बुधः
04200071 एकः शुद्धः स्वयं-ज्योतिर्निर्गुणोऽसौ गुणाश्रयः
04200072 सर्व-गोऽनावृतः साक्षी निरात्मात्मात्मनः परः
04200081 य एवं सन्तम् आत्मानम् आत्म-स्थं वेद पूरुषः
04200082 नाज्यते प्रकृति-स्थोऽपि तद्-गुणैः स मयि स्थितः
04200091 यः स्व-धर्मेण मां नित्यं निराशीः श्रद्धयान्वितः
04200092 भजते शनकैस्तस्य मनो राजन् प्रसीदति
04200101 परित्यक्त-गुणः सम्यग् दर्शनो विशदाशयः
04200102 शान्तिं मे समवस्थानं ब्रह्म कैवल्यम् अश्नुते
04200111 उदासीनम् इवाध्यक्षं द्रव्य-ज्ञान-क्रियात्मनाम्
04200112 कूट-स्थम् इमम् आत्मानं यो वेदाप्नोति शोभनम्
04200121 भिन्नस्य लिङ्गस्य गुण-प्रवाहो ।द्रव्य-क्रिया-कारक-चेतनात्मनः
04200122 दृष्टासु सम्पत्सु विपत्सु सूरयो ।न विक्रियन्ते मयि बद्ध-सौहृदाः
04200131 समः समानोत्तम-मध्यमाधमः ।सुखे च दुःखे च जितेन्द्रियाशयः
04200132 मयोपक्लृप्ताखिल-लोक-संयुतो ।विधत्स्व वीराखिल-लोक-रक्षणम्

04200141 श्रेयः प्रजा-पालनम् एव राज्ञो । यत् साम्पराये सुकृतात् षष्ठम् अंशम्
04200142 हर्तान्यथा हृत-पुण्यः प्रजानाम् । अरक्षिता कर-हारोऽघम् अत्ति
04200151 एवं द्विजाग्र्यानुमतानुवृत्त- । धर्म-प्रधानोऽन्यतमोऽवितास्याः
04200152 ह्रस्वेन कालेन गृहोपयातान् । द्रष्टासि सिद्धान् अनुरक्त-लोकः
04200161 वरं च मत् कञ्चन मानवेन्द्र । वृणीष्व तेऽहं गुण-शील-यन्त्रितः
04200162 नाहं मखैर्वै सुलभस्तपोभिर् । योगेन वा यत् सम-चित्त-वर्ती
0420017 मैत्रेय उवाच
04200171 स इत्थं लोक-गुरुणा विष्वक्सेनेन विश्व-जित्
04200172 अनुशासित आदेशं शिरसा जगृहे हरेः
04200181 स्पृशन्तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा
04200182 शत-क्रतुं परिष्वज्य विद्वेषं विससर्ज ह
04200191 भगवान् अथ विश्वात्मा पृथुनोपहृतार्हणः
04200192 समुज्जिहानया भक्त्या गृहीत-चरणाम्बुजः
04200201 प्रस्थानाभिमुखोऽप्येनम् अनुग्रह-विलम्बितः
04200202 पश्यन् पद्म-पलाशाक्षो न प्रतस्थे सुहृत् सताम्
04200211 स आदि-राजो रचिताञ्जलिर्हरिं । विलोकितुं नाशकद् अश्रु-लोचनः
04200212 न किञ्चनोवाच स बाष्प-विक्लवो । हृदोपगुह्यामुम् अधाद् अवस्थितः
04200221 अथावमृज्याश्रु-कला विलोकयन्न् । अतृप्त-दृग्-गोचरम् आह पूरुषम्
04200222 पदा स्पृशन्तं क्षितिम् अंस उन्नते । विन्यस्त-हस्ताग्रम् उरङ्ग-विद्विषः
0420023 पृथुरुवाच
04200231 वरान् विभो त्वद् वरदेश्वराद् बुधः । कथं वृणीते गुण-विक्रियात्मनाम्
04200232 ये नारकाणाम् अपि सन्ति देहिनां । तान् ईश कैवल्य-पते वृणे न च
04200241 न कामये नाथ तद् अप्यहं क्वचिन् । न यत्र युष्मच्-चरणाम्बुजासवः
04200242 महत्तमान्तर्-हृदयान् मुख-च्युतो । विधत्स्व कर्णायुतम् एष मे वरः
04200251 स उत्तमश्लोक महन्-मुख-च्युतो । भवत्-पदाम्भोज-सुधा कणानिलः
04200252 स्मृतिं पुनर्विस्मृत-तत्त्व-वर्त्मनां । कुयोगिनां नो वितरत्यलं वरैः
04200261 यशः शिवं सुश्रव आर्य-सङ्गमे । यदृच्छया चोपशृणोति ते सकृत्
04200262 कथं गुण-ज्ञो विरमेद् विना पशुं । श्रीर्यत् प्रवव्रे गुण-सङ्ग्रहेच्छया
04200271 अथाभजे त्वाखिल-पूरुषोत्तमं । गुणालयं पद्म-करेव लालसः
04200272 अप्यावयोरेक-पति-स्पृधोः कलिर् । न स्यात् कृत-त्वच्-चरणैक-तानयोः
04200281 जगज्-जनन्यां जगद्-ईश वैशसं । स्याद् एव यत्-कर्मणि नः समीहितम्
04200282 करोषि फल्ग्वप्युरु दीन-वत्सलः । स्व एव धिष्ण्येऽभिरतस्य किं तया
04200291 भजन्त्यथ त्वाम् अत एव साधवो । व्युदस्त-माया-गुण-विभ्रमोदयम्
04200292 भवत्-पदानुस्मरणाद् ऋते सतां । निमित्तम् अन्यद् भगवन् न विद्महे
04200301 मन्ये गिरं ते जगतां विमोहिनीं । वरं वृणीष्वेति भजन्तम् आत्थ यत्
04200302 वाचा नु तन्त्या यदि ते जनोऽसितः । कथं पुनः कर्म करोति मोहितः
04200311 त्वन्-माययाद्धा जन ईश खण्डितो । यद् अन्यद् आशास्त ऋतात्मनोऽबुधः
04200312 यथा चरेद् बाल-हितं पिता स्वयं । तथा त्वम् एवार्हसि नः समीहितुम्

0420032 मैत्रेय उवाच
04200321 इत्यादि-राजेन नुतः स विश्व-दृक् ।तम् आह राजन् मयि भक्तिरस्तु ते
04200322 दिष्ट्येदृशी धीर्मयि ते कृता यया ।मायां मदीयां तरति स्म दुस्त्यजाम्
04200331 तत् त्वं कुरु मयादिष्टम् अप्रमत्तः प्रजापते
04200332 मद्-आदेश-करो लोकः सर्वत्राप्नोति शोभनम्
0420034 मैत्रेय उवाच
04200341 इति वैन्यस्य राजर्षेः प्रतिनन्द्यार्थवद् वचः
04200342 पूजितोऽनुगृहीत्वैनं गन्तुं चक्रे ऽच्युतो मतिम्
04200351 देवर्षि-पितृ-गन्धर्व- सिद्ध-चारण-पन्नगाः
04200352 किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः
04200361 यज्ञेश्वर-धिया राज्ञा वाग्-वित्ताञ्जलि-भक्तितः
04200362 सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः
04200371 भगवान् अपि राजर्षेः सोपाध्यायस्य चाच्युतः
04200372 हरन्न् इव मनोऽमुष्य स्व-धाम प्रत्यपद्यत
04200381 अदृष्टाय नमस्कृत्य नृपः सन्दर्शितात्मने
04200382 अव्यक्ताय च देवानां देवाय स्व-पुरं ययौ

Chapter 21

0421001 मैत्रेय उवाच
04210011 मौक्तिकैः कुसुम-स्रग्भिर्दुकूलैः स्वर्ण-तोरणैः
04210012 महा-सुरभिभिर्धूपैर्मण्डितं तत्र तत्र वै
04210021 चन्दनागुरु-तोयार्द्र- रथ्या-चत्वर-मार्गवत्
04210022 पुष्पाक्षत-फलैस्तोक्मैर्लाजैरर्चिर्भिरर्चितम्
04210031 सवृन्दैः कदली-स्तम्भैः पूग-पोतैः परिष्कृतम्
04210032 तरु-पल्लव-मालाभिः सर्वतः समलङ्कृतम्
04210041 प्रजास्तं दीप-बलिभिः सम्भृताशेष-मङ्गलैः
04210042 अभीयुर्मृष्ट-कन्याश्च मृष्ट-कुण्डल-मण्डिताः
04210051 शङ्ख-दुन्दुभि-घोषेण ब्रह्म-घोषेण चर्त्विजाम्
04210052 विवेश भवनं वीरः स्तूयमानो गत-स्मयः
04210061 पूजितः पूजयाम् आस तत्र तत्र महा-यशाः
04210062 पौरा' जानपदांस्तांस्तान् प्रीतः प्रिय-वर-प्रदः
04210071 स एवम् आदीन्यनवद्य-चेष्टितः । कर्माणि भूयांसि महान् महत्तमः
04210072 कुर्वन् शशासावनि-मण्डलं यशः । स्फीतं निधायारुरुहे परं पदम्
0421008 सूत उवाच
04210081 तद् आदि-राजस्य यशो विजृम्भितं । गुणैरशेषैर्गुणवत्-सभाजितम्
04210082 क्षत्ता महा-भागवतः सदस्पते । कौषारविं प्राह गृणन्तम् अर्चयन्
0421009 विदुर उवाच
04210091 सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेष-सुरार्हणः
04210092 बिभ्रत् स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम्
04210101 को न्वस्य कीर्तिं न शृणोत्यभिज्ञो । यद्-विक्रमोच्छिष्टम् अशेष-भूपाः
04210102 लोकाः स-पाला उपजीवन्ति कामम् । अद्यापि तन् मे वद कर्म शुद्धम्
0421011 मैत्रेय उवाच
04210111 गङ्गा-यमुनयोर्नद्योरन्तरा क्षेत्रम् आवसन्
04210112 आरब्धान् एव बुभुजे भोगान् पुण्य-जिहासया
04210121 सर्वत्रास्खलितादेशः सप्त-द्वीपैक-दण्ड-धृक्
04210122 अन्यत्र ब्राह्मण-कुलाद् अन्यत्राच्युत-गोत्रतः

04210131 एकदासीन् महा-सत्र- दीक्षा तत्र दिवौकसाम्
04210132 समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम
04210141 तस्मिन्न् अर्हत्सु सर्वेषु स्व्-अर्चितेषु यथार्हतः
04210142 उत्थितः सदसो मध्ये ताराणाम् उडुराड् इव
04210151 प्रांशुः पीनायत-भुजो गौरः कञ्जारुणेक्षणः
04210152 सुनासः सुमुखः सौम्यः पीनांसः सुद्विज-स्मितः
04210161 व्यूढ-वक्षा बृहच्-छ्रोणिर्वलि-वल्गु-दलोदरः
04210162 आवर्त-नाभिरोजस्वी काञ्चनोरुरुदग्र-पात्
04210171 सूक्ष्म-वक्रासित-स्निग्ध- मूर्धजः कम्बु-कन्धरः
04210172 महा-धने दुकूलाग्र्ये परिधायोपवीय च
04210181 व्यञ्जिताशेष-गात्र-श्रीर्नियमे न्यस्त-भूषणः
04210182 कृष्णाजिन-धरः श्रीमान् कुश-पाणिः कृतोचितः
04210191 शिशिर-स्निग्ध-ताराक्षः समैक्षत समन्ततः
04210192 ऊचिवान् इदम् उर्वीशः सदः संहर्षयन्न् इव
04210201 चारु चित्र-पदं श्लक्ष्णं मृष्टं गूढम् अविक्लवम्
04210202 सर्वेषाम् उपकारार्थं तदा अनुवदन्न् इव
0421021 राजोवाच
04210211 सभ्याः शृणुत भद्रं वः साधवो य इहागताः
04210212 सत्सु जिज्ञासुभिर्धर्मम् आवेद्यं स्व-मनीषितम्
04210221 अहं दण्ड-धरो राजा प्रजानाम् इह योजितः
04210222 रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक्
04210231 तस्य मे तद्-अनुष्ठानाद् यान् आहुर्ब्रह्म-वादिनः
04210232 लोकाः स्युः काम-सन्दोहा यस्य तुष्यति दिष्ट-दृक्
04210241 य उद्धरेत् करं राजा प्रजा धर्मेष्वशिक्षयन्
04210242 प्रजानां शमलं भुङ्क्ते भगं च स्वं जहाति सः
04210251 तत् प्रजा भर्तृ-पिण्डार्थं स्वार्थम् एवानसूयवः
04210252 कुरुताधोक्षज-धियस्तर्हि मेऽनुग्रहः कृतः
04210261 यूयं तद् अनुमोदध्वं पितृ-देवर्षयोऽमलाः
04210262 कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत् प्रेत्य तत् फलम्
04210271 अस्ति यज्ञ-पतिर्नाम केषाञ्चिद् अर्ह-सत्तमाः
04210272 इहामुत्र च लक्ष्यन्ते ज्योत्स्नावत्यः क्वचिद् भुवः
04210281 मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः
04210282 प्रियव्रतस्य राजर्षेरङ्गस्यास्मत्-पितुः पितुः
04210291 ईदृशानाम् अथान्येषाम् अजस्य च भवस्य च
04210292 प्रह्लादस्य बलेश्चापि कृत्यम् अस्ति गदाभृता
04210301 दौहित्रादीन् ऋते मृत्योः शोच्यान् धर्म-विमोहितान्
04210302 वर्ग-स्वर्गापवर्गाणां प्रायेणैकात्म्य-हेतुना
04210311 यत्-पाद-सेवाभिरुचिस्तपस्विनाम् । अशेष-जन्मोपचितं मलं धियः
04210312 सद्यः क्षिणोत्यन्वहम् एधती सती । यथा पदाङ्गुष्ठ-विनिःसृता सरित्

04210321 विनिर्धुताशेष-मनो-मलः पुमान् । असङ्ग-विज्ञान-विशेष-वीर्यवान्
04210322 यद्-अङ्घ्रि-मूले कृत-केतनः पुनर् । न संसृतिं क्लेश-वहां प्रपद्यते
04210331 तम् एव यूयं भजतात्म-वृत्तिभिर् । मनो-वचः-काय-गुणैः स्व-कर्मभिः
04210332 अमायिनः काम-दुघाङ्घ्रि-पङ्कजं । यथाधिकारावसितार्थ-सिद्धयः
04210341 असाविहानेक-गुणोऽगुणोऽध्वरः । पृथग्-विध-द्रव्य-गुण-क्रियोक्तिभिः
04210342 सम्पद्यतेऽर्थाशय-लिङ्ग-नामभिर् । विशुद्ध-विज्ञान-घनः स्वरूपतः
04210351 प्रधान-कालाशय-धर्म-सङ्ग्रहे । शरीर एष प्रतिपद्य चेतनाम्
04210352 क्रिया-फलत्वेन विभुर्विभाव्यते । यथानलो दारुषु तद्-गुणात्मकः
04210361 अहो ममामी वितरन्त्यनुग्रहं । हरिं गुरुं यज्ञ-भुजाम् अधीश्वरम्
04210362 स्व-धर्म-योगेन यजन्ति मामका । निरन्तरं क्षोणि-तले दृढ-व्रताः
04210371 मा जातु तेजः प्रभवेन् महर्द्धिभिस् । तितिक्षया तपसा विद्यया च
04210372 देदीप्यमाने ज्ञित-देवतानां । कुले स्वयं राज-कुलाद् द्विजानाम्
04210381 ब्रह्मण्य-देवः पुरुषः पुरातनो । नित्यं हरिर्यच्-चरणाभिवन्दनात्
04210382 अवाप लक्ष्मीम् अनपायिनीं यशो । जगत्-पवित्रं च महत्तमाग्रणीः
04210391 यत्-सेवयाशेष-गुहाशयः स्व-राड् । विप्र-प्रियस्तुष्यति कामम् ईश्वरः
04210392 तद् एव तद्-धर्म-परैर्विनीतैः । सर्वात्मना ब्रह्म-कुलं निषेव्यताम्
04210401 पुमान् लभेताननतिवेलम् आत्मनः । प्रसीदतोऽत्यन्त-शमं स्वतः स्वयम्
04210402 यन्-नित्य-सम्बन्ध-निषेवया ततः । परं किम् अत्रास्ति मुखं हविर्-भुजाम्
04210411 अश्नात्यनन्तः खलु तत्त्व-कोविदैः । श्रद्धा-हुतं यन्-मुख इज्य-नामभिः
04210412 न वै तथा चेतनया बहिष्-कृते । हुताशने पारमहंस्य-पर्यगुः
04210421 यद् ब्रह्म नित्यं विरजं सनातनं । श्रद्धा-तपो-मङ्गल-मौन-संयमैः
04210422 समाधिना बिभ्रति हार्थ-दृष्टये । यत्रेदम् आदर्श इवावभासते
04210431 तेषाम् अहं पाद-सरोज-रेणुम् । आर्या वहेयाधि-किरीटम् आयुः
04210432 यं नित्यदा बिभ्रत आशु पापं । नश्यत्यमुं सर्व-गुणा भजन्ति
04210441 गुणायनं शील-धनं कृत-ज्ञं । वृद्धाश्रयं संवृणतेऽनु सम्पदः
04210442 प्रसीदतां ब्रह्म-कुलं गवां च । जनार्दनः सानुचरश्च मह्यम्
0421045 मैत्रेय उवाच
04210461 इति ब्रुवाणं नृपतिं पितृ-देव-द्विजातयः
04210462 तुष्टुवुर्हृष्ट-मनसः साधु-वादेन साधवः
04210471 पुत्रेण जयते लोकान् इति सत्यवती श्रुतिः
04210472 ब्रह्म-दण्ड-हतः पापो यद् वेनोऽत्यतरत् तमः
04210481 हिरण्यकशिपुश्चापि भगवन्-निन्दया तमः
04210482 विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः
04210491 वीर-वर्य पितः पृथ्व्याः समाः सञ्जीव शाश्वतीः
04210492 यस्येदृश्यच्युते भक्तिः सर्व-लोकैक-भर्तरि
04210501 अहो वयं ह्यद्य पवित्र-कीर्ते । त्वयैव नाथेन मुकुन्द-नाथाः
04210502 य उत्तमश्लोकतमस्य विष्णोर् । ब्रह्मण्य-देवस्य कथां व्यनक्ति
04210511 नात्यद्भुतम् इदं नाथ तवाजीव्यानुशासनम्

04210512 प्रजानुरागो महतां प्रकृतिः करुणात्मनाम्
04210521 अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो
04210522 भ्राम्यतां नष्ट-दृष्टीनां कर्मभिर्दैव-संज्ञितैः
04210531 नमो विवृद्ध-सत्त्वाय पुरुषाय महीयसे
04210532 यो ब्रह्म क्षत्रम् आविश्य बिभर्तीदं स्व-तेजसा

Chapter 22

0422001 मैत्रेय उवाच
04220011 जनेषु प्रगृणत्स्वेवं पृथुं पृथुल-विक्रमम्
04220012 तत्रोपजग्मुर्मुनयश्चत्वारः सूर्य-वर्चसः
04220021 तांस्तु सिद्धेश्वरान् राजा व्योम्नोऽवतरतोऽर्चिषा
04220022 लोकान् अपापान् कुर्वाणान् सानुगो चष्ट लक्षितान्
04220031 तद्-दर्शनोद्गतान् प्राणान् प्रत्यादित्सुरिवोत्थितः
04220032 स-सदस्यानुगो वैन्य इन्द्रियेशो गुणान् इव
04220041 गौरवाद् यन्त्रितः सभ्यः प्रश्रयानत-कन्धरः
04220042 विधिवत् पूजयां चक्रे गृहीताध्यर्हणासनान्
04220051 तत्-पाद-शौच-सलिलैर्मार्जितालक-बन्धनः
04220052 तत्र शीलवतां वृत्तम् आचरन् मानयन्न् इव
04220061 हाटकासन आसीनान् स्व-धिष्ण्येष्विव पावकान्
04220062 श्रद्धा-संयम-संयुक्तः प्रीतः प्राह भवाग्रजान्
0422007 पृथुरुवाच
04220071 अहो आचरितं किं मे मङ्गलं मङ्गलायनाः
04220072 यस्य वो दर्शनं ह्यासीद् दुर्दर्शानां च योगिभिः
04220081 किं तस्य दुर्लभतरम् इह लोके परत्र च
04220082 यस्य विप्राः प्रसीदन्ति शिवो विष्णुश्च सानुगः
04220091 नैव लक्षयते लोको लोकान् पर्यटतोऽपि यान्
04220092 यथा सर्व-दृशं सर्व आत्मानं येऽस्य हेतवः
04220101 अधना अपि ते धन्याः साधवो गृह-मेधिनः
04220102 यद्-गृहा ह्यर्ह-वर्याम्बु- तृण-भूमीश्वरावराः
04220111 व्यालालय-द्रुमा वै तेष्वरिक्ताखिल-सम्पदः
04220112 यद्-गृहास्तीर्थ-पादीय- पादतीर्थ-विवर्जिताः
04220121 स्वागतं वो द्विज-श्रेष्ठा यद्-व्रतानि मुमुक्षवः
04220122 चरन्ति श्रद्धया धीरा बाला एव बृहन्ति च
04220131 कच्चिन् नः कुशलं नाथा इन्द्रियार्थार्थ-वेदिनाम्
04220132 व्यसनावाप एतस्मिन् पतितानां स्व-कर्मभिः

04220141 भवत्सु कुशल-प्रश्न आत्मारामेषु नेष्यते
04220142 कुशलाकुशला यत्र न सन्ति मति-वृत्तयः
04220151 तद् अहं कृत-विश्रम्भः सुहृदो वस्तपस्विनाम्
04220152 सम्पृच्छे भव एतस्मिन् क्षेमः केनाञ्जसा भवेत्
04220161 व्यक्तम् आत्मवताम् आत्मा भगवान् आत्म-भावनः
04220162 स्वानाम् अनुग्रहायेमां सिद्ध-रूपी चरत्यजः
0422017 मैत्रेय उवाच
04220171 पृथोस्तत् सूक्तम् आकर्ण्य सारं सुष्ठु मितं मधु
04220172 स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह
0422018 सनत्-कुमार उवाच
04220181 साधु पृष्टं महाराज सर्व-भूत-हितात्मना
04220182 भवता विदुषा चापि साधूनां मतिरीदृशी
04220191 सङ्गमः खलु साधूनाम् उभयेषां च सम्मतः
04220192 यत्-सम्भाषण-सम्प्रश्नः सर्वेषां वितनोति शम्
04220201 अस्त्येव राजन् भवतो मधुद्विषः ।पादारविन्दस्य गुणानुवादने
04220202 रतिर्दुरापा विधुनोति नैष्ठिकी ।कामं कषायं मलम् अन्तर्-आत्मनः
04220211 शास्त्रेष्वियान् एव सुनिश्चितो नृणां ।क्षेमस्य सध्र्यग्-विमृशेषु हेतुः
04220212 असङ्ग आत्म-व्यतिरिक्त आत्मनि ।दृढा रतिर्ब्रह्मणि निर्गुणे च या
04220221 सा श्रद्धया भगवद्-धर्म-चर्यया ।जिज्ञासयाध्यात्मिक-योग-निष्ठया
04220222 योगेश्वरोपासनया च नित्यं ।पुण्य-श्रवः-कथया पुण्यया च
04220231 अर्थेन्द्रियाराम-सगोष्ठ्य्-अतृष्णया ।तत्-सम्मतानाम् अपरिग्रहेण च
04220232 विविक्त-रुच्या परितोष आत्मनि ।विना हरेर्गुण-पीयूष-पानात्
04220241 अहिंसया पारमहंस्य-चर्यया ।स्मृत्या मुकुन्दाचरिताग्र्य-सीधुना
04220242 यमैरकामैर्नियमैश्चाप्यनिन्दया ।निरीहया द्वन्द्व-तितिक्षया च
04220251 हरेर्मुहुस्तत्पर-कर्ण-पूर- ।गुणाभिधानेन विजृम्भमाणया
04220252 भक्त्या ह्यसङ्गः सद्-असत्यनात्मनि ।स्यान् निर्गुणे ब्रह्मणि चाञ्जसा रतिः
04220261 यदा रतिर्ब्रह्मणि नैष्ठिकी पुमान् ।आचार्यवान् ज्ञान-विराग-रंहसा
04220262 दहत्यवीर्यं हृदयं जीव-कोशं ।पञ्चात्मकं योनिम् इवोत्थितोऽग्निः
04220271 दग्धाशयो मुक्त-समस्त-तद्-गुणो ।नैवात्मनो बहिरन्तर्विचष्टे
04220272 परात्मनोर्यद्-व्यवधानं पुरस्तात् ।स्वप्ने यथा पुरुषस्तद्-विनाशे
04220281 आत्मानम् इन्द्रियार्थं च परं यद् उभयोरपि
04220282 सत्याशय उपाधौ वै पुमान् पश्यति नान्यदा
04220291 निमित्ते सति सर्वत्र जलादावपि पूरुषः
04220292 आत्मनश्च परस्यापि भिदां पश्यति नान्यदा
04220301 इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः
04220302 चेतनां हरते बुद्धेः स्तम्बस्तोयम् इव ह्रदात्
04220311 भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञान-भ्रंशः स्मृति-क्षये
04220312 तद्-रोधं कवयः प्राहुरात्मापह्नवम् आत्मनः
04220321 नातः परतरो लोके पुंसः स्वार्थ-व्यतिक्रमः
04220322 यद्-अध्यन्यस्य प्रेयस्त्वम् आत्मनः स्व-व्यतिक्रमात्

04220331 अर्थेन्द्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम्
04220332 भ्रंशितो ज्ञान-विज्ञानाद् येनाविशति मुख्यताम्
04220341 न कुर्यात् कर्हिचित् सङ्गं तमस्तीव्रं तितीरिषुः
04220342 धर्मार्थ-काम-मोक्षाणां यद् अत्यन्त-विघातकम्
04220351 तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते
04220352 त्रैवर्ग्योऽर्थो यतो नित्यं कृतान्त-भय-संयुतः
04220361 परेऽवरे च ये भावा गुण-व्यतिकराद् अनु
04220362 न तेषां विद्यते क्षेमम् ईश-विध्वंसिताशिषाम्
04220371 तत् त्वं नरेन्द्र जगताम् अथ तस्थूषां च
04220372 देहेन्द्रियासु-धिषणात्मभिरावृतानाम्
04220373 यः क्षेत्रवित्-तपतया हृदि विश्वग् आविः
04220374 प्रत्यक् चकास्ति भगवांस्तम् अवेहि सोऽस्मि
04220381 यस्मिन्न् इदं सद्-असद्-आत्मतया विभाति
04220382 माया विवेक-विधुति स्रजि वाहि-बुद्धिः
04220383 तं नित्य-मुक्त-परिशुद्ध-विशुद्ध-तत्त्वं
04220384 प्रत्यूढ-कर्म-कलिल-प्रकृतिं प्रपद्ये
04220391 यत्-पाद-पङ्कज-पलाश-विलास-भक्त्या
04220392 कर्माशयं ग्रथितम् उद्ग्रथयन्ति सन्तः
04220393 तद्वन् न रिक्त-मतयो यतयोऽपि रुद्ध-
04220394 स्रोतो-गणास्तम् अरणं भज वासुदेवम्
04220401 कृच्छ्रो महान् इह भवार्णवम् अप्लवेशां
04220402 षड्-वर्ग-नक्रम् असुखेन तितीर्षन्ति
04220403 तत् त्वं हरेर्भगवतो भजनीयम् अङ्घ्रिं
04220404 कृत्वोडुपं व्यसनम् उत्तर दुस्तरार्णम्
0422041 मैत्रेय उवाच
04220411 स एवं ब्रह्म-पुत्रेण कुमारेणात्म-मेधसा
04220412 दर्शितात्म-गतिः सम्यक् प्रशस्योवाच तं नृपः
0422042 राजोवाच
04220421 कृतो मेऽनुग्रहः पूर्वं हरिणार्तानुकम्पिना
04220422 तम् आपादयितुं ब्रह्मन् भगवन् यूयम् आगताः
04220431 निष्पादितश्च कार्त्स्न्येन भगवद्भिर्घृणालुभिः
04220432 साधूच्छिष्टं हि मे सर्वम् आत्मना सह किं ददे
04220441 प्राणा दाराः सुता ब्रह्मन् गृहाश्च स-परिच्छदाः
04220442 राज्यं बलं मही कोश इति सर्वं निवेदितम्
04220451 सैना-पत्यं च राज्यं च दण्ड-नेतृत्वम् एव च
04220452 सर्व लोकाधिपत्यं च वेद-शास्त्र-विद् अर्हति
04220461 स्वम् एव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च
04220462 तस्यैवानुग्रहेणान्नं भुञ्जते क्षत्रियादयः
04220471 यैरीदृशी भगवतो गतिरात्म-वाद
04220472 एकान्ततो निगमिभिः प्रतिपादिता नः

04220473 तुष्यन्त्वदभ्र-करुणाः स्व-कृतेन नित्यं
04220474 को नाम तत् प्रतिकरोति विनोद-पात्रम्
0422048 मैत्रेय उवाच
04220481 त आत्म-योग-पतय आदि-राजेन पूजिताः
04220482 शीलं तदीयं शंसन्तः खेऽभवन् मिषतां नृणाम्
04220491 वैन्यस्तु धुर्यो महतां संस्थित्याध्यात्म-शिक्षया
04220492 आप्त-कामम् इवात्मानं मेन आत्मन्यवस्थितः
04220501 कर्माणि च यथा-कालं यथा-देशं यथा-बलम्
04220502 यथोचितं यथा-वित्तम् अकरोद् ब्रह्म-सात्-कृतम्
04220511 फलं ब्रह्मणि सन्न्यस्य निर्विषङ्गः समाहितः
04220512 कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परम्
04220521 गृहेषु वर्तमानोऽपि स साम्राज्य-श्रियान्वितः
04220522 नासज्जतेन्द्रियार्थेषु निरहम्-मतिरर्कवत्
04220531 एवम् अध्यात्म-योगेन कर्माण्यनुसमाचरन्
04220532 पुत्रान् उत्पादयाम् आस पञ्चार्चिष्यात्म-सम्मतान्
04220541 विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम्
04220542 सर्वेषां लोक-पालानां दधारैकः पृथुर्गुणान्
04220551 गोपीथाय जगत्-सृष्टेः काले स्वे स्वे ऽच्युतात्मकः
04220552 मनो-वाग्-वृत्तिभिः सौम्यैर्गुणैः संरञ्जयन् प्रजाः
04220561 राजेत्यधान् नामधेयं सोम-राज इवापरः
04220562 सूर्यवद् विसृजन् गृह्णन् प्रतपंश्च भुवो वसु
04220571 दुर्धर्षस्तेजसेवाग्निर्महेन्द्र इव दुर्जयः
04220572 तितिक्षया धरित्रीव द्यौरिवाभीष्ट-दो नृणाम्
04220581 वर्षति स्म यथा-कामं पर्जन्य इव तर्पयन्
04220582 समुद्र इव दुर्बोधः सत्त्वेनाचल-राड् इव
04220591 धर्म-राड् इव शिक्षायाम् आश्चर्ये हिमवान् इव
04220592 कुवेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा
04220601 मातरिश्वेव सर्वात्मा बलेन महसौजसा
04220602 अविषह्यतया देवो भगवान् भूत-राड् इव
04220611 कन्दर्प इव सौन्दर्ये मनस्वी मृग-राड् इव
04220612 वात्सल्ये मनुवन् नृणां प्रभुत्वे भगवान् अजः
04220621 बृहस्पतिर्ब्रह्म-वादे आत्मवत्त्वे स्वयं हरिः
04220622 भक्त्या गो-गुरु-विप्रेषु विष्वक्सेनानुवर्तिषु
04220623 ह्रिया प्रश्रय-शीलाभ्याम् आत्म-तुल्यः परोद्यमे
04220631 कीर्त्योर्ध्व-गीतया पुम्भिस्त्रैलोक्ये तत्र तत्र ह
04220632 प्रविष्टः कर्ण-रन्ध्रेषु स्त्रीणां रामः सताम् इव

Chapter 23

0423001 मैत्रेय उवाच
04230011 दृष्ट्वात्मानं प्रवयसम् एकदा वैन्य आत्मवान्
04230012 आत्मना वर्धिताशेष- स्वानुसर्गः प्रजापतिः
04230021 जगतस्तस्थुषश्चापि वृत्तिदो धर्म-भृत् सताम्
04230022 निष्पादितेश्वरादेशो यद्-अर्थम् इह जज्ञिवान्
04230031 आत्मजेष्वात्मजां न्यस्य विरहाद् रुदतीम् इव
04230032 प्रजासु विमनःस्वेकः स-दारोऽगात् तपो-वनम्
04230041 तत्राप्यदाभ्य-नियमो वैखानस-सुसम्मते
04230042 आरब्ध उग्र-तपसि यथा स्व-विजये पुरा
04230051 कन्द-मूल-फलाहारः शुष्क-पर्णाशनः क्वचित्
04230052 अब्-भक्षः कतिचित् पक्षान् वायु-भक्षस्ततः परम्
04230061 ग्रीष्मे पञ्च-तपा वीरो वर्षास्वासारषाण् मुनिः
04230062 आकण्ठ-मग्नः शिशिरे उदके स्थण्डिले-शयः
04230071 तितिक्षुर्यत-वाग् दान्त ऊर्ध्व-रेता जितानिलः
04230072 आरिराधयिषुः कृष्णम् अचरत् तप उत्तमम्
04230081 तेन क्रमानुसिद्धेन ध्वस्त-कर्म-मलाशयः
04230082 प्राणायामैः सन्निरुद्ध- षड्-वर्गश्छिन्न-बन्धनः
04230091 सनत्-कुमारो भगवान् यद् आहाध्यात्मिकं परम्
04230092 योगं तेनैव पुरुषम् अभजत् पुरुषर्षभः
04230101 भगवद्-धर्मिणः साधोः श्रद्धया यततः सदा
04230102 भक्तिर्भगवति ब्रह्मण्यनन्य-विषयाभवत्
04230111 तस्यानया भगवतः परिकर्म-शुद्ध-
04230112 सत्त्वात्मनस्तद्-अनुसंस्मरणानुपूर्त्या
04230113 ज्ञानं विरक्तिमद् अभून् निशितेन येन
04230114 चिच्छेद संशय-पदं निज-जीव-कोशम्
04230121 छिन्नान्य-धीरधिगतात्म-गतिर्निरीहस्
04230122 तत् तत्यजे च्छिनद् इदं वयुनेन येन
04230123 तावन् न योग-गतिभिर्यतिरप्रमत्तो

04230124 यावद् गदाग्रज-कथासु रतिं न कुर्यात्
04230131 एवं स वीर-प्रवरः संयोज्यात्मानम् आत्मनि
04230132 ब्रह्म-भूतो दृढं काले तत्याज स्वं कलेवरम्
04230141 सम्पीड्य पायुं पार्ष्णिभ्यां वायुम् उत्सारय' छनैः
04230142 नाभ्यां कोष्ठेष्ववस्थाप्य हृद्-उरः-कण्ठ-शीर्षणि
04230151 उत्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निःस्पृहः
04230152 वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत्
04230161 खान्याकाशे द्रवं तोये यथा-स्थानं विभागशः
04230162 क्षितिम् अम्भसि तत् तेजस्यदो वायौ नभस्यमुम्
04230171 इन्द्रियेषु मनस्तानि तन्-मात्रेषु यथोद्भवम्
04230172 भूतादिनामून्युत्कृष्य महत्यात्मनि सन्दधे
04230181 तं सर्व-गुण-विन्यासं जीवे मायामये न्यधात्
04230182 तं चानुशयम् आत्म-स्थम् असावनुशयी पुमान्
04230183 ज्ञान-वैराग्य-वीर्येण स्वरूप-स्थो ज्ञहात् प्रभुः
04230191 अर्चिर्नाम महा-राज्ञी तत्-पत्न्यनुगता वनम्
04230192 सुकुमार्यतद्-अर्हा च यत्-पद्भ्यां स्पर्शनं भुवः
04230201 अतीव भर्तुर्व्रत-धर्म-निष्ठया ।शुश्रूषया चार्ष-देह-यात्रया
04230202 नाविन्दतार्तिं परिकर्शितापि सा ।प्रेयस्कर-स्पर्शन-मान-निर्वृतिः
04230211 देहं विपन्नाखिल-चेतनादिकं ।पत्युः पृथिव्या दयितस्य चात्मनः
04230212 आलक्ष्य किञ्चिच् च विलप्य सा सती ।चिताम् अथारोपयद् अद्रि-सानुनि
04230221 विधाय कृत्यं ह्रदिनी-जलाप्लुता ।दत्त्वोदकं भर्तुरुदार-कर्मणः
04230222 नत्वा दिवि-स्थांस्त्रिदशांस्त्रिः परीत्य ।विवेश वह्निं ध्यायती भर्तृ-पादौ
04230231 विलोक्यानुगतां साध्वीं पृथुं वीर-वरं पतिम्
04230232 तुष्टुवुर्वरदा देवैर्देव-पत्न्यः सहस्रशः
04230241 कुर्वत्यः कुसुमासारं तस्मिन् मन्दर-सानुनि
04230242 नदत्स्वमर-तूर्येषु गृणन्ति स्म परस्परम्
0423025 देव्य ऊचुः
04230251 अहो इयं वधूर्धन्या या चैवं भू-भुजां पतिम्
04230252 सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव
04230261 सैषा नूनं व्रजत्यूर्ध्वम् अनु वैन्यं पतिं सती
04230262 पश्यतास्मान् अतीत्यार्चिर्दुर्विभाव्येन कर्मणा
04230271 तेषां दुरापं किं त्वन्यन् मर्त्यानां भगवत्-पदम्
04230272 भुवि लोलायुषो ये वै नैष्कर्म्यं साधयन्त्युत
04230281 स वञ्चितो बतात्म-ध्रुक् कृच्छ्रेण महता भुवि
04230282 लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते
0423029 मैत्रेय उवाच
04230291 स्तुवतीष्वमर-स्त्रीषु पति-लोकं गता वधूः
04230292 यं वा आत्म-विदां धुर्यो वैन्यः प्रापाच्युताश्रयः
04230301 इत्थम्-भूतानुभावोऽसौ पृथुः स भगवत्तमः
04230302 कीर्तितं तस्य चरितम् उद्दाम-चरितस्य ते

04230311 य इदं सुमहत् पुण्यं श्रद्धयावहितः पठेत्
04230312 श्रावयेच् छृणुयाद् वापि स पृथोः पदवीम् इयात्
04230321 ब्राह्मणो ब्रह्म-वर्चस्वी राजन्यो जगती-पतिः
04230322 वैश्यः पठन् विट्-पतिः स्याच् छूद्रः सत्तमताम् इयात्
04230331 त्रिः कृत्व इदम् आकर्ण्य नरो नार्यथवादृता
04230332 अप्रजः सुप्रजतमो निर्धनो धनवत्तमः
04230341 अस्पष्ट-कीर्तिः सुयशा मूर्खो भवति पण्डितः
04230342 इदं स्वस्त्य्-अयनं पुंसाम् अमङ्गल्य-निवारणम्
04230351 धन्यं यशस्यम् आयुष्यं स्वर्ग्यं कलि-मलापहम्
04230352 धर्मार्थ-काम-मोक्षाणां सम्यक् सिद्धिम् अभीप्सुभिः
04230353 श्रद्धयैतद् अनुश्राव्यं चतुर्णां कारणं परम्
04230361 विजयाभिमुखो राजा श्रुत्वैतद् अभियाति यान्
04230362 बलिं तस्मै हरन्त्यग्रे राजानः पृथवे यथा
04230371 मुक्तान्य-सङ्गो भगवत्यमलां भक्तिम् उद्वहन्
04230372 वैन्यस्य चरितं पुण्यं शृणुयाच् छ्रावयेत् पठेत्
04230381 वैचित्रवीर्याभिहितं महन्-माहात्म्य-सूचकम्
04230382 अस्मिन् कृतम् अतिमर्त्यं पार्थवीं गतिम् आप्नुयात्
04230391 अनुदिनम् इदम् आदरेण शृण्वन् । पृथु-चरितं प्रथयन् विमुक्त-सङ्गः
04230392 भगवति भव-सिन्धु-पोत-पादे । स च निपुणां लभते रतिं मनुष्यः

Chapter 24

0424001 मैत्रेय उवाच
04240011 विजिताश्वोऽधिराजासीत् पृथु-पुत्रः पृथु-श्रवाः
04240012 यवीयोभ्योऽददात् काष्ठा भ्रातृभ्यो भ्रातृ-वत्सलः
04240021 हर्यक्षायादिशत् प्राचीं धूम्रकेशाय दक्षिणाम्
04240022 प्रतीचीं वृक-संज्ञाय तुर्यां द्रविणसे विभुः
04240031 अन्तर्धान-गतिं शक्राल् लब्ध्वान्तर्धान-संज्ञितः
04240032 अपत्य-त्रयम् आधत्त शिखण्डिन्यां सुसम्मतम्
04240041 पावकः पवमानश्च शुचिरित्यग्नयः पुरा
04240042 वसिष्ठ-शापाद् उत्पन्नाः पुनर्योग-गतिं गताः
04240051 अन्तर्धानो नभस्वत्यां हविर्धानम् अविन्दत
04240052 य इन्द्रम् अश्व-हर्तारं विद्वान् अपि न जघ्निवान्
04240061 राज्ञां वृत्तिं करादान- दण्ड-शुल्कादि-दारुणाम्
04240062 मन्यमानो दीर्घ-सत्त्र- व्याजेन विससर्ज ह
04240071 तत्रापि हंसं पुरुषं परमात्मानम् आत्म-दृक्
04240072 यजंस्तल्-लोकताम् आप कुशलेन समाधिना
04240081 हविर्धानाद् धविर्धानी विदुरासूत षट् सुतान्
04240082 बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्
04240091 बर्हिषत् सुमहा-भागो हाविर्धानिः प्रजापतिः
04240092 क्रिया-काण्डेषु निष्णातो योगेषु च कुरूद्वह
04240101 यस्येदं देव-यजनम् अनुयज्ञं वितन्वतः
04240102 प्राचीनाग्रैः कुशैरासीद् आस्तृतं वसुधा-तलम्
04240111 सामुद्रीं देवदेवोक्ताम् उपयेमे शतद्रुतिम्
04240112 यां वीक्ष्य चारु-सर्वाङ्गीं किशोरीं सुष्ठ्व्-अलङ्कृताम्
04240113 परिक्रमन्तीम् उद्वाहे चकमेऽग्निः शुकीम् इव
04240121 विबुधासुर-गन्धर्व- मुनि-सिद्ध-नरोरगाः
04240122 विजिताः सूर्यया दिक्षु क्वणयन्त्यैव नूपुरैः
04240131 प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन्
04240132 तुल्य-नाम-व्रताः सर्वे धर्म-स्नाताः प्रचेतसः

04240141 पित्रादिष्टाः प्रजा-सर्गे तपसेऽर्णवम् आविशन्
04240142 दश-वर्ष-सहस्राणि तपसार्चंस्तपस्-पतिम्
04240151 यद् उक्तं पथि दृष्टेन गिरिशेन प्रसीदता
04240152 तद् ध्यायन्तो जपन्तश्च पूजयन्तश्च संयताः
0424016 विदुर उवाच
04240161 प्रचेतसां गिरित्रेण यथासीत् पथि सङ्गमः
04240162 यद् उताह हरः प्रीतस्तन् नो ब्रह्मन् वदार्थवत्
04240171 सङ्गमः खलु विप्रर्षे शिवेनेह शरीरिणाम्
04240172 दुर्लभो मुनयो दध्युरसङ्गाद् यम् अभीप्सितम्
04240181 आत्मारामोऽपि यस्त्वस्य लोक-कल्पस्य राधसे
04240182 शक्त्या युक्तो विचरति घोरया भगवान् भवः
0424019 मैत्रेय उवाच
04240191 प्रचेतसः पितुर्वाक्यं शिरसादाय साधवः
04240192 दिशं प्रतीचीं प्रययुस्तपस्याद‍ृत-चेतसः
04240201 स-समुद्रम् उप विस्तीर्णम् अपश्यन् सुमहत् सरः
04240202 महन्-मन इव स्वच्छं प्रसन्न-सलिलाशयम्
04240211 नील-रक्तोत्पलाम्भोज- कह्लारेन्दीवराकरम्
04240212 हंस-सारस-चक्राह्व- कारण्डव-निकूजितम्
04240221 मत्त-भ्रमर-सौस्वर्य- हृष्ट-रोम-लताङ्घ्रिपम्
04240222 पद्म-कोश-रजो दिक्षु विक्षिपत्-पवनोत्सवम्
04240231 तत्र गान्धर्वम् आकर्ण्य दिव्य-मार्ग-मनोहरम्
04240232 विसिस्म्यू राज-पुत्रास्ते मृदङ्ग-पणवाद्यनु
04240241 तर्ह्येव सरसस्तस्मान् निष्क्रामन्तं सहानुगम्
04240242 उपगीयमानम् अमर- प्रवरं विबुधानुगैः
04240251 तप्त-हेम-निकायाभं शिति-कण्ठं त्रि-लोचनम्
04240252 प्रसाद-सुमुखं वीक्ष्य प्रणेमुर्जात-कौतुकाः
04240261 स तान् प्रपन्नार्ति-हरो भगवान् धर्म-वत्सलः
04240262 धर्म-ज्ञान् शील-सम्पन्नान् प्रीतः प्रीतान् उवाच ह
0424027 श्री-रुद्र उवाच
04240271 यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम्
04240272 अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम्
04240281 यः परं रंहसः साक्षात् त्रि-गुणाज् जीव-संज्ञितात्
04240282 भगवन्तं वासुदेवं प्रपन्नः स प्रियो हि मे
04240291 स्व-धर्म-निष्ठः शत-जन्मभिः पुमान् । विरिञ्चताम् एति ततः परं हि माम्
04240292 अव्याकृतं भागवतोऽथ वैष्णवं । पदं यथाहं विबुधाः कलात्यये
04240301 अथ भागवता यूयं प्रियाः स्थ भगवान् यथा
04240302 न मद् भागवतानां च प्रेयान् अन्योऽस्ति कर्हिचित्
04240311 इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम्
04240312 निःश्रेयस-करं चापि श्रूयतां तद् वदामि वः

0424032 मैत्रेय उवाच
04240321 इत्यनुक्रोश-हृदयो भगवान् आह ता' छिवः
04240322 बद्धाञ्जलीन् राज-पुत्रान् नारायण-परो वचः
0424033 श्री-रुद्र उवाच
04240331 जितं त आत्म-विद्-वर्य- स्वस्तये स्वस्तिरस्तु मे
04240332 भवताराधसा राद्धं सर्वस्मा आत्मने नमः
04240341 नमः पङ्कज-नाभाय भूत-सूक्ष्मेन्द्रियात्मने
04240342 वासुदेवाय शान्ताय कूट-स्थाय स्व-रोचिषे
04240351 सङ्कर्षणाय सूक्ष्माय दुरन्तायान्तकाय च
04240352 नमो विश्व-प्रबोधाय प्रद्युम्नायान्तर्-आत्मने
04240361 नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने
04240362 नमः परमहंसाय पूर्णाय निभृतात्मने
04240371 स्वर्गापवर्ग-द्वाराय नित्यं शुचि-षदे नमः
04240372 नमो हिरण्य-वीर्याय चातुर्-होत्राय तन्तवे
04240381 नम ऊर्ज इषे त्रय्याः पतये यज्ञ-रेतसे
04240382 तृप्ति-दाय च जीवानां नमः सर्व-रसात्मने
04240391 सर्व-सत्त्वात्म-देहाय विशेषाय स्थवीयसे
04240392 नमस्त्रैलोक्य-पालाय सह ओजो-बलाय च
04240401 अर्थ-लिङ्गाय नभसे नमोऽन्तर्-बहिर्-आत्मने
04240402 नमः पुण्याय लोकाय अमुष्मै भूरि-वर्चसे
04240411 प्रवृत्ताय निवृत्ताय पितृ-देवाय कर्मणे
04240412 नमोऽधर्म-विपाकाय मृत्यवे दुःख-दाय च
04240421 नमस्त आशिषाम् ईश मनवे कारणात्मने
04240422 नमो धर्माय बृहते कृष्णायाकुण्ठ-मेधसे
04240423 पुरुषाय पुराणाय साङ्ख्य-योगेश्वराय च
04240431 शक्ति-त्रय-समेताय मीढुषेऽहङ्कृतात्मने
04240432 चेत-आकूति-रूपाय नमो वाचो विभूतये
04240441 दर्शनं नो दिदृक्षूणां देहि भागवतार्चितम्
04240442 रूपं प्रियतमं स्वानां सर्वेन्द्रिय-गुणाञ्जनम्
04240451 स्निग्ध-प्रावृड्-घन-श्यामं सर्व-सौन्दर्य-सङ्ग्रहम्
04240452 चार्व्-आयत-चतुर्-बाहु सुजात-रुचिराननम्
04240461 पद्म-कोश-पलाशाक्षं सुन्दर-भ्रु सुनासिकम्
04240462 सुद्विजं सुकपोलास्यं सम-कर्ण-विभूषणम्
04240471 प्रीति-प्रहसितापाङ्गम् अलकै रूप-शोभितम्
04240472 लसत्-पङ्कज-किञ्जल्क- दुकूलं मृष्ट-कुण्डलम्
04240481 स्फुरत्-किरीट-वलय- हार-नूपुर-मेखलम्
04240482 शङ्ख-चक्र-गदा-पद्म- माला-मण्य्-उत्तमर्द्धिमत्
04240491 सिंह-स्कन्ध-त्विषो बिभ्रत् सौभग-ग्रीव-कौस्तुभम्
04240492 श्रियानपायिन्या क्षिप्त- निकषाश्मोरसोल्लसत्

04240501 पूर-रेचक-संविग्न- वलि-वल्गु-दलोदरम्
04240502 प्रतिसङ्क्रामयद् विश्वं नाभ्यावर्त-गभीरया

04240511 श्याम-श्रोण्य्-अधि-रोचिष्णु- दुकूल-स्वर्ण-मेखलम्
04240512 सम-चार्व्-अङ्घ्रि-जङ्घोरु- निम्न-जानु-सुदर्शनम्
04240521 पदा शरत्-पद्म-पलाश-रोचिषा ।नख-द्युभिर्नोऽन्तर्-अघं विधुन्वता
04240522 प्रदर्शय स्वीयम् अपास्त-साध्वसं ।पदं गुरो मार्ग-गुरुस्तमो-जुषाम्
04240531 एतद् रूपम् अनुध्येयम् आत्म-शुद्धिम् अभीप्सताम्
04240532 यद्-भक्ति-योगोऽभयदः स्व-धर्मम् अनुतिष्ठताम्
04240541 भवान् भक्तिमता लभ्यो दुर्लभः सर्व-देहिनाम्
04240542 स्वाराज्यस्याप्यभिमत एकान्तेनात्म-विद्-गतिः
04240551 तं दुराराध्यम् आराध्य सताम् अपि दुरापया
04240552 एकान्त-भक्त्या को वाञ्छेत् पाद-मूलं विना बहिः
04240561 यत्र निर्विष्टम् अरणं कृतान्तो नाभिमन्यते
04240562 विश्वं विध्वंसयन् वीर्य- शौर्य-विस्फूर्जित-भ्रुवा
04240571 क्षणार्धेनापि तुलये न स्वर्गं नापुनर्-भवम्
04240572 भगवत्-सङ्गि-सङ्गस्य मर्त्यानां किम् उताशिषः
04240581 अथानघाङ्घ्रेस्तव कीर्ति-तीर्थयोर् ।अन्तर्-बहिः-स्नान-विधूत-पाप्मनाम्
04240582 भूतेष्वनुक्रोश-सुसत्त्व-शीलिनां ।स्यात् सङ्गमोऽनुग्रह एष नस्तव
04240591 न यस्य चित्तं बहिर्-अर्थ-विभ्रमं ।तमो-गुहायां च विशुद्धम् आविशत्
04240592 यद्-भक्ति-योगानुगृहीतम् अञ्जसा ।मुनिर्विचष्टे ननु तत्र ते गतिम्
04240601 यत्रेदं व्यज्यते विश्वं विश्वस्मिन्न् अवभाति यत्
04240602 तत् त्वं ब्रह्म परं ज्योतिराकाशम् इव विस्तृतम्
04240611 यो माययेदं पुरु-रूपयासृजद् ।बिभर्ति भूयः क्षपयत्यविक्रियः
04240612 यद्-भेद-बुद्धिः सद् इवात्म-दुःस्थया ।त्वम् आत्म-तन्त्रं भगवन् प्रतीमहि
04240621 क्रिया-कलापैरिदम् एव योगिनः ।श्रद्धान्विताः साधु यजन्ति सिद्धये
04240622 भूतेन्द्रियान्तः-करणोपलक्षितं ।वेदे च तन्त्रे च त एव कोविदाः
04240631 त्वम् एक आद्यः पुरुषः सुप्त-शक्तिस् ।तया रजः-सत्त्व-तमो विभिद्यते
04240632 महान् अहं खं मरुद् अग्नि-वार्-धराः ।सुरर्षयो भूत-गणा इदं यतः
04240641 सृष्टं स्व-शक्त्येदम् अनुप्रविष्टश् ।चतुर्-विधं पुरम् आत्मांशकेन
04240642 अथो विदुस्तं पुरुषं सन्तम् अन्तर् ।भुङ्क्ते हृषीकैर्मधु सार-घं यः
04240651 स एष लोकान् अतिचण्ड-वेगो ।विकर्षसि त्वं खलु काल-यानः
04240652 भूतानि भूतैरनुमेय-तत्त्वो ।घनावलीर्वायुरिवाविषह्यः
04240661 प्रमत्तम् उच्चैरिति कृत्य-चिन्तया ।प्रवृद्ध-लोभं विषयेषु लालसम्
04240662 त्वम् अप्रमत्तः सहसाभिपद्यसे ।क्षुल्-लेलिहानोऽहिरिवाखुम् अन्तकः
04240671 कस्त्वत्-पदाब्जं विजहाति पण्डितो ।यस्तेऽवमान-व्ययमान-केतनः
04240672 विशङ्कयास्मद्-गुरुरर्चति स्म यद् ।विनोपपत्तिं मनवश्चतुर्दश
04240681 अथ त्वम् असि नो ब्रह्मन् परमात्मन् विपश्चिताम्
04240682 विश्वं रुद्र-भय-ध्वस्तम् अकुतश्चिद्-भया गतिः
04240691 इदं जपत भद्रं वो विशुद्धा नृप-नन्दनाः

04240692 स्व-धर्मम् अनुतिष्ठन्तो भगवत्यर्पिताशयाः
04240701 तम् एवात्मानम् आत्म-स्थं सर्व-भूतेष्ववस्थितम्
04240702 पूजयध्वं गृणन्तश्च ध्यायन्तश्चासकृद् धरिम्
04240711 योगादेशम् उपासाद्य धारयन्तो मुनि-व्रताः
04240712 समाहित-धियः सर्व एतद् अभ्यसतादृताः
04240721 इदम् आह पुरास्माकं भगवान् विश्वसृक्-पतिः
04240722 भृग्व्-आदीनाम् आत्मजानां सिसृक्षुः संसिसृक्षताम्
04240731 ते वयं नोदिताः सर्वे प्रजा-सर्गे प्रजेश्वराः
04240732 अनेन ध्वस्त-तमसः सिसृक्ष्मो विविधाः प्रजाः
04240741 अथेदं नित्यदा युक्तो जपन्न् अवहितः पुमान्
04240742 अचिराच् छ्रेय आप्नोति वासुदेव-परायणः
04240751 श्रेयसाम् इह सर्वेषां ज्ञानं निःश्रेयसं परम्
04240752 सुखं तरति दुष्पारं ज्ञान-नौर्व्यसनार्णवम्
04240761 य इमं श्रद्धया युक्तो मद्-गीतं भगवत्-स्तवम्
04240762 अधीयानो दुराराध्यं हरिम् आराधयत्यसौ
04240771 विन्दते पुरुषोऽमुष्माद् यद् यद् इच्छत्यसत्वरम्
04240772 मद्-गीत-गीतात् सुप्रीताच् छ्रेयसाम् एक-वल्लभात्
04240781 इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः
04240782 शृणुयाच् छ्रावयेन् मर्त्यो मुच्यते कर्म-बन्धनैः
04240791 गीतं मयेदं नरदेव-नन्दनाः ।परस्य पुंसः परमात्मनः स्तवम्
04240792 जपन्त एकाग्र-धियस्तपो महत् ।चरध्वम् अन्ते तत आप्स्यथेप्सितम्

Chapter 25

0425001 मैत्रेय उवाच
04250011 इति सन्दिश्य भगवान् बार्हिषदैरभिपूजितः
04250012 पश्यतां राज-पुत्राणां तत्रैवान्तर्दधे हरः
04250021 रुद्र-गीतं भगवतः स्तोत्रं सर्वे प्रचेतसः
04250022 जपन्तस्ते तपस्तेपुर्वर्षाणाम् अयुतं जले
04250031 प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्त-मानसम्
04250032 नारदोऽध्यात्म-तत्त्व-ज्ञः कृपालुः प्रत्यबोधयत्
04250041 श्रेयस्त्वं कतमद् राजन् कर्मणात्मन ईहसे
04250042 दुःख-हानिः सुखावाप्तिः श्रेयस्तन् नेह चेष्यते
0425005 राजोवाच
04250051 न जानामि महा-भाग परं कर्मापविद्ध-धीः
04250052 ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः
04250061 गृहेषु कूट-धर्मेषु पुत्र-दार-धनार्थ-धीः
04250062 न परं विन्दते मूढो भ्राम्यन् संसार-वर्त्मसु
0425007 नारद उवाच
04250071 भो भोः प्रजापते राजन् पशून् पश्य त्वयाध्वरे
04250072 संज्ञापिता' जीव-सङ्घान् निर्घृणेन सहस्रशः
04250081 एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव
04250082 सम्परेतम् अयः-कूटैश्छिन्दन्त्युत्थित-मन्यवः
04250091 अत्र ते कथयिष्येऽमुम् इतिहासं पुरातनम्
04250092 पुरञ्जनस्य चरितं निबोध गदतो मम
04250101 आसीत् पुरञ्जनो नाम राजा राजन् बृहच्-छ्रवाः
04250102 तस्याविज्ञात-नामासीत् सखाविज्ञात-चेष्टितः
04250111 सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः
04250112 नानुरूपं यदाविन्दद् अभूत् स विमना इव
04250121 न साधु मेने ताः सर्वा भूतले यावतीः पुरः
04250122 कामान् कामयमानोऽसौ तस्य तस्योपपत्तये
04250131 स एकदा हिमवतो दक्षिणेष्वथ सानुषु

04250132 ददर्श नवभिर्द्वार्भिः पुरं लक्षित-लक्षणाम्
04250141 प्राकारोपवनाट्टाल- परिखैरक्ष-तोरणैः
04250142 स्वर्ण-रौप्यायसैः शृङ्गैः सङ्कुलां सर्वतो गृहैः
04250151 नील-स्फटिक-वैदूर्य- मुक्ता-मरकतारुणैः
04250152 क्लृप्त-हर्म्य-स्थलीं दीप्तां श्रिया भोगवतीम् इव
04250161 सभा-चत्वर-रथ्याभिराक्रीडायतनापणैः
04250162 चैत्य-ध्वज-पताकाभिर्युक्तां विद्रुम-वेदिभिः
04250171 पुर्यास्तु बाह्योपवने दिव्य-द्रुम-लताकुले
04250172 नदद्-विहङ्गालि-कुल- कोलाहल-जलाशये
04250181 हिम-निर्झर-विप्रुष्मत्- कुसुमाकर-वायुना
04250182 चलत्-प्रवाल-विटप- नलिनी-तट-सम्पदि
04250191 नानारण्य-मृग-व्रातैरनाबाधे मुनि-व्रतैः
04250192 आहूतं मन्यते पान्थो यत्र कोकिल-कूजितैः
04250201 यदृच्छयागतां तत्र ददर्श प्रमदोत्तमाम्
04250202 भृत्यैर्दशभिरायान्तीम् एकैक-शत-नायकैः
04250211 अञ्च-शीर्षाहिना गुप्तां प्रतीहारेण सर्वतः
04250212 अन्वेषमाणाम् ऋषभम् अप्रौढां काम-रूपिणीम्
04250221 सुनासां सुदतीं बालां सुकपोलां वराननाम्
04250222 सम-विन्यस्त-कर्णाभ्यां बिभ्रतीं कुण्डल-श्रियम्
04250231 पिशङ्ग-नीवीं सुश्रोणीं श्यामां कनक-मेखलाम्
04250232 पद्भ्यां क्वणद्भ्यां चलन्तीं नूपुरैर्देवताम् इव
04250241 स्तनौ व्यञ्जित-कैशोरौ सम-वृत्तौ निरन्तरौ
04250242 वस्त्रान्तेन निगूहन्तीं व्रीडया गज-गामिनीम्
04250251 ताम् आह ललितं वीरः सव्रीड-स्मित-शोभनाम्
04250252 स्निग्धेनापाङ्ग-पुङ्खेन स्पृष्टः प्रेमोद्भ्रमद्-भ्रुवा
04250261 का त्वं कञ्ज-पलाशाक्षि कस्यासीह कुतः सति
04250262 इमाम् उप पुरीं भीरु किं चिकीर्षसि शंस मे
04250271 क एतेऽनुपथा ये त एकादश महा-भटाः
04250272 एता वा ललनाः सुभ्रु कोऽयं तेऽहिः पुरः-सरः
04250281 त्वं ह्रीर्भवान्यस्यथ वाग् रमा पतिं ।विचिन्वती किं मुनिवद् रहो वने
04250282 त्वद्-अङ्घ्रि-कामाप्त-समस्त-कामं ।क्व पद्म-कोशः पतितः कराग्रात्
04250291 नासां वरोर्वन्यतमा भुवि-स्पृक् ।पुरीम् इमां वीर-वरेण साकम्
04250292 अर्हस्यलङ्कर्तुम् अदभ्र-कर्मणा ।लोकं परं श्रीरिव यज्ञ-पुंसा
04250301 यद् एष मापाङ्ग-विखण्डितेन्द्रियं ।सव्रीड-भाव-स्मित-विभ्रमद्-भ्रुवा
04250302 त्वयोपसृष्टो भगवान् मनो-भवः ।प्रबाधतेऽथानुगृहाण शोभने
04250311 त्वद्-आननं सुभ्रु सुतार-लोचनं ।व्यालम्बि-नीलालक-वृन्द-संवृतम्
04250312 उन्नीय मे दर्शय वल्गु-वाचकं ।यद् व्रीडया नाभिमुखं शुचि-स्मिते
0425032 नारद उवाच
04250321 इत्थं पुरञ्जनं नारी याचमानम् अधीरवत्

04250322 अभ्यनन्दत तं वीरं हसन्ती वीर मोहिता
04250331 न विदाम वयं सम्यक् कर्तारं पुरुषर्षभ
04250332 आत्मनश्च परस्यापि गोत्रं नाम च यत्-कृतम्
04250341 इहाद्य सन्तम् आत्मानं विदाम न ततः परम्
04250342 येनेयं निर्मिता वीर पुरी शरणम् आत्मनः
04250351 एते सखायः सख्यो मे नरा नार्यश्च मानद
04250352 सुप्तायां मयि जागर्ति नागोऽयं पालयन् पुरीम्
04250361 दिष्ट्यागतोऽसि भद्रं ते ग्राम्यान् कामान् अभीप्ससे
04250362 उद्वहिष्यामि तांस्तेऽहं स्व-बन्धुभिररिन्दम
04250371 इमां त्वम् अधितिष्ठस्व पुरीं नव-मुखीं विभो
04250372 मयोपनीतान् गृह्णानः काम-भोगान् शतं समाः
04250381 कं नु त्वद्-अन्यं रमये ह्यरति-ज्ञम् अकोविदम्
04250382 असम्परायाभिमुखम् अश्वस्तन-विदं पशुम्
04250391 धर्मो ह्यत्रार्थ-कामौ च प्रजानन्दोऽमृतं यशः
04250392 लोका विशोका विरजा यान् न केवलिनो विदुः
04250401 पितृ-देवर्षि-मर्त्यानां भूतानाम् आत्मनश्च ह
04250402 क्षेम्यं वदन्ति शरणं भवेऽस्मिन् यद् गृहाश्रमः
04250411 का नाम वीर विख्यातं वदान्यं प्रिय-दर्शनम्
04250412 न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिम्
04250421 कस्या मनस्ते भुवि भोगि-भोगयोः ।स्त्रिया न सज्जेद् भुजयोर्महा-भुज
04250422 योऽनाथ-वर्गाधिम् अलं घृणोद्धत- ।स्मितावलोकेन चरत्यपोहितुम्
0425043 नारद उवाच
04250431 इति तौ दम्-पती तत्र समुद्य समयं मिथः
04250432 तां प्रविश्य पुरीं राजन् मुमुदाते शतं समाः
04250441 उपगीयमानो ललितं तत्र तत्र च गायकैः
04250442 क्रीडन् परिवृतः स्त्रीभिर्ह्रदिनीम् आविशच् छुचौ
04250451 सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः
04250452 पृथग्-विषय-गत्य्-अर्थं तस्यां यः कश्चनेश्वरः
04250461 पञ्च द्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा
04250462 पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये
04250471 खद्योताविर्मुखी च प्राग् द्वारावेकत्र निर्मिते
04250472 विभ्राजितं जनपदं याति ताभ्यां द्युमत्-सखः
04250481 नलिनी नालिनी च प्राग् द्वारावेकत्र निर्मिते
04250482 अवधूत-सखस्ताभ्यां विषयं याति सौरभम्
04250491 मुख्या नाम पुरस्ताद् द्वास्तयापण-बहूदनौ
04250492 विषयौ याति पुर-राड् रसज्ञ-विपणान्वितः
04250501 पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरञ्जनः
04250502 राष्ट्रं दक्षिण-पञ्चालं याति श्रुतधरान्वितः
04250511 देवहूर्नाम पुर्या द्वा उत्तरेण पुरञ्जनः
04250512 राष्ट्रम् उत्तर-पञ्चालं याति श्रुतधरान्वितः

04250521 आसुरी नाम पश्चाद् द्वास्तया याति पुरञ्जनः
04250522 ग्रामकं नाम विषयं दुर्मदेन समन्वितः
04250531 निरृतिर्नाम पश्चाद् द्वास्तया याति पुरञ्जनः
04250532 वैशसं नाम विषयं लुब्धकेन समन्वितः
04250541 अन्धावमीषां पौराणां निर्वाक्-पेशस्कृतावुभौ
04250542 अक्षण्वताम् अधिपतिस्ताभ्यां याति करोति च
04250551 स यर्ह्यन्तःपुर-गतो विषूचीन-समन्वितः
04250552 मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम्
04250561 एवं कर्मसु संसक्तः कामात्मा वञ्चितोऽबुधः
04250562 महिषी यद् यद् ईहेत तत् तद् एवान्ववर्तत
04250571 क्वचित् पिबन्त्यां पिबति मदिरां मद-विह्वलः
04250572 अश्नन्त्यां क्वचिद् अश्नाति जक्षत्यां सह जक्षिति
04250581 क्वचिद् गायति गायन्त्यां रुदत्यां रुदति क्वचित्
04250582 क्वचिद् धसन्त्यां हसति जल्पन्त्याम् अनु जल्पति
04250591 क्वचिद् धावति धावन्त्यां तिष्ठन्त्याम् अनु तिष्ठति
04250592 अनु शेते शयानायाम् अन्वास्ते क्वचिद् आसतीम्
04250601 क्वचिच् छृणोति शृण्वन्त्यां पश्यन्त्याम् अनु पश्यति
04250602 क्वचिज् जिघ्रति जिघ्रन्त्यां स्पृशन्त्यां स्पृशति क्वचित्
04250611 क्वचिच् च शोचतीं जायाम् अनु शोचति दीनवत्
04250612 अनु हृष्यति हृष्यन्त्यां मुदिताम् अनु मोदते
04250621 विप्रलब्धो महिष्यैवं सर्व-प्रकृति-वञ्चितः
04250622 नेच्छन्न् अनुकरोत्यज्ञः क्लैब्यात् क्रीडा-मृगो यथा

Chapter 26

0426001 नारद उवाच
04260011 स एकदा महेष्वासो रथं पञ्चाश्वम् आशु-गम्
04260012 द्वीषं द्वि-चक्रम् एकाक्षं त्रि-वेणुं पञ्च-बन्धुरम्
04260021 एक-रश्म्येक-दमनम् एक-नीडं द्वि-कूबरम्
04260022 पञ्च-प्रहरणं सप्त- वरूथं पञ्च-विक्रमम्
04260031 हैमोपस्करम् आरुह्य स्वर्ण-वर्माक्षयेषुधिः
04260032 एकादश-चमू-नाथः पञ्च-प्रस्थम् अगाद् वनम्
04260041 चचार मृगयां तत्र दृप्त आत्तेषु-कार्मुकः
04260042 विहाय जायाम् अतद्-अर्हां मृग-व्यसन-लालसः
04260051 आसुरीं वृत्तिम् आश्रित्य घोरात्मा निरनुग्रहः
04260052 न्यहनन् निशितैर्बाणैर्वनेषु वन-गोचरान्
04260061 तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान् पशून् वने
04260062 यावद्-अर्थम् अलं लुब्धो हन्याद् इति नियम्यते
04260071 य एवं कर्म नियतं विद्वान् कुर्वीत मानवः
04260072 कर्मणा तेन राजेन्द्र ज्ञानेन न स लिप्यते
04260081 अन्यथा कर्म कुर्वाणो मानारूढो निबध्यते
04260082 गुण-प्रवाह-पतितो नष्ट-प्रज्ञो व्रजत्यधः
04260091 तत्र निर्भिन्न-गात्राणां चित्र-वाजैः शिलीमुखैः
04260092 विप्लवोऽभूद् दुःखितानां दुःसहः करुणात्मनाम्
04260101 शशान् वराहान् महिषान् गवयान् रुरु-शल्यकान्
04260102 मेध्यान् अन्यांश्च विविधान् विनिघ्नन् श्रमम् अध्यगात्
04260111 ततः क्षुत्-तृट्-परिश्रान्तो निवृत्तो गृहम् एयिवान्
04260112 कृत-स्नानोचिताहारः संविवेश गत-क्लमः
04260121 आत्मानम् अर्हयां चक्रे धूपालेप-स्रग्-आदिभिः
04260122 साध्व्-अलङ्कृत-सर्वाङ्गो महिष्याम् आदधे मनः
04260131 तृप्तो हृष्टः सुदृप्तश्च कन्दर्पाकृष्ट-मानसः
04260132 न व्यचष्ट वरारोहां गृहिणीं गृह-मेधिनीम्
04260141 अन्तःपुर-स्त्रियोऽपृच्छद् विमना इव वेदिषत्

04260142 अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा
04260151 न तथैतर्हि रोचन्ते गृहेषु गृह-सम्पदः
04260152 यदि न स्याद् गृहे माता पत्नी वा पति-देवता
04260153 व्यङ्गे रथ इव प्राज्ञः को नामासीत दीनवत्
04260161 क्व वर्तते सा ललना मज्जन्तं व्यसनार्णवे
04260162 या माम् उद्धरते प्रज्ञां दीपयन्ती पदे पदे
0426017 रामा ऊचुः
04260171 नर-नाथ न जानीमस्त्वत्-प्रिया यद् व्यवस्यति
04260172 भूतले निरवस्तारे शयानां पश्य शत्रु-हन्
0426018 नारद उवाच
04260181 पुरञ्जनः स्व-महिषीं निरीक्ष्यावधुतां भुवि
04260182 तत्-सङ्गोन्मथित-ज्ञानो वैक्लव्यं परमं ययौ
04260191 सान्त्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता
04260192 प्रेयस्याः स्नेह-संरम्भ- लिङ्गम् आत्मनि नाभ्यगात्
04260201 अनुनिन्येऽथ शनकैर्वीरोऽनुनय-कोविदः
04260202 पस्पर्श पाद-युगलम् आह चोत्सङ्ग-लालिताम्
0426021 पुरञ्जन उवाच
04260211 नूनं त्वकृत-पुण्यास्ते भृत्या येष्वीश्वराः शुभे
04260212 कृतागःस्वात्मसात् कृत्वा शिक्षा-दण्डं न युञ्जते
04260221 परमोऽनुग्रहो दण्डो भृत्येषु प्रभुणार्पितः
04260222 बालो न वेद तत् तन्वि बन्धु-कृत्यम् अमर्षणः
04260231 सा त्वं मुखं सुदति सुभ्र्वनुराग-भार- । व्रीडा-विलम्ब-विलसद्-धसितावलोकम्
04260232 नीलालकालिभिरुपस्कृतम् उन्नसं नः । स्वानां प्रदर्शय मनस्विनि वल्गु-वाक्यम्
04260241 तस्मिन् दधे दमम् अहं तव वीर-पत्नि । योऽन्यत्र भूसुर-कुलात् कृत-किल्बिषस्तम्
04260242 पश्ये न वीत-भयम् उन्मुदितं त्रि-लोक्याम् । अन्यत्र वै मुर-रिपोरितरत्र दासात्
04260251 वक्त्रं न ते वितिलकं मलिनं विहर्षं । संरम्भ-भीमम् अविमृष्टम् अपेत-रागम्
04260252 पश्ये स्तनावपि शुचोपहतौ सुजातौ । बिम्बाधरं विगत-कुङ्कुम-पङ्क-रागम्
04260261 तन् मे प्रसीद सुहृदः कृत-किल्बिषस्य । स्वैरं गतस्य मृगयां व्यसनातुरस्य
04260262 का देवरं वश-गतं कुसुमास्त्र-वेग- । विस्रस्त-पौंस्नम् उशती न भजेत कृत्ये

Chapter 27

0427001 नारद उवाच
04270011 इत्थं पुरञ्जनं सध्र्यग् वशमानीय विभ्रमैः
04270012 पुरञ्जनी महाराज रेमे रमयती पतिम्
04270021 स राजा महिषीं राजन् सुस्नातां रुचिराननाम्
04270022 कृत-स्वस्त्ययनां तृप्ताम् अभ्यनन्दद् उपागताम्
04270031 तयोपगूढः परिरब्ध-कन्धरो । रहोऽनुमन्त्रैरपकृष्ट-चेतनः
04270032 न काल-रंहो बुबुधे दुरत्ययं । दिवा निशेति प्रमदा-परिग्रहः
04270041 शयान उन्नद्ध-मदो महा-मना । महार्ह-तल्पे महिषी-भुजोपधिः
04270042 ताम् एव वीरो मनुते परं यतस् । तमो-'भिभूतो न निजं परं च यत्
04270051 तयैवं रममाणस्य काम-कश्मल-चेतसः
04270052 क्षणार्धम् इव राजेन्द्र व्यतिक्रान्तं नवं वयः
04270061 तस्याम् अजनयत् पुत्रान् पुरञ्जन्यां पुरञ्जनः
04270062 शतान्येकादश विराड् आयुषोऽर्धम् अथात्यगात्
04270071 दुहितॄर्दशोत्तर-शतं पितृ-मातृ-यशस्करीः
04270072 शीलौदार्य-गुणोपेताः पौरञ्जन्यः प्रजा-पते
04270081 स पञ्चाल-पतिः पुत्रान् पितृ-वंश-विवर्धनान्
04270082 दारैः संयोजयाम् आस दुहितॄः सदृशैर्वरैः
04270091 पुत्राणां चाभवन् पुत्रा एकैकस्य शतं शतम्
04270092 यैर्वै पौरञ्जनो वंशः पञ्चालेषु समेधितः
04270101 तेषु तद्-रिक्थ-हारेषु गृह-कोशानुजीविषु
04270102 निरूढेन ममत्वेन विषयेष्वन्वबध्यत
04270111 ईजे च क्रतुभिर्घोरैर्दीक्षितः पशु-मारकैः
04270112 देवान् पितॄन् भूत-पतीन् नाना-कामो यथा भवान्
04270121 युक्तेष्वेवं प्रमत्तस्य कुटुम्बासक्त-चेतसः
04270122 आससाद स वै कालो योऽप्रियः प्रिय-योषिताम्
04270131 चण्डवेग इति ख्यातो गन्धर्वाधिपतिर्नृप
04270132 गन्धर्वास्तस्य बलिनः षष्ट्य्-उत्तर-शत-त्रयम्
04270141 गन्धर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः

04270142 परिवृत्त्या विलुम्पन्ति सर्व-काम-विनिर्मिताम्
04270151 ते चण्डवेगानुचराः पुरञ्जन-पुरं यदा
04270152 हर्तुम् आरेभिरे तत्र प्रत्यषेधत् प्रजागरः
04270161 स सप्तभिः शतैरेको विंशत्या च शतं समाः
04270162 पुरञ्जन-पुराध्यक्षो गन्धर्वैर्युयुधे बली
04270171 क्षीयमाणे स्व-सम्बन्धे एकस्मिन् बहुभिर्युधा
04270172 चिन्तां परां जगामार्तः स-राष्ट्र-पुर-बान्धवः
04270181 स एव पुर्यां मधु-भुक् पञ्चालेषु स्व-पार्षदैः
04270182 उपनीतं बलिं गृह्णन् स्त्री-जितो नाविदद् भयम्
04270191 कालस्य दुहिता काचित् त्रि-लोकीं वरम् इच्छती
04270192 पर्यटन्ती न बर्हिष्मन् प्रत्यनन्दत कश्चन
04270201 दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा
04270202 या तुष्टा राजर्षये तु वृतादात् पूरवे वरम्
04270211 कदाचिद् अटमाना सा ब्रह्म-लोकान् महीं गतम्
04270212 वव्रे बृहद्-व्रतं मां तु जानती काम-मोहिता
04270221 मयि संरभ्य विपुल- मदाच् छापं सुदुःसहम्
04270222 स्थातुम् अर्हसि नैकत्र मद्-याच्'आ-विमुखो मुने
04270231 ततो विहत-सङ्कल्पा कन्यका यवनेश्वरम्
04270232 मयोपदिष्टम् आसाद्य वव्रे नाम्ना भयं पतिम्
04270241 ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिम्
04270242 सङ्कल्पस्त्वयि भूतानां कृतः किल न रिष्यति
04270251 द्वाविमावनुशोचन्ति बालावसद्-अवग्रहौ
04270252 यल् लोक-शास्त्रोपनतं न राति न तद् इच्छति
04270261 अथो भजस्व मां भद्र भजन्तीं मे दयां कुरु
04270262 एतावान् पौरुषो धर्मो यद् आर्तान् अनुकम्पते
04270271 काल-कन्योदित-वचो निशम्य यवनेश्वरः
04270272 चिकीर्षुर्देव-गुह्यं स सस्मितं ताम् अभाषत
04270281 मया निरूपितस्तुभ्यं पतिरात्म-समाधिना
04270282 नाभिनन्दति लोकोऽयं त्वाम् अभद्राम् असम्मताम्
04270291 त्वम् अव्यक्त-गतिर्भुङ्क्ष्व लोकं कर्म-विनिर्मितम्
04270292 या हि मे पृतना-युक्ता प्रजा-नाशं प्रणेष्यसि
04270301 प्रज्वारोऽयं मम भ्राता त्वं च मे भगिनी भव
04270302 चराम्युभाभ्यां लोकेऽस्मिन्न् अव्यक्तो भीम-सैनिकः

Chapter 28

0428001 नारद उवाच
04280011 सैनिका भय-नाम्नो ये बर्हिष्मन् दिष्ट-कारिणः
04280012 प्रज्वार-काल-कन्याभ्यां विचेरुरवनीम् इमाम्
04280021 त एकदा तु रभसा पुरञ्जन-पुरीं नृप
04280022 रुरुधुर्भौम-भोगाढ्यां जरत्-पन्नग-पालिताम्
04280031 काल-कन्यापि बुभुजे पुरञ्जन-पुरं बलात्
04280032 ययाभिभूतः पुरुषः सद्यो निःसारताम् इयात्
04280041 तयोपभुज्यमानां वै यवनाः सर्वतो-दिशम्
04280042 द्वार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीम्
04280051 तस्यां प्रपीड्यमानायाम् अभिमानी पुरञ्जनः
04280052 अवापोरु-विधांस्तापान् कुटुम्बी ममताकुलः
04280061 कन्योपगूढो नष्ट-श्रीः कृपणो विषयात्मकः
04280062 नष्ट-प्रज्ञो हृतैश्वर्यो गन्धर्व-यवनैर्बलात्
04280071 विशीर्णां स्व-पुरीं वीक्ष्य प्रतिकूलान् अनादृतान्
04280072 पुत्रान् पौत्रानुगामात्यान् जायां च गत-सौहृदाम्
04280081 आत्मानं कन्यया ग्रस्तं पञ्चालान् अरि-दूषितान्
04280082 दुरन्त-चिन्ताम् आपन्नो न लेभे तत्-प्रतिक्रियाम्
04280091 कामान् अभिलषन् दीनो यात-यामांश्च कन्यया
04280092 विगतात्म-गति-स्नेहः पुत्र-दारांश्च लालयन्
04280101 गन्धर्व-यवनाक्रान्तां काल-कन्योपमर्दिताम्
04280102 हातुं प्रचक्रमे राजा तां पुरीम् अनिकामतः
04280111 भय-नाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः
04280112 ददाह तां पुरीं कृत्स्नां भ्रातुः प्रिय-चिकीर्षया
04280121 तस्यां सन्दह्यमानायां सपौरः सपरिच्छदः
04280122 कौटुम्बिकः कुटुम्बिन्या उपातप्यत सान्वयः
04280131 यवनोपरुद्धायतनो ग्रस्तायां काल-कन्यया
04280132 पुर्यां प्रज्वार-संसृष्टः पुर-पालोऽन्वतप्यत
04280141 न शेके सोऽवितुं तत्र पुरु-कृच्छ्रोरु-वेपथुः

04280142 गन्तुम् ऐच्छत् ततो वृक्ष- कोटराद् इव सानलात्
04280151 शिथिलावयवो यर्हि गन्धर्वैर्हृत-पौरुषः
04280152 यवनैररिभी राजन्न् उपरुद्धो रुरोद ह
04280161 दुहितॄः पुत्र-पौत्रांश्च जामि-जामातृ-पार्षदान्
04280162 स्वत्वावशिष्टं यत् किञ्चिद् गृह-कोश-परिच्छदम्
04280171 अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही
04280172 दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते
04280181 लोकान्तरं गतवति मय्यनाथा कुटुम्बिनी
04280182 वर्तिष्यते कथं त्वेषा बालकान् अनुशोचती
04280191 न मय्यनाशिते भुङ्क्ते नास्नाते स्नाति मत्-परा
04280192 मयि रुष्टे सुसन्त्रस्ता भर्त्सिते यत-वाग् भयात्
04280201 प्रबोधयति माविज्ञं व्युषिते शोक-कर्शिता
04280202 वर्त्मैतद् गृह-मेधीयं वीर-सूरपि नेष्यति
04280211 कथं नु दारका दीना दारकीर्वापरायणाः
04280212 वर्तिष्यन्ते मयि गते भिन्न-नाव इवोदधौ
04280221 एवं कृपणया बुद्ध्या शोचन्तम् अतद्-अर्हणम्
04280222 ग्रहीतुं कृत-धीरेनं भय-नामाभ्यपद्यत
04280231 पशुवद् यवनैरेष नीयमानः स्वकं क्षयम्
04280232 अन्वद्रवन्न् अनुपथाः शोचन्तो भृशम् आतुराः
04280241 पुरीं विहायोपगत उपरुद्धो भुजङ्गमः
04280242 यदा तम् एवानु पुरी विशीर्णा प्रकृतिं गता
04280251 विकृष्यमाणः प्रसभं यवनेन बलीयसा
04280252 नाविन्दत् तमसाविष्टः सखायं सुहृदं पुरः
04280261 तं यज्ञ-पशवोऽनेन संज्ञप्ता येऽदयालुना
04280262 कुठारैश्चिच्छिदुः क्रुद्धाः स्मरन्तोऽमीवम् अस्य तत्
04280271 अनन्त-पारे तमसि मग्नो नष्ट-स्मृतिः समाः
04280272 शाश्वतीरनुभूयार्तिं प्रमदा-सङ्ग-दूषितः
04280281 ताम् एव मनसा गृह्णन् बभूव प्रमदोत्तमा
04280282 अनन्तरं विदर्भस्य राज-सिंहस्य वेश्मनि
04280291 उपयेमे वीर्य-पणां वैदर्भीं मलयध्वजः
04280292 युधि निर्जित्य राजन्यान् पाण्ड्यः पर-पुरञ्जयः
04280301 तस्यां स जनयां चक्र आत्मजाम् असितेक्षणाम्
04280302 यवीयसः सप्त सुतान् सप्त द्रविड-भूभृतः
04280311 एकैकस्याभवत् तेषां राजन्न् अर्बुदम् अर्बुदम्
04280312 भोक्ष्यते यद्-वंश-धरैर्मही मन्वन्तरं परम्
04280321 अगस्त्यः प्राग् दुहितरम् उपयेमे धृत-व्रताम्
04280322 यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः
04280331 विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः
04280332 आरिराधयिषुः कृष्णं स जगाम कुलाचलम्
04280341 हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा

04280342 अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनी-करम्
04280351 तत्र चन्द्रवसा नाम ताम्रपर्णी वटोदका
04280352 तत्-पुण्य-सलिलैर्नित्यम् उभयत्रात्मनो मृजन्
04280361 कन्दाष्टिभिर्मूल-फलैः पुष्प-पर्णैस्तृणोदकैः
04280362 वर्तमानः शनैर्गात्र- कर्शनं तप आस्थितः
04280371 शीतोष्ण-वात-वर्षाणि क्षुत्-पिपासे प्रियाप्रिये
04280372 सुख-दुःखे इति द्वन्द्वान्यजयत् सम-दर्शनः
04280381 तपसा विद्यया पक्क- कषायो नियमैर्यमैः
04280382 युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः
04280391 आस्ते स्थाणुरिवैकत्र दिव्यं वर्ष-शतं स्थिरः
04280392 वासुदेवे भगवति नान्यद् वेदोद्वहन् रतिम्
04280401 स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि
04280402 विद्वान् स्वप्न इवामर्श- साक्षिणं विरराम ह
04280411 साक्षाद् भगवतोक्तेन गुरुणा हरिणा नृप
04280412 विशुद्ध-ज्ञान-दीपेन स्फुरता विश्वतो-मुखम्
04280421 परे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि
04280422 वीक्षमाणो विहायेक्षाम् अस्माद् उपरराम ह
04280431 पतिं परम-धर्म-ज्ञं वैदर्भी मलयध्वजम्
04280432 प्रेम्णा पर्यचरद् धित्वा भोगान् सा पति-देवता
04280441 चीर-वासा व्रत-क्षामा वेणी-भूत-शिरोरुहा
04280442 बभावुप पतिं शान्ता शिखा शान्तम् इवानलम्
04280451 अजानती प्रियतमं यदोपरतम् अङ्गना
04280452 सुस्थिरासनम् आसाद्य यथा-पूर्वम् उपाचरत्
04280461 यदा नोपलभेताङ्घ्रावूष्माणं पत्युरर्चती
04280462 आसीत् संविग्न-हृदया यूथ-भ्रष्टा मृगी यथा
04280471 आत्मानं शोचती दीनम् अबन्धुं विक्लवाश्रुभिः
04280472 स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा
04280481 उत्तिष्ठोत्तिष्ठ राजर्षे इमाम् उदधि-मेखलाम्
04280482 दस्युभ्यः क्षत्र-बन्धुभ्यो बिभ्यतीं पातुम् अर्हसि
04280491 एवं विलपन्ती बाला विपिनेऽनुगता पतिम्
04280492 पतिता पादयोर्भर्तू रुदत्यश्रूण्यवर्तयत्
04280501 चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम्
04280502 आदीप्य चानुमरणे विलपन्ती मनो दधे
04280511 तत्र पूर्वतरः कश्चित् सखा ब्राह्मण आत्मवान्
04280512 सान्त्वयन् वल्गुना साम्ना ताम् आह रुदतीं प्रभो
0428052 ब्राह्मण उवाच
04280521 का त्वं कस्यासि को वायं शयानो यस्य शोचसि
04280522 जानासि किं सखायं मां येनाग्रे विचचर्थ ह
04280531 अपि स्मरसि चात्मानम् अविज्ञात-सखं सखे
04280532 हित्वा मां पदम् अन्विच्छन् भौम-भोग-रतो गतः

04280541 हंसावहं च त्वं चार्य सखायौ मानसायनौ
04280542 अभूताम् अन्तरा वौकः सहस्र-परिवत्सरान्
04280551 स त्वं विहाय मां बन्धो गतो ग्राम्य-मतिर्महीम्
04280552 विचरन् पदम् अद्राक्षीः कयाचिन् निर्मितं स्त्रिया
04280561 पञ्चारामं नव-द्वारम् एक-पालं त्रि-कोष्ठकम्
04280562 षट्-कुलं पञ्च-विपणं पञ्च-प्रकृति स्त्री-धवम्
04280571 पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो
04280572 तेजो-'ब्-अन्नानि कोष्ठानि कुलम् इन्द्रिय-सङ्गहः
04280581 विपणस्तु क्रिया-शक्तिर्भूत-प्रकृतिरव्यया
04280582 शक्त्य्-अधीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते
04280591 तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुत-स्मृतिः
04280592 तत्-सङ्गाद् ईदृशीं प्राप्तो दशां पापीयसीं प्रभो
04280601 न त्वं विदर्भ-दुहिता नायं वीरः सुहृत् तव
04280602 न पतिस्त्वं पुरञ्जन्या रुद्धो नव-मुखे यया
04280611 माया ह्येषा मया सृष्टा यत् पुमांसं स्त्रियं सतीम्
04280612 मन्यसे नोभयं यद् वै हंसौ पश्यावयोर्गतिम्
04280621 अहं भवान् न चान्यस्त्वं त्वम् एवाहं विचक्ष्व भोः
04280622 न नौ पश्यन्ति कवयश्छिद्रं जातु मनाग् अपि
04280631 यथा पुरुष आत्मानम् एकम् आदर्श-चक्षुषोः
04280632 द्विधाभूतम् अवेक्षेत तथैवान्तरम् आवयोः
04280641 एवं स मानसो हंसो हंसेन प्रतिबोधितः
04280642 स्व-स्थस्तद्-व्यभिचारेण नष्टाम् आप पुनः स्मृतिम्
04280651 बर्हिष्मन्न् एतद् अध्यात्मं पारोक्ष्येण प्रदर्शितम्
04280652 यत् परोक्ष-प्रियो देवो भगवान् विश्व-भावनः

Chapter 29

0429001 प्राचीनबर्हिरुवाच
04290011 भगवंस्ते वचोऽस्माभिर्न सम्यग् अवगम्यते
04290012 कवयस्तद् विजानन्ति न वयं कर्म-मोहिताः
0429002 नारद उवाच
04290021 पुरुषं पुरञ्जनं विद्याद् यद् व्यनक्त्यात्मनः पुरम्
04290022 एक-द्वि-त्रि-चतुष्-पादं बहु-पादम् अपादकम्
04290031 योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः
04290032 यन् न विज्ञायते पुम्भिर्नामभिर्वा क्रिया-गुणैः
04290041 यदा जिघृक्षन् पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान्
04290042 नव-द्वारं द्वि-हस्ताङ्घ्रि तत्रामनुत साध्विति
04290051 बुद्धिं तु प्रमदां विद्यान् ममाहम् इति यत्-कृतम्
04290052 याम् अधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽक्षभिर्गुणान्
04290061 सखाय इन्द्रिय-गणा ज्ञानं कर्म च यत्-कृतम्
04290062 सख्यस्तद्-वृत्तयः प्राणः पञ्च-वृत्तिर्यथोरगः
04290071 बृहद्-बलं मनो विद्याद् उभयेन्द्रिय-नायकम्
04290072 पञ्चालाः पञ्च विषया यन्-मध्ये नव-खं पुरम्
04290081 अक्षिणी नासिके कर्णौ मुखं शिश्न-गुदाविति
04290082 द्वे द्वे द्वारौ बहिर्याति यस्तद्-इन्द्रिय-संयुतः
04290091 अक्षिणी नासिके आस्यम् इति पञ्च पुरः कृताः
04290092 दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः
04290101 पश्चिमे इत्यधो द्वारौ गुदं शिश्नम् इहोच्यते
04290102 खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते
04290103 रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः
04290111 नलिनी नालिनी नासे गन्धः सौरभ उच्यते
04290112 घ्राणोऽवधूतो मुख्यास्यं विपणो वाग् रसविद् रसः
04290121 आपणो व्यवहारोऽत्र चित्रम् अन्धो बहूदनम्
04290122 पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः
04290131 प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चाल-संज्ञितम्

04290132 पितृ-यानं देव-यानं श्रोत्राच् छ्रुत-धराद् व्रजेत्
04290141 आसुरी मेढ्रम् अर्वाग्-द्वार्व्यवायो ग्रामिणां रतिः
04290142 उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते
04290151 वैशसं नरकं पायुर्लुब्धकोऽन्धौ तु मे शृणु
04290152 हस्त-पादौ पुमांस्ताभ्यां युक्तो याति करोति च
04290161 अन्तः-पुरं च हृदयं विषूचिर्मन उच्यते
04290162 तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्-गुणैः
04290171 यथा यथा विक्रियते गुणाक्तो विकरोति वा
04290172 तथा तथोपद्रष्टात्मा तद्-वृत्तीरनुकार्यते
04290181 देहो रथस्त्विन्द्रियाश्वः संवत्सर-रयोऽगतिः
04290182 द्वि-कर्म-चक्रस्त्रि-गुण- ध्वजः पञ्चासु-बन्धुरः
04290191 मनो-रश्मिर्बुद्धि-सूतो हृन्-नीडो द्वन्द्व-कूबरः
04290192 पञ्चेन्द्रियार्थ-प्रक्षेपः सप्त-धातु-वरूथकः
04290201 आकूतिर्विक्रमो बाह्यो मृग-तृष्णां प्रधावति
04290202 एकादशेन्द्रिय-चमूः पञ्च-सूना-विनोद-कृत्
04290211 संवत्सरश्चण्डवेगः कालो येनोपलक्षितः
04290212 तस्याहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः
04290213 हरन्त्यायुः परिक्रान्त्या षष्ट्य्-उत्तर-शत-त्रयम्
04290221 काल-कन्या जरा साक्षाल् लोकस्तां नाभिनन्दति
04290222 स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः
04290231 आधयो व्याधयस्तस्य सैनिका यवनाश्चराः
04290232 भूतोपसर्गाशु-रयः प्रज्वारो द्वि-विधो ज्वरः
04290241 एवं बहु-विधैर्दुःखैर्दैव-भूतात्म-सम्भवैः
04290242 क्लिश्यमानः शतं वर्षं देहे देही तमो-वृतः
04290251 प्राणेन्द्रिय-मनो-धर्मान् आत्मन्यध्यस्य निर्गुणः
04290252 शेते काम-लवान् ध्यायन् ममाहम् इति कर्म-कृत्
04290261 यदात्मानम् अविज्ञाय भगवन्तं परं गुरुम्
04290262 पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्व-दृक्
04290271 गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः
04290272 शुक्लं कृष्णं लोहितं वा यथा-कर्माभिजायते
04290281 शुक्लात् प्रकाश-भूयिष्ठाँल्लोकान् आप्नोति कर्हिचित्
04290282 दुःखोदर्कान् क्रियायासांस्तमः-शोकोत्कटान् क्वचित्
04290291 क्वचित् पुमान् क्वचिच् च स्त्री क्वचिन् नोभयम् अन्ध-धीः
04290292 देवो मनुष्यस्तिर्यग् वा यथा-कर्म-गुणं भवः
04290301 क्षुत्-परीतो यथा दीनः सारमेयो गृहं गृहम्
04290302 चरन् विन्दति यद्-दिष्टं दण्डम् ओदनम् एव वा
04290311 तथा कामाशयो जीव उच्चावच-पथा भ्रमन्
04290312 उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम्
04290321 दुःखेष्वेकतरेणापि दैव-भूतात्म-हेतुषु
04290322 जीवस्य न व्यवच्छेदः स्याच् चेत् तत्-तत्-प्रतिक्रिया

04290331 यथा हि पुरुषो भारं शिरसा गुरुम् उद्वहन्
04290332 तं स्कन्धेन स आधत्ते तथा सर्वाः प्रतिक्रियाः
04290341 नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम्
04290342 द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ
04290351 अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते
04290352 मनसा लिङ्ग-रूपेण स्वप्ने विचरतो यथा
04290361 अथात्मनोऽर्थ-भूतस्य यतोऽनर्थ-परम्परा
04290362 संसृतिस्तद्-व्यवच्छेदो भक्त्या परमया गुरौ
04290371 वासुदेवे भगवति भक्ति-योगः समाहितः
04290372 सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति
04290381 सोऽचिराद् एव राजर्षे स्याद् अच्युत-कथाश्रयः
04290382 शृण्वतः श्रद्दधानस्य नित्यदा स्याद् अधीयतः
04290391 यत्र भागवता राजन् साधवो विशदाशयाः
04290392 भगवद्-गुणानुकथन- श्रवण-व्यग्र-चेतसः
04290401 तस्मिन् महन्-मुखरिता मधुभिच्- ।चरित्र-पीयूष-शेष-सरितः परितः स्रवन्ति
04290402 ता ये पिबन्त्यवितृषो नृप गाढ-कर्णैस् ।तान् न स्पृशन्त्यशन-तृड्-भय-शोक-मोहाः
04290411 एतैरुपद्रुतो नित्यं जीव-लोकः स्वभावजैः
04290412 न करोति हरेर्नूनं कथामृत-निधौ रतिम्
04290421 प्रजापति-पतिः साक्षाद् भगवान् गिरिशो मनुः
04290422 दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः
04290431 मरीचिरत्र्य्-अङ्गिरसौ पुलस्त्यः पुलहः क्रतुः
04290432 भृगुर्वसिष्ठ इत्येते मद्-अन्ता ब्रह्म-वादिनः
04290441 अद्यापि वाचस्-पतयस्तपो-विद्या-समाधिभिः
04290442 पश्यन्तोऽपि न पश्यन्ति पश्यन्तं परमेश्वरम्
04290451 शब्द-ब्रह्मणि दुष्पारे चरन्त उरु-विस्तरे
04290452 मन्त्र-लिङ्गैर्व्यवच्छिन्नं भजन्तो न विदुः परम्
0429046x *सर्वेषाम् एव जन्तूनां सततं देह-पोषणे
0429046y *अस्ति प्रज्ञा समायत्ता को विशेषस्तदा नृणाम्
0429047x *लब्ध्वेहान्ते मनुष्यत्वं हित्वा देहाद्य्-असद्-ग्रहम्
0429047y *आत्म-सृत्या विहायेदं जीवात्मा स विशिष्यते
04290461 यदा यस्यानुगृह्णाति भगवान् आत्म-भावितः
04290462 स जहाति मतिं लोके वेदे च परिनिष्ठिताम्
04290471 तस्मात् कर्मसु बर्हिष्मन्न् अज्ञानाद् अर्थ-काशिषु
04290472 मार्थ-दृष्टिं कृथाः श्रोत्र- स्पर्शिष्वस्पृष्ट-वस्तुषु
04290481 स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः
04290482 आहुर्धूम्र-धियो वेदं सकर्मकम् अतद्-विदः
04290491 आस्तीर्य दर्भैः प्राग्-अग्रैः कार्त्स्न्येन क्षिति-मण्डलम्
04290492 स्तब्धो बृहद्-वधान् मानी कर्म नावैषि यत् परम्

04290493 तत् कर्म हरि-तोषं यत् सा विद्या तन्-मतिर्यया
04290501 हरिर्देह-भृताम् आत्मा स्वयं प्रकृतिरीश्वरः
04290502 तत्-पाद-मूलं शरणं यतः क्षेमो नृणाम् इह
04290511 स वै प्रियतमश्चात्मा यतो न भयम् अण्वपि
04290512 इति वेद स वै विद्वान् यो विद्वान् स गुरुर्हरिः
0429052 नारद उवाच
04290521 प्रश्न एवं हि सञ्छिन्नो भवतः पुरुषर्षभ
04290522 अत्र मे वदतो गुह्यं निशामय सुनिश्चितम्
04290531 क्षुद्रं चरं सुमनसां शरणे मिथित्वा
04290532 रक्तं षडङ्घ्रि-गण-सामसु लुब्ध-कर्णम्
04290533 अग्रे वृकान् असु-तृपोऽविगणय्य यान्तं
04290534 पृष्ठे मृगं मृगय लुब्धक-बाण-भिन्नम्
04290541 [अस्यार्थः] सुमनः-सम-धर्मणां स्त्रीणां शरण आश्रमे पुष्प-मधु-गन्धवत् क्षुद्रतमं काम्य-कर्म-विपाकजं काम-सुख-लवं जैह्व्यौपस्थ्यादि विचिन्वन्तं मिथुनी-भूय तद्-अभिनिवेशित-मनसं षडङ्घ्रि-गण-साम-गीतवद् अतिमनोहर-वनितादि-जनालापेष्वतितराम् अतिप्रलोभित-कर्णम् अग्रे वृक-यूथवद् आत्मन आयुर्हरतोऽहो-रात्रान् तान् काल-लव-विशेषान् अविगणय्य गृहेषु विहरन्तं पृष्ठत एव परोक्षम् अनुप्रवृत्तो लुब्धकः कृतान्तोऽन्तः शरेण यम् इह पराविध्यति तम् इमम् आत्मानम् अहो राजन् भिन्न-हृदयं द्रष्टुम् अर्हसीति
04290551 स त्वं विचक्ष्य मृग-चेष्टितम् आत्मनोऽन्तश्
04290552 चित्तं नियच्छ हृदि कर्ण-धुनीं च चित्ते
04290553 जह्यङ्गनाश्रमम् असत्तम-यूथ-गाथं
04290554 प्रीणीहि हंस-शरणं विरम क्रमेण
0429056 राजोवाच
04290561 श्रुतम् अन्वीक्षितं ब्रह्मन् भगवान् यद् अभाषत
04290562 नैतज् जानन्त्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि
04290571 संशयोऽत्र तु मे विप्र सञ्छिन्नस्तत्-कृतो महान्
04290572 ऋषयोऽपि हि मुह्यन्ति यत्र नेन्द्रिय-वृत्तयः
04290581 कर्माण्यारभते येन पुमान् इह विहाय तम्
04290582 अमुत्रान्येन देहेन जुष्टानि स यद् अश्नुते
04290591 इति वेद-विदां वादः श्रूयते तत्र तत्र ह
04290592 कर्म यत् क्रियते प्रोक्तं परोक्षं न प्रकाशते
0429060 नारद उवाच
04290601 येनैवारभते कर्म तेनैवामुत्र तत् पुमान्
04290602 भुङ्क्ते ह्यव्यवधानेन लिङ्गेन मनसा स्वयम्
04290611 शयानम् इमम् उत्सृज्य श्वसन्तं पुरुषो यथा
04290612 कर्मात्मन्याहितं भुङ्क्ते तादृशेनेतरेण वा
04290621 ममैते मनसा यद् यद् असावहम् इति ब्रुवन्
04290622 गृह्णीयात् तत् पुमान् राद्धं कर्म येन पुनर्भवः

04290631 यथानुमीयते चित्तम् उभयैरिन्द्रियेहितैः
04290632 एवं प्राग्-देहजं कर्म लक्ष्यते चित्त-वृत्तिभिः
04290641 नानुभूतं क्व चानेन देहेनादृष्टम् अश्रुतम्
04290642 कदाचिद् उपलभ्येत यद् रूपं यादृग् आत्मनि
04290651 तेनास्य तादृशं राजँल्लिङ्गिनो देह-सम्भवम्
04290652 श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुम् अर्हति
04290661 मन एव मनुष्यस्य पूर्व-रूपाणि शंसति
04290662 भविष्यतश्च भद्रं ते तथैव न भविष्यतः
04290671 अदृष्टम् अश्रुतं चात्र क्वचिन् मनसि दृश्यते
04290672 यथा तथानुमन्तव्यं देश-काल-क्रियाश्रयम्
04290681 सर्वे क्रमानुरोधेन मनसीन्द्रिय-गोचराः
04290682 आयान्ति बहुशो यान्ति सर्वे समनसो जनाः
04290691 सत्त्वैक-निष्ठे मनसि भगवत्-पार्श्व-वर्तिनि
04290692 तमश्चन्द्रमसीवेदम् उपरज्यावभासते
04290701 नाहं ममेति भावोऽयं पुरुषे व्यवधीयते
04290702 यावद् बुद्धि-मनो-'क्षार्थ- गुण-व्यूहो ह्यनादिमान्
04290711 सुप्ति-मूर्च्छोपतापेषु प्राणायन-विघाततः
04290712 नेहतेऽहम् इति ज्ञानं मृत्यु-प्रज्वारयोरपि
04290721 गर्भे बाल्येऽप्यपौष्कल्याद् एकादश-विधं तदा
04290722 लिङ्गं न दृश्यते यूनः कुह्वां चन्द्रमसो यथा
04290731 अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते
04290732 ध्यायतो विषयान् अस्य स्वप्नेऽनर्थागमो यथा
04290741 एवं पञ्च-विधं लिङ्गं त्रि-वृत् षोडश विस्तृतम्
04290742 एष चेतनया युक्तो जीव इत्यभिधीयते
04290751 अनेन पुरुषो देहान् उपादत्ते विमुञ्चति
04290752 हर्षं शोकं भयं दुःखं सुखं चानेन विन्दति
0429076x *भक्तिः कृष्णे दया जीवेष्वकुण्ठ-ज्ञानम् आत्मनि
0429076y *यदि स्याद् आत्मनो भूयाद् अपवर्गस्तु संसृतेः
0429077x *अदृष्टं दृष्टवन् नङ्क्षेद् भूतं स्वप्नवद् अन्यथा
0429077y *भूतं भवद् भविष्यच् च सुप्तं सर्व-रहो-रहः
04290761 यथा तृण-जलूकेयं नापयात्यपयाति च
04290762 न त्यजेन् म्रियमाणोऽपि प्राग्-देहाभिमतिं जनः
04290771 यावद् अन्यं न विन्देत व्यवधानेन कर्मणाम्
04290772 मन एव मनुष्येन्द्र भूतानां भव-भावनम्
04290781 यदाक्षैश्चरितान् ध्यायन् कर्माण्याचिनुतेऽसकृत्
04290782 सति कर्मण्यविद्यायां बन्धः कर्मण्यनात्मनः
04290791 अतस्तद् अपवादार्थं भज सर्वात्मना हरिम्
04290792 पश्यंस्तद्-आत्मकं विश्वं स्थित्य्-उत्पत्त्य्-अप्यया यतः
0429080 मैत्रेय उवाच
04290801 भागवत-मुख्यो भगवान् नारदो हंसयोर्गतिम्

04290802 प्रदर्श्य ह्यमुम् आमन्त्र्य सिद्ध-लोकं ततोऽगमत्
04290811 प्राचीनबर्हीं राजर्षिः प्रजा-सर्गाभिरक्षणे
04290812 आदिश्य पुत्रान् अगमत् तपसे कपिलाश्रमम्
04290821 तत्रैकाग्र-मना धीरो गोविन्द-चरणाम्बुजम्
04290822 विमुक्त-सङ्गोऽनुभजन् भक्त्या तत्-साम्यताम् अगात्
04290831 एतद् अध्यात्म-पारोक्ष्यं गीतं देवर्षिणानघ
04290832 यः श्रावयेद् यः शृणुयात् स लिङ्गेन विमुच्यते
04290841 एतन् मुकुन्द-यशसा भुवनं पुनानं
04290842 देवर्षि-वर्य-मुख-निःसृतम् आत्म-शौचम्
04290843 यः कीर्त्यमानम् अधिगच्छति पारमेष्ठ्यं
04290844 नास्मिन् भवे भ्रमति मुक्त-समस्त-बन्धः
04290851 अध्यात्म-पारोक्ष्यम् इदं मयाधिगतम् अद्भुतम्
04290852 एवं स्त्रियाश्रमः पुंसश्छिन्नोऽमुत्र च संशयः

Chapter 30

0430001 विदुर उवाच
04300011 ये त्वयाभिहिता ब्रह्मन् सुताः प्राचीनबर्हिषः
04300012 ते रुद्र-गीतेन हरिं सिद्धिम् आपुः प्रतोष्य काम्
04300021 किं बार्हस्पत्येह परत्र वाथ । कैवल्य-नाथ-प्रिय-पार्श्व-वर्तिनः
04300022 आसाद्य देवं गिरिशं यदृच्छया । प्रापुः परं नूनम् अथ प्रचेतसः
0430003 मैत्रेय उवाच
04300031 प्रचेतसोऽन्तरुदधौ पितुरादेश-कारिणः
04300032 अप-यज्ञेन तपसा पुरञ्जनम् अतोषयन्
04300041 दश-वर्ष-सहस्रान्ते पुरुषस्तु सनातनः
04300042 तेषाम् आविरभूत् कृच्छ्रं शान्तेन शमयन् रुचा
04300051 सुपर्ण-स्कन्धम् आरूढो मेरु-शृङ्गम् इवाम्बुदः
04300052 पीत-वासा मणि-ग्रीवः कुर्वन् वितिमिरा दिशः
04300061 काशिष्णुना कनक-वर्ण-विभूषणेन
04300062 भ्राजत्-कपोल-वदनो विलसत्-किरीटः
04300063 अष्टायुधैरनुचरैर्मुनिभिः सुरेन्द्रैर्
04300064 आसेवितो गरुड-किन्नर-गीत-कीर्तिः
04300071 पीनायताष्ट-भुज-मण्डल-मध्य-लक्ष्म्या
04300072 स्पर्धच्-छ्रिया परिवृतो वन-मालयाद्यः
04300073 बर्हिष्मतः पुरुष आह सुतान् प्रपन्नान्
04300074 पर्जन्य-नाद-रुतया सघृणावलोकः
0430008 श्री-भगवान् उवाच
04300081 वरं वृणीध्वं भद्रं वो यूयं मे नृप-नन्दनाः
04300082 सौहार्देनापृथग्-धर्मास्तुष्टोऽहं सौहृदेन वः
04300091 योऽनुस्मरति सन्ध्यायां युष्मान् अनुदिनं नरः
04300092 तस्य भ्रातृष्वात्म-साम्यं तथा भूतेषु सौहृदम्
04300101 ये तु मां रुद्र-गीतेन सायं प्रातः समाहिताः
04300102 स्तुवन्त्यहं काम-वरान् दास्ये प्रज्ञां च शोभनाम्
04300111 यद् यूयं पितुरादेशम् अग्रहीष्ट मुदान्विताः

04300112 अथो व उशती कीर्तिर्लोकान् अनु भविष्यति
04300121 भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः
04300122 य एताम् आत्म-वीर्येण त्रि-लोकीं पूरयिष्यति
04300131 कण्डोः प्रम्लोचया लब्धा कन्या कमल-लोचना
04300132 तां चापविद्धां जगृहुर्भूरुहा नृप-नन्दनाः
04300141 क्षुत्-क्षामाया मुखे राजा सोमः पीयूष-वर्षिणीम्
04300142 देशिनीं रोदमानाया निदधे स दयान्वितः
04300151 प्रजा-विसर्ग आदिष्टाः पित्रा माम् अनुवर्तता
04300152 तत्र कन्यां वरारोहां ताम् उद्वहत मा चिरम्
04300161 अपृथग्-धर्म-शीलानां सर्वेषां वः सुमध्यमा
04300162 अपृथग्-धर्म-शीलेयं भूयात् पत्न्यर्पिताशया
04300171 दिव्य-वर्ष-सहस्राणां सहस्रम् अहतौजसः
04300172 भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान् मम
04300181 अथ मय्यनपायिन्या भक्त्या पक्व-गुणाशयाः
04300182 उपयास्यथ मद्-धाम निर्विद्य निरयाद् अतः
04300191 गृहेष्वाविशतां चापि पुंसां कुशल-कर्मणाम्
04300192 मद्-वार्ता-यात-यामानां न बन्धाय गृहा मताः
04300201 नव्यवद् धृदये यज् ज्ञो ब्रह्मैतद् ब्रह्म-वादिभिः
04300202 न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः
0430021 मैत्रेय उवाच
04300211 एवं ब्रुवाणं पुरुषार्थ-भाजनं । जनार्दनं प्राञ्जलयः प्रचेतसः
04300212 तद्-दर्शन-ध्वस्त-तमो-रजो-मला । गिरागृणन् गद्गदया सुहृत्तमम्
0430022 प्रचेतस ऊचुः
04300221 नमो नमः क्लेश-विनाशनाय । निरूपितोदार-गुणाह्वयाय
04300222 मनो-वचो-वेग-पुरो-जवाय । सर्वाक्ष-मार्गैरगताध्वने नमः
04300231 शुद्धाय शान्ताय नमः स्व-निष्ठया । मनस्यपार्थं विलसद्-द्वयाय
04300232 नमो जगत्-स्थान-लयोदयेषु । गृहीत-माया-गुण-विग्रहाय
04300241 नमो विशुद्ध-सत्त्वाय हरये हरि-मेधसे
04300242 वासुदेवाय कृष्णाय प्रभवे सर्व-सात्वताम्
04300251 नमः कमल-नाभाय नमः कमल-मालिने
04300252 नमः कमल-पादाय नमस्ते कमलेक्षण
04300261 नमः कमल-किञ्जल्क- पिशङ्गामल-वाससे
04300262 सर्व-भूत-निवासाय नमोऽयुङ्क्ष्महि साक्षिणे
04300271 रूपं भगवता त्वेतद् अशेष-क्लेश-सङ्क्षयम्
04300272 आविष्कृतं नः क्लिष्टानां किम् अन्यद् अनुकम्पितम्
04300281 एतावत् त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः
04300282 यद् अनुस्मर्यते काले स्व-बुद्ध्याभद्र-रन्धन
04300291 येनोपशान्तिर्भूतानां क्षुल्लकानाम् अपीहताम्
04300292 अन्तर्हितोऽन्तर्-हृदये कस्मान् नो वेद नाशिषः

04300301*असावेव वरोऽस्माकम् ईप्सितो जगतः पते
04300302*प्रसन्नो भगवान् येषाम् अपवर्गः गुरुर्गतिः
04300311 वरं वृणीमहेऽथापि नाथ त्वत् परतः परात्
04300312 न ह्यन्तस्त्वद्-विभूतीनां सोऽनन्त इति गीयसे
04300321 पारिजातेऽञ्जसा लब्धे सारङ्गोऽन्यन् न सेवते
04300322 त्वद्-अङ्घ्रि-मूलम् आसाद्य साक्षात् किं किं वृणीमहि
04300331 यावत् ते मायया स्पृष्टा भ्रमाम इह कर्मभिः
04300332 तावद् भवत्-प्रसङ्गानां सङ्गः स्यान् नो भवे भवे
04300341 तुलयाम लवेनापि न स्वर्गं नापुनर्-भवम्
04300342 भगवत्-सङ्गि-सङ्गस्य मर्त्यानां किम् उताशिषः
04300351 यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः
04300352 निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन
04300361 यत्र नारायणः साक्षाद् भगवान् न्यासिनां गतिः
04300362 संस्तूयते सत्-कथासु मुक्त-सङ्गैः पुनः पुनः
04300371 तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया
04300372 भीतस्य किं न रोचेत तावकानां समागमः
04300381 वयं तु साक्षाद् भगवन् भवस्य ।प्रियस्य सख्युः क्षण-सङ्गमेन
04300382 सुदुश्चिकित्स्यस्य भवस्य मृत्योर् ।भिषक्तमं त्वाद्य गतिं गताः स्म
04300391 यन् नः स्वधीतं गुरवः प्रसादिता ।विप्राश्च वृद्धाश्च सद्-आनुवृत्त्या
04300392 आर्या नताः सुहृदो भ्रातरश्च ।सर्वाणि भूतान्यनसूययैव
04300401 यन् नः सुतप्तं तप एतद् ईश ।निरन्धसां कालम् अदभ्रम् अप्सु
04300402 सर्वं तद् एतत् पुरुषस्य भूम्नो ।वृणीमहे ते परितोषणाय
04300411 मनुः स्वयम्भूर्भगवान् भवश्च ।येऽन्ये तपो-ज्ञान-विशुद्ध-सत्त्वाः
04300412 अदृष्ट-पारा अपि यन्-महिम्नः ।स्तुवन्त्यथो त्वात्म-समं गृणीमः
04300421 नमः समाय शुद्धाय पुरुषाय पराय च
04300422 वासुदेवाय सत्त्वाय तुभ्यं भगवते नमः
0430043 मैत्रेय उवाच
04300431 इति प्रचेतोभिरभिष्टुतो हरिः ।प्रीतस्तथेत्याह शरण्य-वत्सलः
04300432 अनिच्छतां यानम् अतृप्त-चक्षुषां ।ययौ स्व-धामानपवर्ग-वीर्यः
04300441 अथ निर्याय सलिलात् प्रचेतस उदन्वतः
04300442 वीक्ष्याकुप्यन् द्रुमैश्छन्नां गां गां रोद्धुम् इवोच्छ्रितैः
04300451 ततोऽग्नि-मारुतौ राजन्न् अमुञ्चन् मुखतो रुषा
04300452 महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये
04300461 भस्मसात् क्रियमाणांस्तान् द्रुमान् वीक्ष्य पितामहः
04300462 आगतः शमयाम् आस पुत्रान् बर्हिष्मतो नयैः
04300471 तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा
04300472 उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयम्भुवा
04300481 ते च ब्रह्मण आदेशान् मारिषाम् उपयेमिरे
04300482 यस्यां महद्-अवज्ञानाद् अजन्यजन-योनिजः
04300491 चाक्षुषे त्वन्तरे प्राप्ते प्राक्-सर्गे काल-विद्रुते

04300492 यः ससर्ज प्रजा इष्टाः स दक्षो दैव-चोदितः
04300501 यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा
04300502 स्वयोपादत्त दाक्ष्याच् च कर्मणां दक्षम् अब्रुवन्
04300511 तं प्रजा-सर्ग-रक्षायाम् अनादिरभिषिच्य च
04300512 युयोज युयुजेऽन्यांश्च स वै सर्व-प्रजापतीन्

Chapter 31

0431001 मैत्रेय उवाच
04310011 तत उत्पन्न-विज्ञाना आश्वधोक्षज-भाषितम्
04310012 स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन् गृहात्
04310021 दीक्षिता ब्रह्म-सत्रेण सर्व-भूतात्म-मेधसा
04310022 प्रतीच्यां दिशि वेलायां सिद्धोऽभूद् यत्र जाजलिः
04310031 तान् निर्जित-प्राण-मनो-वचो-दृशो । जितासनान् शान्त-समान-विग्रहान्
04310032 परेऽमले ब्रह्मणि योजितात्मनः । सुरासुरेड्यो ददृशे स्म नारदः
04310041 तम् आगतं त उत्थाय प्रणिपत्याभिनन्द्य च
04310042 पूजयित्वा यथादेशं सुखासीनम् अथाब्रुवन्
0431005 प्रचेतस ऊचुः
04310051 स्वागतं ते सुरर्षेऽद्य दिष्ट्या नो दर्शनं गतः
04310052 तव चङ्क्रमणं ब्रह्मन् अभयाय यथा रवेः
04310061 यद् आदिष्टं भगवता शिवेनाधोक्षजेन च
04310062 तद् गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो
04310071 तन् नः प्रद्योतयाध्यात्म- ज्ञानं तत्त्वार्थ-दर्शनम्
04310072 येनाञ्जसा तरिष्यामो दुस्तरं भव-सागरम्
0431008 मैत्रेय उवाच
04310081 इति प्रचेतसां पृष्टो भगवान् नारदो मुनिः
04310082 भगवत्युत्तम-श्लोक आविष्टात्माब्रवीन् नृपान्
0431009 नारद उवाच
04310091 तज् जन्म तानि कर्माणि तद् आयुस्तन् मनो वचः
04310092 नृणां येन हि विश्वात्मा सेव्यते हरिरीश्वरः
04310101 किं जन्मभिस्त्रिभिर्वेह शौक्र-सावित्र-याज्ञिकैः
04310102 कर्मभिर्वा त्रयी-प्रोक्तैः पुंसोऽपि विबुधायुषा
04310111 श्रुतेन तपसा वा किं वचोभिश्चित्त-वृत्तिभिः
04310112 बुद्ध्या वा किं निपुणया बलेनेन्द्रिय-राधसा
04310121 किं वा योगेन साङ्ख्येन न्यास-स्वाध्याययोरपि
04310122 किं वा श्रेयोभिरन्यैश्च न यत्रात्म-प्रदो हरिः

04310131 श्रेयसाम् अपि सर्वेषाम् आत्मा ह्यवधिरर्थतः
04310132 सर्वेषाम् अपि भूतानां हरिरात्मात्मदः प्रियः
04310141 यथा तरोर्मूल-निषेचनेन ।तृप्यन्ति तत्-स्कन्ध-भुजोपशाखाः
04310142 प्राणोपहाराच् च यथेन्द्रियाणां ।तथैव सर्वार्हणम् अच्युतेज्या
04310151 यथैव सूर्यात् प्रभवन्ति वारः ।पुनश्च तस्मिन् प्रविशन्ति काले
04310152 भूतानि भूमौ स्थिर-जङ्गमानि ।तथा हरावेव गुण-प्रवाहः
04310161 एतत् पदं तज् जगद्-आत्मनः परं ।सकृद् विभातं सवितुर्यथा प्रभा
04310162 यथासवो जाग्रति सुप्त-शक्तयो ।द्रव्य-क्रिया-ज्ञान-भिदा-भ्रमात्ययः
04310171 यथा नभस्यभ्र-तमः-प्रकाशा ।भवन्ति भूपा न भवन्त्यनुक्रमात्
04310172 एवं परे ब्रह्मणि शक्तयस्त्वमू ।रजस्तमः सत्त्वम् इति प्रवाहः
04310181 तेनैकम् आत्मानम् अशेष-देहिनां ।कालं प्रधानं पुरुषं परेशम्
04310182 स्व-तेजसा ध्वस्त-गुण-प्रवाहम् ।आत्मैक-भावेन भजध्वम् अद्धा
04310191 दयया सर्व-भूतेषु सन्तुष्ट्या येन केन वा
04310192 सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः
04310201 अपहत-सकलैषणामलात्मन्य् ।अविरतम् एधित-भावनोपहूतः
04310202 निज-जन-वश-गत्वम् आत्मनोऽयन् ।न सरति छिद्रवद् अक्षरः सतां हि
04310211 न भजति कुमनीषिणां स इज्यां ।हरिरधनात्म-धन-प्रियो रस-ज्ञः
04310212 श्रुत-धन-कुल-कर्मणां मदैर्ये ।विदधति पापम् अकिञ्चनेषु सत्सु
04310221 श्रियम् अनुचरतीं तद्-अर्थिनश्च ।द्विपद-पतीन् विबुधांश्च यत् स्व-पूर्णः
04310222 न भजति निज-भृत्य-वर्ग-तन्त्रः ।कथम् अमुम् उद्विसृजेत् पुमान् कृत-ज्ञः
0431023 मैत्रेय उवाच
04310231 इति प्रचेतसो राजन्न् अन्याश्च भगवत्-कथाः
04310232 श्रावयित्वा ब्रह्म-लोकं ययौ स्वायम्भुवो मुनिः
04310241 तेऽपि तन्-मुख-निर्यातं यशो लोक-मलापहम्
04310242 हरेर्निशम्य तत्-पादं ध्यायन्तस्तद्-गतिं ययुः
04310251 एतत् तेऽभिहितं क्षत्तर्यन् मां त्वं परिपृष्टवान्
04310252 प्रचेतसां नारदस्य संवादं हरि-कीर्तनम्
0431026 श्री-शुक उवाच
04310261 य एष उत्तानपदो मानवस्यानुवर्णितः
04310262 वंशः प्रियव्रतस्यापि निबोध नृप-सत्तम
04310271 यो नारदाद् आत्म-विद्याम् अधिगम्य पुनर्महीम्
04310272 भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात् पदम्
04310281 इमां तु कौषारविणोपवर्णितां ।क्षत्ता निशम्याजित-वाद-सत्-कथाम्
04310282 प्रवृद्ध-भावोऽश्रु-कलाकुलो मुनेर् ।दधार मूर्ध्ना चरणं हृदा हरेः
0431029 विदुर उवाच
04310291 सोऽयम् अद्य महा-योगिन् भवता करुणात्मना
04310292 दर्शितस्तमसः पारो यत्राकिञ्चन-गो हरिः
0431030 श्री-शुक उवाच

04310301 इत्यानम्य तम् आमन्त्र्य विदुरो गजसाह्वयम्
04310302 स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः
04310311 एतद् यः शृणुयाद् राजन् राज्ञां हर्य्-अर्पितात्मनाम्
04310312 आयुर्धनं यशः स्वस्ति गतिम् ऐश्वर्यम् आप्नुयात्